प्रतियोगिताऽवच्छेदकधर्मः वह्नित्वसमवायः साध्यताऽवच्छेदकधर्मत्वेन साध्यतावच्छेदकः अस्ति एव । प्रतियोगिताऽवच्छेदकसम्बन्धस्यापि पूर्वोक्तयुक्त्या साध्यतावच्छेदकधर्मरूपत्वेन तत्र साध्यतावच्छेदकत्वमनाविलम् इति एतादृशाऽभावीयप्रतियोगिताऽवच्छेदकीभूतधर्म-सम्बन्धयोः साध्यतावच्छेदकत्वेन तादृशाऽभावः साध्यतावच्छेदकीभूतधर्माऽवच्छिन्न-साध्यतावच्छेदकीभूत-सम्बन्धाऽवच्छिन्नप्रतियोगिताकः स्यादेव, साध्यतावच्छेदकीभूतः यः वह्नित्वसमवायः धर्मः तेनाऽवच्छिन्नत्वात्तादृशाऽभावीयप्रतियोगितायाः, साध्यतावच्छेदकीभूतः यः समवायसम्बन्धः तेनाऽवच्छिन्नत्वाच्च । ततश्च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकसाध्याभावविधया समवायेन वह्नित्वसमवायिनः अभावः गृह्यते, तदधिकरणं पर्वतः, तत्र धूमः वृत्तिः, न तु अवृत्तिः इति धूमे साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताक-साध्याभावाधिकरणनिरूपितवृत्तित्वाऽभावस्याऽसत्त्वेन लक्षणाऽसमन्वयाद् भवति हि अव्याप्तिः ।

यदि "ननु अस्माभिः विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन अन्यथा वा नैव वह्नित्व-समवायात् शुद्धसमवायः अभिन्नः इष्यते, किन्तु वह्नित्वसमवायः शुद्धसमवायश्चैतौ द्वावपि

●

અને તે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ પણ સાધ્યતાઅવચ્છેદક છે. આ અભાવનું અધિકરણ છે જલહ્રદ, જ્યાં ધૂમ વૃત્તિ નથી. માટે, લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે.

આ રીતે (૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકધર્મ સાધ્યતાઅવચ્છેદક હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકસંબંધ સાધ્યતાઅવચ્છેદક હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ = વ્યાપ્તિ આટલું માનવાથી પણ વ્યાપ્યવૃત્તિસાધ્યક સ્થલમાં અવ્યાપ્તિ દૂર થઈ જાય છે.

⊠ કથિતનિર્દોષપરિષ્કારની સદોષતા ⊠

છતાં ફક્ત આટલું જ ન કહેવાય. જો કહો તો '**पर्वतो वह्निसमवायिमान् धूमात्**' આ સ્થલમાં અવ્યાપ્તિ આવે. પર્વત ઉપર વહ્નિ સંયોગસંબંધથી રહે છે. પર્વત અને વહ્નિનો સંયોગ હોય એટલે પર્વત અને વહ્નિના અવયવોનો પણ સંયોગ હોય જ. જેમ ભૂતલ ઉપર ઘડાનો

पृथगेव । तथा च उक्तस्थले समवायेन वह्नित्वसमवायिनः अभावः नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगिताऽवच्छेदकधर्मस्य वह्नित्वसमवायस्य साध्यताऽवच्छेदकत्त्वेऽपि प्रतियोगिताऽवच्छेदकसम्बन्धस्य समवायस्य नैव साध्यताऽवच्छेदकत्वमिति तादृशाऽभावे साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकत्वसत्त्वेऽपि साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहात् । तथा च संयोगेनैव वह्नित्वसमवाय्यभावः ग्राह्यः, तत्प्रतियोगिताऽवच्छेदकीभूतधर्मस्य वह्नित्वसमवायस्याऽपि साध्यतावच्छेदकत्वात्, प्रतियोगिताऽवच्छेदकीभूतसम्बन्धस्य संयोगस्याऽपि साध्यताऽवच्छेदकत्वात् । तथा च संयोगेन वह्नित्वसमवाय्यभावस्य साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नप्रतियोगिताकत्वे सति साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकत्वेन साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावविधया तद्ग्रहणं सुशक्यम् । तादृशाऽभावाधिकरणं नैव पर्वतः, तत्र वह्नित्वसमवायिनः वह्नेः संयोगेन विद्यमानत्वात्, किन्तु जलह्रदादिकमेव, तत्र धूमोऽवृत्तिः इति साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाऽभावस्य धूमे सत्त्वेन लक्षणसमन्वयात् कुतोऽव्याप्त्यवकाशः ?" इति कोऽपि उच्छृङ्खलः शङ्केत ***तदा*** नैव आकर्णयितव्यः सः, वह्नित्वसमवायात् समवायस्याऽभिन्नत्वस्य सर्ववादिसिद्धस्य तेनाऽपलापात् । यद्वा 'तुष्यतु दुर्जनः'

●

સંયોગ હોય એટલે ઘટઅવયવીભૂતકપાલનો પણ સંયોગ હોય જ. તથા જેમ દીવાલને શરીરનો સંયોગ હોય એટલે શરીરના કોઈને કોઈ અવયવોનો પણ સંયોગ હોય જ. અવયવના સંયોગ વિના અવયવીનો સંયોગ શક્ય નથી. તેમ પર્વત ઉપર વહ્નિનો સંયોગ હોય એટલે વહ્નિના અવયવોનો સંયોગ હોય જ. માટે, કહી શકાય કે જ્યાં જ્યાં સંયોગથી ધૂમ હોય ત્યાં ત્યાં જે રીતે સંયોગથી વહ્નિ હોય તે જ રીતે સંયોગથી વહ્નિઅવયવ પણ હોય જ. વહ્નિઅવયવ વહ્નિના સમવાયી કહેવાય કારણ કે અવયવી હંમેશા પોતાના અવયવમાં સમવાય સંબંધથી રહે - આ વાત ન્યાયજગતમાં પ્રસિદ્ધ જ છે. તેથી વહ્નિ પોતાના અવયવોમાં સમવાયસંબંધથી રહેશે. જે સમવાયનો અનુયોગી તે સમવાયી કહેવાય. માટે, વહ્નિના અવયવો વહ્નિસમવાયવાળા કહેવાય. હવે, વ્યાપ્તિ એમ પણ બનાવી શકાય કે જ્યાં જ્યાં સંયોગસંબંધથી ધૂમ ત્યાં ત્યાં સંયોગસંબંધથી વહ્નિસમવાયિ હોય જ. આ વ્યાપ્તિના આધારે અનુમાન કરવામાં આવ્યું કે '**पर्वतो वह्निसमवायिमान् धूमात्**' આ સ્થલમાં સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિસમવાય/સમવાય. સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ. યાદ રહે ! જ્યાં સાધ્યતાઅવચ્છેદક તરીકે વહ્નિસમવાય વગેરે પ્રાતિસ્વિક ધર્મો બતાવ્યા હોય ત્યાં

न्यायेन अभ्युपगमवादेन एव, न तु वस्तुतः, तदुक्तं कक्षीक्रियताम्, तथापि अव्याप्तिस्तु भवत्येव ।

तथा हि - उच्छृङ्खलेनोक्तम् - वह्नित्वसमवायात् शुद्धसमवायो भिन्नः एव, अस्त्वेवम् । तथापि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन वह्नित्वसमवायिनः अभावमादाय अव्याप्तिः सम्भवत्येव । पर्वते समवायेनाऽपि वह्नित्वसमवायी वह्निः नास्ति तर्हि वह्नित्वसमवायेन = वह्नित्वप्रतियोगिकसमवायेन कुतः वह्निः स्यात् ? वह्नित्वसमवायेन

●

समवाय वगेरे तो साध्यताअवच्छेदक बनता જ होय. '**विशिष्टं शुद्धान्नातिरिच्यते**' न्यायथी જ स्तो !

वधारे सरळ स्थळ आ बनशे -

'**पर्वतो वह्नित्वसमवायिमान् धूमात्**' ।

'तत्समवायि' - आ प्रमाणे जे मूळ पंक्तिमां जणावेल छे तेमां तत्पदथी वह्नित्व लઈ लઈએ. वह्नि જ वह्नित्वसमवायिमान् थઈ જशे. बाકी બધું पूर्ववत् ! प्रस्तुतमां वह्नित्व-प्रतियोगिक समवाय साध्यताअवच्छेदक धर्म थाय. दुनियामां समवाय तो એક જ छे. तथा **विशिष्टं शुद्धान्नातिरिच्यते** न्याय पण छे. माटे, समवाय पण साध्यताअवच्छेदक धर्म બને જ.

⁂ वह्नित्वसमवायिसाध्यकस्थलविमर्श ⁂

हवे तमारी व्याप्ति याद કरो -

(१) જે अभावीयप्रतियोगिताअवच्छेदक धर्म साध्यताअवच्छेदक होय अने (२) જે अभावीयप्रतियोगिताअवच्छेदक संबंध पण साध्यताअवच्छेदक જ होय ते अभावना अधिકरणमां अवृत्तित्व होवुं જोઈએ. प्रस्तुतमां वह्नित्वसमवायी वह्नि पर्वत ઉपर संयोग-संबंधथी रहे. पण, समवायसंबंधथी तो न જ रहे. समवायसंबंधथी वह्नि पोताना अवयवमां रहे. पण, पर्वत ઉपर न रहे. माटे पर्वत ઉपर समवायसंबंधथी वह्नित्वसमवायि-अभाव मળी જशे. हवे आ अभाव तमारी शरतमांथी पसार थाय छे કे नहीं ते જोઈ लઈએ. आ वह्नित्वसमवायिअभावीयप्रतियोगिताअवच्छेदक धर्म वह्नित्वसमवाय शुद्ध-समवायथी अभिन्न होवाना नाते साध्यताअवच्छेदक छे. तथा आ अभावीयप्रतियोगिता-अवच्छेदक संबंध समवाय ते पण साध्यताअवच्छेदक छे. धर्म રूपे साध्यताअवच्छेदक होय કे संबंध રूपे, पण साध्यताअवच्छेदक छे - तेटलुं ખरुं. माटे, आ अभाव लઈ शકाय. आ अभावनुं अधिકरण पर्वत. तेमां धूम वृत्ति होवाथी अव्याप्ति दुर्वार बने.

वह्नित्वस्यैव कुत्रचिदपि वृत्तेः सम्भवात्, तदतिरिक्तस्य तेन सम्बन्धेन वृत्तेरयोगादिति ।

तादृशाऽभावीयप्रतियोगिताऽवच्छेदकः धर्मोऽपि वह्नित्वसमवायः, सम्बन्धोऽपि च वह्नित्वसमवायः, वह्नित्वसमवायस्य च साध्यताऽवच्छेदकधर्मरूपत्वेन तस्य साध्यतावच्छेदकत्वम् अनाविलम् इति वह्नित्वसमवायेन वह्नित्वसमवाय्यभावस्य साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्मावच्छिन्नप्रतियोगिताकत्वे सति साध्यतावच्छेदकीभूतवह्नित्वसमवायसम्बन्धावच्छिन्नप्रतियोगिताकत्वेन साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावविधया तद्ग्रहणं सम्भवति । तादृशाऽभावाधिकरणं पर्वतः, धूमः तत्र वृत्तिरेव, न तु अवृत्तिरिति धूमे साध्यतावच्छेदकसम्बन्धाऽवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्याऽसत्त्वान्नैव लक्षणसमन्वयः सद्धेतौ इति अव्याप्तिः दुर्वारा एव । ***न चा***ऽत्र वह्नित्वसमवायेन वह्नेः वृत्तेरेवाऽप्रसिद्धेः कुतः तेन सम्बन्धेनाऽभावः गृह्यते ***इति वाच्यम्,*** व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावाङ्गीकारे एव एतद्दर्शनाभिप्रायात् तेन सम्बन्धेन अभावग्रहणात् ।

'उपाये सति कर्तव्यं सर्वेषां चित्तरञ्जनम्' इतिन्यायेनैव वह्नित्वसमवायेन वह्नित्वसमवाय्यभावमादायाऽव्याप्तिरुपदर्शिता, न तु समवायेन वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः न भवति इति दर्शिता इति स्पष्टीकार्यम् ।

यदि च धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वमङ्गीक्रियते तदा नोक्ताऽऽपत्तिः । तथा हि - 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र यः समवायेन वह्नित्वसमवाय्यभावः गृहीतः सः यद्यपि साध्यतावच्छेदकीभूतधर्मावच्छिन्न-साध्यताऽवच्छेदकीभूतसम्बन्धाऽवच्छिन्नप्रतियोगिताकः वर्तते तथापि धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकः नास्ति, धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वस्य तत्र विरहात् । ततश्च धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावविधया समवायेन वह्नित्वसमवाय्यभावग्रहणमेव न सम्भवति तदा कुतः तमादायाऽव्याप्तिसम्भवः ?

एवं वह्नित्वसमवायेन वह्नित्वसमवाय्यभावस्याऽपि ग्रहणं न शक्यम्, तादृशाऽभावस्याऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नप्रतियोगितानिरूपकत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नप्रतियोगितानिरूपकत्वाऽभावादिति कुतः तमादायाऽपि अव्याप्तिसम्भवः ?

किन्तु अत्र संयोगेन वह्नित्वसमवाय्यभावः एव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया साध्यतावच्छेदकः यः वह्नित्वसमवायः तेनैव धर्मविधयाऽवच्छिन्नत्वात्, सम्बन्धविधया साध्यतावच्छेदकः यः संयोगसम्बन्धः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वाच्च । तादृशाऽभावाधिकरणं पर्वतः नास्ति, किन्तु जलह्रदादिकमेव, तत्र धूमोऽवृत्तिरिति धूमे धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात्कुतः अव्याप्तिरिति भावः । तथा च 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यताऽवच्छेदकधर्मावच्छिन्न-प्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणं नाभ्युपेयम्, किन्तु 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपेयम् । अतः एव 'येन रूपेण येन सम्बन्धेन'..... इत्यादिजागदीश्याः अपि उक्तलक्षणसूचकत्वमेवाऽभ्युपेयम्, न तु यथाश्रुतार्थग्रहणं कर्तव्यम् इति स्थितम् ।

य शो ल ता

अथ किं भवतो वक्रमार्गाश्रयणकुहेवाकः, येन पुनः पुनः वक्रमार्गः एवाश्रीयते । 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्येतत्स्थलपर्यन्तमनुधावनं किमर्थम् ? 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्येव स्थलमङ्गीक्रियताम्, तत्रापि अभिप्रेतसिद्धेः ।

तथा हि - स्थलं 'पर्वतः समवायिविशिष्टः, धूमात्' । पक्षः - पर्वतः, साध्यम् - समवायी,

❁ વહ્નિત્વસમવાયી જ શા માટે સાધ્ય ? ❁

પ્રશ્ન :- જો "સાધ્યતાઅવચ્છેદક ધર્મ વહ્નિસમવાય જ બને, સમવાય ન બને. માટે તમે જે અભાવ લીધો તેનો પ્રતિયોગિતાઅવચ્છેદક સમવાય સંબંધ સાધ્યતાઅવચ્છેદક ન બની શકે. માટે, સમવાયથી વહ્નિસમવાયિનો અભાવ લઈ નહીં શકાય. અવ્યાપ્તિ પણ નહીં આવે" - આ પ્રમાણે કોઈ કહે તો આ જ આપત્તિ બીજા સ્થળે તમારે આપવી પડે. '**पर्वतः समवायिमान् धूमात्**' જ્યાં જ્યાં ધૂમ હોય ત્યાં ત્યાં સંયોગ સંબંધથી વહ્નિત્વસમવાયી હોય

વિ ન ભા

हेतुः - धूमः । साध्यतावच्छेदकः धर्मः - समवायः, साध्यतावच्छेदकसम्बन्धः - संयोगः ।

यत्र यत्र धूमः तत्र तत्र वह्निरिति यथोच्यते तथा 'यत्र यत्र धूमः तत्र तत्र समवायी' इत्यपि कथयितुं शक्यते एव, वह्नेः समवायित्वात् । तथा चैतत् सद्धेतुकस्थलम् । अत्र वह्नेरिव संयोगेनैव समवायिनः साध्यता अभिप्रेता, तथैव व्याप्तेः ।

अत्र समवायेन समवाय्यभावः गृह्यते । तादृशाभावीयप्रतियोगी - समवायी ।

प्रतियोगिताऽवच्छेदकः धर्मः - समवायः ।

प्रतियोगिताऽवच्छेदकः सम्बन्धः - समवायः।

समवायस्य साध्यतावच्छेदकधर्मत्वेन प्रतियोगितावच्छेदकसम्बन्ध-धर्मौ साध्यतावच्छेदकौ भवतः एव । तथा च एतादृशाभावः साध्यतावच्छेदकीभूतधर्मावच्छिन्न-साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नप्रतियोगिताकः अस्त्येव, साध्यतावच्छेदकीभूतः यः समवायः तेनैव तादृशाभावीयप्रतियोगितायाः धर्मविधयाऽवच्छिन्नत्वात्, साध्यतावच्छेदकीभूतः यः समवायः तेनैव सम्बन्धविधयाऽपि अवच्छिन्नत्वाच्च ।

तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावविधया समवायसम्बन्धावच्छिन्न-समवायधर्मावच्छिन्नप्रतियोगिताकसमवाय्यभावः गृह्यते एव । तादृशाऽभावस्य अधिकरणं पर्वतः भवत्येव, वह्नेः पर्वते संयोगेन सत्त्वेऽपि समवायेनाऽसत्त्वात्, वह्नेः समवायित्वाच्च । धूमस्तादृशाधिकरणे वृत्तिरेवेति धूमे साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यताऽवच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य विरहेण लक्षणाऽसमन्वयाद् भवति हि अव्याप्तिः ।

यदि धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वमङ्गीक्रियते तदा नोक्ताऽव्याप्तिः, समवायेन समवाय्यभावस्याऽग्रहणात् ।

●

જ. આ વ્યાપ્તિ આપણે જોઈ ગયા. જ્યાં વહ્નિત્વસમવાયી હોય ત્યાં ફક્ત સમવાયી તો હોય જ. કારણ કે વહ્નિત્વસમવાયી એ પણ એક સમવાયીપદાર્થ જ છે. જેમ જ્યાં આંબો હોય ત્યાં વૃક્ષ તો હોય જ. કારણ કે આંબો એ એક વૃક્ષ જ છે. આમ, જ્યાં જ્યાં સંયોગથી ધૂમ હોય ત્યાં ત્યાં સંયોગથી સમવાયી હોય જ - આ વ્યાપ્તિ પણ કહી શકીએ. આના આધારે જ સ્થલ બનાવ્યું કે - '**पर्वतः समवायिमान् धूमात्**'

समवायेन समवाय्यभावीयप्रतियोगितायां धर्मविधया यः साध्यतावच्छेदकः समवायः धर्मविधया तदवच्छिन्नत्वस्य सत्त्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वस्य असत्त्वाद् यः धर्मविधया साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, यः सम्बन्धविधया साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावविधया न तादृशसमवाय्यभावः गृह्यते, ततः कुतः तमादायाऽव्याप्तिः सम्भवति ? अत्र संयोगेन समवाय्यभावः एव ग्राह्यः, तादृशाभावीयप्रतियोगितायां यः धर्मविधया साध्यतावच्छेदकः समवायः धर्मविधया तदवच्छिन्नत्वस्य यः सम्बन्धविधया साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वस्य च सत्त्वेन यः धर्मविधया साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, यः सम्बन्धविधया साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावरूपत्वात् तादृशाऽभावस्य ।

तादृशाऽभावाधिकरणं न पर्वतः, पर्वते संयोगेन वह्नेः सत्त्वात्, वह्नेश्च समवायित्वात्, किन्तु गुणादिकमेव, तत्र धूमहेतुरवृत्तिः इति धूमे धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतोऽव्याप्तिः ? तथा च 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकसमवाय्यभावमादायाऽव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धाऽवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य लक्षणत्वाङ्गीकारः न युक्तः, किन्तु यः धर्मविधया साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया

●

આ સ્થલમાં સાધ્યતાઅવચ્છેદક ધર્મ - સમવાય.

સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ.

અહીં અભાવ લઈશું સમવાયથી સમવાયિઅભાવ. પર્વત ઉપર વહ્નિત્વસમવાયી સંયોગથી રહે. સમવાયથી તો ન જ રહે. માટે, સમવાયિઅભાવ લઈ શકાશે.

સમવાયિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ - સમવાય.

સમવાયિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ - સમવાય.

મતલબ કે જે પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે તે પણ સાધ્યતાઅવચ્છેદક છે. અને જે પ્રતિયોગિતાઅવચ્છેદક સંબંધ છે તે પણ સાધ્યતાઅવચ્છેદક છે. આમ, તમારી શરતમાંથી પાસ થઈ જવાને કારણે સમવાયથી સમવાયિઅભાવ લઈ શકાશે. સમવાયથી સમવાયિ-

तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वमङ्गीकरणीयमिति ।

एवञ्च यदभिप्रेतं तत् 'पर्वतः समवायिविशिष्टः धूमाद्' - इतिस्थलाङ्गीकारेणाऽपि सिध्यति तदा 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इतिस्थलमङ्गीकृत्य किमर्थम् अभिप्रेतसिद्धिः कृता ? ऋजुणा सिध्यतोऽर्थस्य वक्रेण साधनाऽयोग***दिति चेद् ?***

मैवम्, समवायेन समवाय्यभावस्य पर्वतेऽविद्यमानत्वेन अभिप्रेताऽसिद्धेः । इदमत्र हृदयम् - "साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावलक्षणे अव्याप्तिः भवति, तद्वारणाय धर्मविधया साध्यतावच्छेदकः यः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया साध्यतावच्छेदकः यः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वमङ्गीकार्यम्" - इति अभिप्रेतम्, तत्सिद्ध्यर्थमस्माभिः 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इति स्थलं गृहीतम्, भवता

●

અભાવનું અધિકરણ પર્વત. પર્વતમાં ધૂમ વૃત્તિ. માટે, અવ્યાપ્તિ આવી જશે.

(યાદ રહે ! વાસ્તવમાં વહ્નિત્વસમવાયિનિષ્ઠસાધ્યતા જે રીતે વહ્નિત્વસમવાયથી અવચ્છિન્ન કહેવાય તે રીતે સમવાયથી પણ અવચ્છિન્ન કહેવાય જ. સમવાય પણ સાધ્યતા-અવચ્છેદક બને જ. છતાં અભ્યુપગમવાદથી માની લઈએ કે સમવાય સાધ્યતાઅવચ્છેદક ન બને. તે મુજબ આ અવ્યાપ્તિ દેખાડેલ છે, **उपाये सति कर्तव्यं सर्वेषां चित्तरञ्जनम्** આ ન્યાયથી. તેથી 'વહ્નિત્વસમવાયિસાધ્યક સ્થલમાં અવ્યાપ્તિ નથી આવતી, માટે સમવાયિસાધ્યક સ્થલ બતાવ્યું' - આવું માનવું નહીં.) વળી આ સ્થળ જ લઘુભૂત છે. તો પછી અહીં શા માટે અવ્યાપ્તિ ન દર્શાવી ?

❀ શુદ્ધસમવાયિસાધ્યકસ્થલે અભિપ્રેતઅસિદ્ધિ ❀

ઉત્તર :- સમવાયથી સમવાયિઅભાવ પર્વત ઉપર મળી જ ન શકે. રૂપત્વસમવાય-વિશિષ્ટ જે રૂપ તે તો પર્વતમાં સમવાયથી રહેવાનું જ છે. માટે, ગ્રંથકારે તત્સમવાયિસાધ્યક સ્થલ દર્શાવ્યું છે.

આ આપત્તિના નિરાકરણ માટે હવે તમારે આવું લક્ષણ તો બનાવવું જ પડશે કે -

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય. અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક હોય તે અભાવના

च 'पर्वतः समवायिविशिष्टः, धूमाद्' - इति स्थलमङ्गीकृतम् । यदि भवदुक्तस्थलं गृह्यते तदा तेनाऽभिप्रेतसिद्धिः तदैव स्याद् यदा साध्यतावच्छेदकसम्बन्धाऽवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपलक्षणस्याऽव्याप्तिः उक्तस्थले स्यात् । किन्तु तन्न सम्भवति । यतः समवायेन समवाय्यभावः अव्याप्त्यापादकविधया भवता गृहीतः । सः यद्यपि साध्यतावच्छेदकधर्माऽवच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकः तथापि तदधिकरणे धूमः अवृत्तिरेव, यतः तदधिकरणविधया पर्वतः नैव गृह्यते, पर्वतस्य समवायेन समवायिविशिष्टत्वात् । यद्यपि पर्वते समवायेन वह्निर्नास्ति तथापि समवायेन समवायी नास्ति इति नैव कथ्यते, रूपत्वसमवायिनः रूपस्य समवायेन पर्वते अवश्यम्भावात् ।

न हि एकस्य समवायिनः अभावमात्रेण तत्र समवाय्यभावः अस्ति इति कथयितुमुचितम्, किन्तु समवायिसामान्यस्य असत्त्वे एव समवाय्यभावः कथ्यते । यथा न हि एकस्य नीलघटादेः विरहे पीतादिघटसत्त्वे च भूतले घटाभावः अस्ति इति लोकैः व्यवह्रियते, किन्तु घटसामान्यस्य अभावे एव ।

तदुक्तं **दीधितिकृता**ऽपि **अवच्छेदकत्वनिरुक्तिदीधितौ** "एकघटवति भूतले 'कम्बुग्रीवादिमान् नास्ति' इतिशब्दो न प्रमाणम्, प्रमाणञ्च घटसामान्यशून्ये" (अवच्छेदकत्वनिरुक्तिः - पृ. ५२३) इति । तथा च पर्वते एकस्य समवायिनः वह्नेः अभावेऽपि अन्यस्य समवायिनः रूपस्य सत्त्वान्न तत्र समवाय्यभावः प्रतिपादयितुमुचितः, किन्तु यदा तत्र समवायिसामान्यस्याऽभावः स्यात् तदैव समवाय्यभावः प्ररूप्यते । पर्वते न समवायिसामान्यस्याऽभावः, रूपस्य समवायिनः सत्त्वात् । तथा च समवायेन तादृशसमवायिसामान्यस्याभावः सामान्यादौ, तत्र धूमोऽवृत्तिरेवेति साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य धूमे सत्त्वेन लक्षणसमन्वयात् कुतोऽव्याप्तिः ?

तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य लक्षणत्वाङ्गीकारे यदि नास्त्येवाऽव्याप्तिः तर्हि किमर्थं धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः... इति लक्षणमङ्गीकुर्यात् कोऽपि ? ततः 'पर्वतः समवायिविशिष्टः धूमाद्' इत्येतत्स्थले अव्याप्त्यभावेन अभिलषिताऽसिद्धेरेव न तादृशस्थलमुपादेयम्, किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्'

- इत्येतत्स्थलमेवाङ्गीकार्यम्, अत्र समवायेन वह्नित्वसमवाय्यभावम्, वह्नित्वसमवायेन वह्नित्वसमवाय्यभावञ्चादाय साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताक-साध्याभाववदवृत्तित्वलक्षणे अव्याप्तिसद्भावेन अभिलषितसिद्धेः ।

ननु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादाय, वह्नित्वसमवायेन वह्नित्वसमवाय्यभावमादाय चाऽव्याप्तिः सम्भवति इति स्वीकृतम्, किन्तु तन्निवारणाय न भवतोपदर्शितः एव पन्थाः स्वीकरणीयः । ततोऽपि ऋजुपथा अभिलषितसिद्धिः भवत्येव ।

अयं भावः - साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताक-साध्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपलक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावम्, वह्नित्वसमवायेन वह्नित्वसमवाय्यभावञ्चादाय अव्याप्तिः भवत्येव । किन्तु, तन्निवारणाय 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इतिलक्षणाङ्गीकारः नाऽऽवश्यकः परन्तु 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिता-निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणाङ्गीकारेऽपि अव्याप्तिनिराकरणं सम्भवत्येव, धर्मविधया प्रवेशाऽकरणेऽपि सम्बन्धविधया प्रवेशकरणेनैव अव्याप्तिनिरासात् ।

तथा हि - पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद् - इत्यत्र समवायेन वह्नित्वसमवाय्यभावः गृहीतः, यदि एषः अभावः गृह्यते तदाऽव्याप्तिः भवति, किन्तु परिष्काराऽनुसारेण नैव अभावः ग्रहीतुं शक्यते, यतः एतदभावीयप्रतियोगिता साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्माऽवच्छिन्नाऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्ना नास्ति । प्रकृते या

●

અધિકરણમાં અવૃત્તિત્વ = સાધ્યાભાવવદ્અવૃત્તિત્વ. (મતલબ કે અડધી અમારી વાત તો સ્વીકારવી જ પડી.) જો આવું લક્ષણ કહેશો તો અવ્યાપ્તિ નહીં આવે. કારણ કે **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલે સમવાયથી જે વહ્નિત્વસમવાયિઅભાવ લીધો તે વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સમવાય સાધ્યતાઅવચ્છેદક છે. પણ, સાધ્યતાઅવચ્છેદક ધર્મ છે, સંબંધ નહીં. પ્રસ્તુતમાં નવા પરિષ્કાર મુજબ પ્રતિયોગિતા-અવચ્છેદક સંબંધ ફક્ત સાધ્યતાઅવચ્છેદક હોય એટલું પર્યાપ્ત નથી. પણ, પ્રતિયોગિતા-

प्रतियोगिता साध्यतावच्छेदकीभूतधर्मावच्छिन्नाऽपि स्यात्, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नाऽपि स्यात् तस्या एव प्रतियोगितायाः निरूपकाऽभावस्य ग्रहणं सम्भवति । ततश्च समवायेन वह्नित्वसमवाय्यभावः नैव गृह्यते । ततः कुतः तमादायाऽव्याप्तिः सम्भवति ?

एवमेव वह्नित्वसमवायेनाऽपि वह्नित्वसमवाय्यभावः ग्रहीतुं नैव शक्यते, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्मावच्छिन्नत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनावच्छिन्नत्वाभावात् । ततः कुतः तमादायाऽव्याप्तिसम्भवः ? किन्तु प्रकृते संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्मावच्छिन्नत्वे सति सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वात् । तादृशाऽभावाधिकरणं न पर्वतः, तत्र संयोगेन वह्नित्वसमवायिनः वह्नेः सत्त्वादिति जलह्रदादिकमेव ग्राह्यम् । तत्र च धूमोऽवृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धोऽपि ?

ततश्च 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र अव्याप्तिवारणं यदि सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वाङ्गीकारे सम्भवति तर्हि कः प्राज्ञः 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया

●

અવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોવો જોઈએ. તે તો સમવાયથી વહ્નિત્વસમવાયિ-અભાવ લેવામાં આવે ત્યારે શક્ય નથી. કારણ કે સાધ્યતાઅવચ્છેદક સંબંધ છે સંયોગ. જ્યારે તમારો પ્રતિયોગિતાાઅવચ્છેદક સંબંધ છે સમવાય. આમ સમવાયથી વહ્નિત્વસમવાયિ-અભાવ પ્રસ્તુતમાં લઈ નહીં શકાય. કિંતુ સંયોગથી વહ્નિત્વસમવાયિઅભાવ લેવો પડશે, કારણ કે આ અભાવનો પ્રતિયોગિતાઅવચ્છેદક સંયોગ સંબંધ એ જ સાધ્યતાઅવચ્છેદક સંબંધ છે. આ અભાવનું અધિકરણ જલહ્રદ. ત્યાં ધૂમ અવૃત્તિ. લક્ષણસમન્વય થઈ ગયો. અવ્યાપ્તિ દૂર !

❖ ધર્મવિધયા પ્રવેશ ન કરતા પુનઃ અવ્યાપ્તિ ❖

સબૂર ! આ તો તમે હજુ અડધા જ સીધા રસ્તામાં આવ્યા છો. અડધું તમને બતાવવાનું બાકી છે. જો તમે ઉપર બતાવ્યું તેટલું જ કહો તો પણ તકલીફ ઊભી જ છે.

तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमङ्गीकुर्यात् ? गुरुभूतत्वाद**स्येति चेद्** ?

य शो ल ता

मैवम्; तथा सति 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव संयोगेन वह्निसंयोगिनः अभावमादायाऽव्याप्तिप्रसक्तेः ।

तथा हि - पर्वते संयोगेन वह्निः वर्तते, किन्तु वह्निसंयोगी = वह्निप्रतियोगिकसंयोगविशिष्टः अन्यः कोऽपि पर्वतादिकः न विद्यते । ततः पर्वते संयोगेन वह्निसंयोगिनः अभावः प्राप्यते एव । एतादृशाऽभावीयप्रतियोगी - वह्निसंयोगी ।

- प्रतियोगितावच्छेदकधर्मः - वह्निसंयोगः ।
- प्रतियोगितावच्छेदकसम्बन्धः - संयोगः ।

●

એટલે કે તમે (૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક હોય..... આટલું જ કહો. પણ, જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક **ધર્મ** હોય - આ રીતે ધર્મ પદનો પ્રવેશ ન કરો તો આ જ સ્થલમાં પાછી અવ્યાપ્તિ આવશે.

આ વખતે **पर्वतो वह्नित्वसमवायिमान् धूमात्** - (સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય/સમવાય. સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ) આ સ્થલે વહ્નિસંયોગિઅભાવ સંયોગ સંબંધથી લેવો છે. કારણ કે પર્વત પોતે વહ્નિસંયોગી છે. પર્વતમાં વહ્નિસંયોગી બીજો કોઈ પર્વત સંયોગ સંબંધથી રહેતો નથી. માટે, સંયોગસંબંધથી વહ્નિસંયોગિઅભાવ લઈ શકાશે.

વિ ના

આ અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ - સંયોગ.

તથા અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ - વહ્નિસંયોગ + સંયોગ. જે અભાવીય-પ્રતિયોગિતાઅવચ્છેદક સંબંધ છે તે સાધ્યતાઅવચ્છેદક સંબંધ છે તથા જે અભાવીય-પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે તે સાધ્યતાઅવચ્છેદક તો છે જ. માટે, સંયોગથી વહ્નિસંયોગિઅભાવ પર્વત ઉપર લઈ શકાશે. આ અભાવનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ, લક્ષણઅસમન્વય ! માટે પુનઃ અવ્યાપ્તિ !

જો તમે એમ માનો કે - "અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ વહ્નિસંયોગ જ બને. સંયોગ નહીં. વહ્નિસંયોગ તો સાધ્યતાઅવચ્છેદક નથી. માટે, પ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદકસ્વરૂપ ન બનતા સંયોગથી વહ્નિસંયોગિઅભાવ લઈ નહીં શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. તેનું અધિકરણ જલહ્રદ, તેમાં ધૂમ

अत्र वह्निसंयोगः = वह्निप्रतियोगिकसंयोगः = वह्निप्रतियोगिकत्वविशिष्टः संयोगः, सः 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन शुद्धसंयोगाद् अभिन्नः एवेति प्रतियोगितावच्छेदकधर्मविधया शुद्धसंयोगोऽपि प्रकृते प्राप्यते ।

साध्यतावच्छेदकसम्बन्धोऽपि प्रकृते संयोगः एव वर्तते इति प्रकृते प्रतियोगितावच्छेदकधर्मोऽपि तत्सम्बन्धोऽपि च साध्यतावच्छेदकतया गृह्यते एव । भवताऽभ्युपगतलक्षणाऽनुसारेण एषोऽभावोऽङ्गीकर्तुं शक्यते एव, यतः एतादृशाऽभावीयप्रतियोगिता साध्यतावच्छेदकीभूतवह्निसंयोगधर्माऽवच्छिन्ना एव, तादृशप्रतियोगिताऽवच्छेदकीभूतवह्निसंयोगस्य शुद्धसंयोगाऽनतिरेकेण साध्यतावच्छेदकसम्बन्धत्वात् । तथा च तादृशाऽभावीयप्रतियोगिता साध्यतावच्छेदकधर्मावच्छिन्ना कथ्यते एव । एवमेव तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वात् सम्बन्धविधया यः साध्यताऽवच्छेदकः तदवच्छिन्नत्वमपि

य शो ल ता

●

અવૃત્તિ, લક્ષણસમન્વય થઈ ગયો તો અવ્યાપ્તિ ક્યાં આવી ?"

·※· અન્ય રીતે અવ્યાપ્તિઆપાદન ·※·

તો બીજી રીતે પણ અવ્યાપ્તિ આપી શકાય છે. વહ્નિત્વસમવાયી વહ્નિ છે. તે વહ્નિસંયોગથી રહે. મતલબ કે જે રીતે ભૂતલમાં ઘટ સંયોગ સંબંધથી રહે તે સંયોગ ઘટસંયોગ જ હોય, પટસંયોગ નહીં. માટે, ઘટસંયોગથી ઘટ ભૂતલમાં રહે - એવું કહી શકાય. તે જ રીતે વહ્નિત્વસમવાયી વહ્નિ પર્વત ઉપર સંયોગ સંબંધથી રહે તે વહ્નિસંયોગસંબંધથી જ, ઘટસંયોગથી નહીં. માટે, આપણે **पर्वतो वह्नित्वसमवायिमान् धूमात्** અહીં સાધ્યતાઅવચ્છેદક સંબંધ તરીકે કેવલ સંયોગ નહીં લઈએ. કિંતુ વહ્નિસંયોગ જ લઈશું. માટે,

વિ ન ભ્રા

સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય.

સાધ્યતાઅવચ્છેદક સંબંધ - વહ્નિસંયોગ.

પર્વત ઉપર વહ્નિનો સંયોગ રહે. કિંતુ વહ્નિસંયોગવાન્ કોઈ પર્વત તો પર્વત ઉપર ન રહે. ∴ પર્વત ઉપર વહ્નિસંયોગીનો અભાવ સંયોગસંબંધથી મળી જાય. જો પર્વત ઉપર સંયોગસંબંધથી વહ્નિસંયોગી ન રહે તો વહ્નિસંયોગસંબંધથી તો સુતરામ્ વહ્નિસંયોગી ન રહે. માટે, આપણે પર્વત ઉપર વહ્નિસંયોગસંબંધથી વહ્નિસંયોગિઅભાવ લઈશું.

વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ - વહ્નિસંયોગ.

વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ - વહ્નિસંયોગ.

વહ્નિસંયોગ તો સાધ્યતાઅવચ્છેદક છે જ. અર્થાત્ પ્રતિયોગિતાઅવચ્છેદક સંબંધ

तत्र अस्ति एवेति यः सम्बन्धविधया साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकसाध्याभावविधया संयोगसम्बन्धावच्छिन्न-वह्निसंयोगावच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावः गृह्यते एव, तदधिकरणं पर्वतः एव, पूर्वोक्तयुक्तेः, तत्र च धूमः वृत्तिः इति सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य धूमे विरहेण लक्षणाऽसमन्वयाद् भवति एव अव्याप्तिरिति ।

य शो ल ता

●

વહ્નિસંયોગ એ જ સાધ્યતાઅવચ્છેદક સંબંધ પણ છે.

તથા પ્રતિયોગિતાઅવચ્છેદકધર્મ વહ્નિસંયોગ તે પણ સાધ્યતાઅવચ્છેદક જ છે.

∴ વહ્નિસંયોગિઅભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. પર્વત ઉપર ધૂમ વૃત્તિ. માટે, લક્ષણઅસમન્વય તથા અવ્યાપ્તિ !

⁂ સંયોગીઅભાવને લઈને અવ્યાપ્તિ કેમ નહીં ? પ્રશ્ન ⁂

પ્રશ્ન :- અરે ભાઈ ! આપ આટલું વિચિત્ર કેમ કરો છો ? **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થળે સંયોગથી જ સાધ્યતા માનો. તથા વહ્નિસંયોગિઅભાવ લેવાના બદલે ફક્ત સંયોગિઅભાવ લઈ લો. સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ બનશે - સંયોગ તથા સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ - સંયોગ.

જે વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક વહ્નિસંયોગને જ માનશે, કેવલ સંયોગને નહીં માને તે લોકોના મતે પણ સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ તો સંયોગ બનશે જ. તથા સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સંયોગસંબંધ એ સાધ્યતાઅવચ્છેદક સંબંધ છે જ. તથા આ અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સંયોગ એ પણ સાધ્યતાઅવચ્છેદક છે જ. માટે, પરિષ્કાર મુજબ સંયોગિઅભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. તેમાં ધૂમ વૃત્તિ. લક્ષણઅસમન્વય. માટે, અવ્યાપ્તિ ! તો પછી આવા વિચિત્ર સ્થળ બનાવવાની શી આવશ્યકતા પડી ?

વિ ન ભા

⁂ સંયોગીઅભાવ અવ્યાપ્તિઆપાદક નથી માટે ! : ઉત્તર ⁂

ઉત્તર :- તમારી શંકા વ્યાજબી જ છે. પણ, બીજો કોઈ રસ્તો ન હતો. માટે, તેવું સ્થલ અમારે લેવું પડ્યું. તમે જણાવ્યું તે મુજબ સંયોગિઅભાવ પરિષ્કાર મુજબ લઈ જ શકાશે. પણ, તેનું અધિકરણ પર્વત કેવી રીતે બને ? ઘાસને પરમાણુનો સંયોગ હોય. માટે, પરમાણુસંયોગવાન્ ઘાસનો સંયોગ પર્વત ઉપર મળશે જ. એટલે કે સંયોગસંબંધથી સંયોગી

अत्र 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारे नोक्ताऽव्याप्तिसम्भवः, समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभाववत् संयोगसम्बन्धावच्छिन्न-वह्निसंयोगावच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावस्योक्तलक्षणाऽनुसारेण ग्रहीतुमशक्यत्वात् ।

●

પર્વત ઉપર રહેશે જ. તો પછી તેનો અભાવ કેવી રીતે લઈ શકાય ? સંયોગિઅભાવનું અધિકરણ મળશે ગુણાદિ. તેમાં ધૂમ અવૃત્તિ જ છે. માટે, લક્ષણસમન્વય થઈ જ જશે. પહેલા જેમ સમવાયથી સમવાયિઅભાવ પર્વત ઉપર રહી ન શક્યો તે રીતે સંયોગથી સંયોગિઅભાવ પણ ન જ મળે.

માટે, વહ્નિસંયોગથી વહ્નિસંયોગિઅભાવ લઈને જ અવ્યાપ્તિ આપવી પડશે. ત્યારે વહ્નિસંયોગને જ સાધ્યતાઅવચ્છેદક સંબંધ બનાવવો પડશે.

યાદ રહે ! આ અવ્યાપ્તિ, સંયોગથી વહ્નિત્વસમવાયિને સાધ્ય માનો તો અવ્યાપ્તિ નથી આવતી માટે, દેખાડી છે તેવું નથી. સંયોગથી જ્યારે વહ્નિત્વસમવાયી સાધ્ય છે ત્યારે તો અવ્યાપ્તિ આવે જ છે. છતાં પણ **अधिकं न दोषाय, उपाये सति कर्तव्यं सर्वेषां चित्तरञ्जनम्** ઇત્યાદિ ન્યાયથી જ આ નિરૂપણ કરવામાં આવ્યું છે. કોઈને ભ્રમ ન થાય માટે જ પુનઃ પુનઃ આ ખુલાસો કરવામાં આવે છે.

❁ ધર્મવિધયા અને સંબંધવિધયા પ્રવેશથી આપત્તિ નિવારણ ❁

ચલો ! હવે મૂળ વાત ઉપર આવીએ. આપણી જૂની અવ્યાપ્તિ જ લેવાની છે. મતલબ કે **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલમાં કે જ્યાં સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ, સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય, સંયોગથી વહ્નિસંયોગિઅભાવ લઈને અવ્યાપ્તિ આપી કે જેનો પ્રતિયોગિતાઅવચ્છેદક સંબંધ - સંયોગ, પ્રતિયોગિતાઅવચ્છેદક ધર્મ - વહ્નિસંયોગ + સંયોગ.

આ આપત્તિ "(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક હોય તે અભાવથી વિશિષ્ટમાં અવૃત્તિત્વ = સાધ્યાભાવવદ્અવૃત્તિત્વ" - આવો પરિષ્કાર સ્વીકારવામાં આવે તો જ છે. જે પહેલાં જણાવી જ દીધેલ છે. વચ્ચે વચ્ચે પ્રાસંગિક અનિવાર્ય ઘણી ઘણી બાબતો આવતી હોવાથી ધ્યાનપૂર્વક, ધીરજપૂર્વક, અનુસંધાન રાખવા પૂર્વક આ આખું મેટર

य तथा हि - प्रकृते साध्यतावच्छेदकः धर्मः वह्नित्वसमवायः, साध्यतावच्छेदकश्च सम्बन्धः
शो संयोगः वर्तते । तादृशाऽभावीयप्रतियोगितावच्छेदकः धर्मो वह्निसंयोगः, प्रतियोगितावच्छेदकः
ल सम्बन्धश्च संयोगः । ततश्च तादृशप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः

વાંચવું. ન સમજાય તો પુનઃ પુનઃ વાંચવું. બધી બાબત સ્પષ્ટ છે. કશું જ અસ્પષ્ટ નથી. એક - બે વાર વાંચવાથી બધી બાબતોના જવાબ આમાંથી જ મળી જશે.

આ અવ્યાપ્તિ દૂર કરવા માટે હવે અમે જે ખુલાસો જણાવ્યો હતો તે જ માનવો પડશે. મતલબ કે -

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય અને

(૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મ હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ હોવું જોઈએ.

❄ આ રીતે દૂર થશે અવ્યાપ્તિ ❄

જો આવો પરિષ્કાર કરશો તો વ્યાપ્યવૃત્તિસાધ્યકસ્થલમાં ક્યાંય આપત્તિ નહીં આવે. તે આ રીતે -

વિ સ્થલ હતું - **पर्वतो वह्नित्वसमवायिमान् धूमात्** ।

साध्यताअवच्छेदक संबंध - संयोग.

न साध्यताअवच्छेदक ધર્મ - વહ્નિત્વસમવાય.

भा તમે જે સંયોગથી વહ્નિસંયોગિઅભાવ લીધો તેમાં પ્રતિયોગિતાઅવચ્છેદકધર્મ - વહ્નિસંયોગ + સંયોગ તથા પ્રતિયોગિતાઅવચ્છેદક સંબંધ - સંયોગ.

સ્પષ્ટ જ છે કે - જે પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે તે સાધ્યતાઅવચ્છેદક (સંબંધ છે, પણ) ધર્મ નથી. પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે વહ્નિસંયોગ + સંયોગ. જ્યારે સાધ્યતા-અવચ્છેદક ધર્મ છે વહ્નિત્વસમવાય.

માટે, વહ્નિસંયોગિઅભાવ નહીં લેવાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લઈ શકાશે. તેનું અધિકરણ જલહ્રદ. તેમાં ધૂમ અવૃત્તિ. માટે લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે.

पर्वतः वह्नित्वसमवायिमान् धूमात् આ સ્થલમાં આપણે જ્યારે વહ્નિસંયોગસંબંધથી સાધ્યતા સ્વીકારી ત્યારે

સાધ્યતાઅવચ્છેદક સંબંધ - વહ્નિસંયોગ.

सम्बन्धविधया तदवच्छिन्नत्वस्य सत्त्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नत्वं नास्त्येव, तादृशप्रतियोगितायाः धर्मविधया वह्निसंयोगेनैवाऽवच्छिन्नत्वात्, वह्निसंयोगस्य साध्यतावच्छेदकत्वसम्भवेऽपि सम्बन्धविधयैव सम्भवेत्, धर्मविधया नैव सम्भवेत् । तथा च धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावविधया संयोगसम्बन्धाऽवच्छिन्न-वह्निसंयोगावच्छिन्नप्रतियोगिताकः वह्निसंयोग्यभावः नैव गृह्यते इति कुतः तमादाय अव्याप्तिसम्भवः ?

अत्र संयोगेन वह्नित्वसमवाय्यभावस्यैव धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकत्वात्तमादाय पूर्वोक्तरीत्या लक्षणसमन्वयः सम्भवत्येव ।

तथा च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावम्,

●

साध्यताअवच्छेदक धर्म - वह्नित्वसमवाय.

अभाव लीधेलो - वह्निसंयोगसंबंधथी वह्निसंयोगिअभाव.

प्रतियोगिताअवच्छेदक संबंध - वह्निसंयोग.

प्रतियोगिताअवच्छेदक धर्म - वह्निसंयोग.

स्पष्ट छे के प्रतियोगिताअवच्छेदक संबंध એ જ साध्यताअवच्छेदक संबंध छे. किंतु જે प्रतियोगिताअवच्छेदक धर्म छे એ જ साध्यताअवच्छेदक धर्म नथी. कारण के प्रतियोगिताअवच्छेदक धर्म छे - वह्निसंयोग अने साध्यताअवच्छेदक धर्म छे - वह्नित्वसमवाय.

आ रीते, જે नूतन परिष्कार कर्यो ते मुजब वह्निसंयोगिअभाव नहीं लई शकाय. पण, वह्निसंयोगसंबंधथी वह्नित्वसमवायिअभाव જ लेवो पडशे. तेनुं अधिकरण जलह्रद. धूम तेमां अवृत्ति. लक्षणसमन्वय थई गयो. अव्याप्ति नहीं आवे. आ रीते अन्यत्र सर्वत्र समजी लेवुं.

❀ धर्म-संसर्गोभयविधया प्रवेशपूर्वकनुं लक्षण ❀

टूंकमां, सो टचना सोना जेवुं फलित थयेलुं लक्षण :-

(१) જે अभावीयप्रतियोगिताअवच्छेदक संबंध साध्यताअवच्छेदक संबंध होय अने

(२) જે अभावीयप्रतियोगिताअवच्छेदक धर्म साध्यताअवच्छेदक धर्म होय ते अभावना अधिकरणमां अवृत्तित्व सद्धेतुमां रहेवुं जोईએ.

वह्नित्वसमवायेन वह्नित्वसमवाय्यभावञ्चादाय अव्याप्तिवारणाय अभावीयप्रतियोगितायाः विशेषणविधया सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नत्वस्य प्रवेशनीयत्वेन, संयोगेन वह्निसंयोग्यभावमादाय अव्याप्तिवारणाय धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्नत्वस्य च प्रवेशनीयत्वेन 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नत्वविशिष्टा धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमङ्गीकार्यम् ।

एतावता "(१) 'साध्याभाववदवृत्तित्वम्' - इति लक्षणं नाङ्गीकार्यम्, 'द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावम्, द्रव्यत्व-जलत्वोभयाभावम्, कालिकसम्बन्धावच्छिन्नद्रव्यत्वाभावञ्चादायाऽव्याप्तेः, 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसवृत्तितात्रिशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावम्, समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्न्यभावमादाय चाऽव्याप्तेश्च ।

(२) 'साध्यतावच्छेदकाऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि लक्षणं नाङ्गीकार्यम्, संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादाय, समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय चाऽव्याप्तेः, पूर्वोक्ताऽव्याप्तिप्रसक्तेश्च ।

(३) 'साध्यतावच्छेदकाऽवच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि लक्षणं नाङ्गीकार्यम्,

संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्नि-घटोभयाभावमादाय, समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय चाऽव्याप्तेः, पूर्वोक्ताऽव्याप्तिजालप्रसक्तेश्च ।

(४) 'साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणमपि न सम्यक्,

संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावादिकमादाय 'पर्वतो वह्निमान्' - इत्यत्राऽव्याप्तेः ।

●

⁂ सरळभाषामां २जू करेलुं लक्षण नव्यन्यायनी परिभाषामां ⁂

આ જ લક્ષણને હવે નવ્યન્યાયની પરિભાષામાં ઢાળવાનું છે. આપણે પહેલા જોઈ ગયા તે મુજબ પ્રતિયોગિતા એ પ્રતિયોગિતાઅવચ્છેદકતાની નિરૂપક હોય. (નિરૂપિત પણ હોય.) જે સાધ્યતાઅવચ્છેદકતા સંસર્ગમાં જાય તે સાધ્યતાઅવચ્છેદકતા ધર્મમાં પણ જાય. જે સંસર્ગ સાધ્યતાઅવચ્છેદકતાવિશિષ્ટ બને તે પ્રતિયોગિતાઅવચ્છેદકતાથી વિશિષ્ટ પણ બનવો જોઈએ. આ જ વાત દૃષ્ટાંત ટાંકીને જોઈએ.

(५) 'साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि लक्षणं न स्वीकार्यम्, समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्न्यभावमादाय 'पर्वतो वह्निमान्' - इत्यत्रैव अव्याप्त्यापत्तेः ।

(६) 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणमपि न योग्यम्, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावम्, वह्नित्वसमवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावञ्चादाय अव्याप्तेः ।

(७) 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्माऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि न चारु, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नवह्निसंयोग्यभावमादायाऽव्याप्तेः ।

(८) अत एव 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि लक्षणं नाङ्गीकार्यम्, संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावमादाय 'पर्वतो वह्निमान् धूमाद्' - इत्यत्राऽव्याप्तेश्च ।

(९) 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यपि लक्षणं न चारुतरम्, 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तेः ।

(१०) 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतसम्बन्धाऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्यपि अग्राह्यम्, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावं वह्नित्वसमवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावं चादायाऽव्याप्तेः ।

ततश्च नैतेषु एकमपि लक्षणं ग्राह्यम्, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावं वह्नित्वसमवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावञ्चादाय यद्वा संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावमादायाऽव्याप्तेरवश्यम्भावात् ।

अतः 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्ति-

त्वाभावः' इति एवमेव लक्षणं ग्राह्यम्, तथा सति कुत्रापि अव्याप्तेरसम्भवा*दि"ति फलितम्* ।

ननु 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम्, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावमादायाऽव्याप्तेरसम्भवात्, संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावस्य पर्वतेऽसत्त्वात् ।

तथा हि - संयोगेन वह्निसंयोग्यभावः पर्वते तदैव भवेत्, यदा वह्निसंयोगिसामान्यस्य तत्र असत्त्वं स्यात् । किन्तु एवं नास्ति । वह्निसंयोगः यथा पर्वते वर्तते तथा स्वस्मिन् अपि वर्तते एव, संयोगस्य द्विष्ठत्वेन पर्वत-वह्न्युभयत्र सत्त्वात् । ततः वह्निसंयोगी वह्निरपि भवति एव, स च संयोगेन वृत्तिरेव पर्वते । ततः कुतः पर्वते संयोगेन वह्निसंयोग्यभावः प्राप्येत ? किञ्च, वह्निना समं संयुक्तमन्यत् तृणोपलादिकमपि सम्भवति, तत्सर्वमपि वह्निसंयोगि एव, तच्च पर्वते संयोगेन वृत्तिरिति कथं पर्वते संयोगेन वह्निसंयोग्यभावः लभ्यते ? ततश्च संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्निसंयोग्यभावस्य सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतवह्निसंयोगधर्मावच्छिन्नप्रतियोगितानिरूपकत्वेऽपि तदधिकरणतया गुणादेरेव ग्राह्यतया तत्र च धूमादेः अवृत्तित्वेन धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धलेशोऽपि ? ***इति चेद् ?***

नः वृत्तिनियामकवह्निसंयोगस्य अनुयोगितासम्बन्धेन यदधिकरणं तस्य संयोगेनाऽभावविवक्षणे दोषाभावात् । अयमाशयः - तृणादिना समं वह्नेः यः संयोगः सः नास्ति वृत्तिनियामकः किन्तु वृत्त्यनियामकः एव, यथा अङ्गलीद्वयसंयोगः वृत्त्यनियामकः भवति तथा अयमपि सम्बन्धः । पर्वतेन समं यः वह्नेः संयोगः सः वृत्तिनियामकः । तथा च वृत्तिनियामकवह्निसंयोगविशिष्टाः न सन्त्येव तृणादयः, किन्तु वह्निः पर्वतश्चैव । तत्रापि वह्निसंयोगस्य प्रतियोगित्वं वह्नौ अनुयोगित्वञ्च पर्वते, यतः वह्नेः संयोगेन पर्वते सत्त्वेन तादृशसंयोगस्य वह्निप्रतियोगिकत्वात् पर्वतानुयोगिकत्वाच्च । ततश्च वृत्तिनियामकवह्निसंयोगस्य स्वनिरूपितप्रतियोगित्वसम्बन्धेन अधिकरणं वह्निः, स्वनिरूपिताऽनुयोगितासम्बन्धेन तु अधिकरणं पर्वतः, प्रकृते तादृशवह्निसंयोगस्य

अनुयोगितासम्बन्धेनैव अधिकरणं विवक्षितम् । ततश्च पर्वतः एव लभ्यते । एवञ्च यानि यानि वह्नेरधिकरणानि तान्येव तादृशवृत्तिनियामकवह्निसंयोगस्य अनुयोगितासम्बन्धेन अधिकरणानि भवन्ति, वह्नेश्च अधिकरणानि पर्वतः, महानसम्... इत्यादयः एव । न तेषु एकमपि अधिकरणं संयोगसम्बन्धेन पर्वते वर्तते इति पर्वते वृत्तिनियामकवह्निसंयोगस्य अनुयोगितासम्बन्धेन यदधिकरणं तस्य संयोगेन अभावः एव । तथा च प्रकृते अनुयोगितासम्बन्धेन वृत्तिनियामकवह्निसंयोगविशिष्टस्य संयोगेन अभावः एव विवक्षितः, अत्र वृत्तिनियामकवह्निसंयोगतः शुद्धसंयोगः अभिन्नः एव, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायात् ।

अतः यदा 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदक-धर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमङ्गीक्रियते तदा उक्ताऽभावः गृह्यते एव, साध्यतावच्छेदकः सम्बन्धविधया यः संयोगः सम्बन्धविधया तादृशाऽभावीय-प्रतियोगितायाः तेनाऽवच्छिन्नत्वात्, वृत्तिनियामकवह्निसंयोगस्य शुद्धसंयोगाऽनतिरेकेण साध्यतावच्छे-दकीभूतवृत्तिनियामकवह्निसंयोगावच्छिन्नत्वाच्च । तथा च सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकाऽभावविधया वृत्तिनियामक-वह्निसंयोगविशिष्टाभावः गृह्यते, तदधिकरणं पर्वतः, तत्र धूमः वृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकाऽभावा-धिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवति एव अव्याप्तिः ।

यदि सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्ति-त्वाभावस्य लक्षणत्वमूररीक्रियते तदा नोक्ताऽऽपत्तिः, वृत्तिनियामकवह्निसंयोगविशिष्टाभावस्य ग्रहीतुमशक्यत्वात् । तथा हि - वृत्तिनियामकवह्निसंयोगविशिष्टाऽभावीयप्रतियोगिता सम्बन्धविधया यः साध्यताऽवच्छेदकः संयोगः तेन सम्बन्धविधया अवच्छिन्ना, किन्तु धर्मविधया यः साध्यता-वच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्ना नास्त्येव, प्रकृते यदभावीयप्रतियोगिता सम्बन्ध-विधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च सः एव अभावः गृह्यते । वृत्तिनियामकवह्निसंयोगविशिष्टाभावीय-प्रतियोगितायाः तादृशत्वविरहान्न तद्ग्रहणं शक्यमिति संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया

तदवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नत्वात् । तादृशवह्नित्वसमवाय्यभावाधिकरणं जलह्रदादि, न तु पर्वतः, पूर्वोक्तयुक्त्या वह्नित्वसमवायिनः पर्वते संयोगेन सत्त्वात् । तथा च धूमः तादृशाऽधिकरणे अवृत्तिरेवेति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिः ?

तथा च सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य वा लक्षणत्वाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादिति सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव लक्षणत्वमङ्गीकार्यम्, उक्ताऽव्याप्तिविरहादिति स्थितम् ।

य शो ल ता

ननु भवतां ***यदि*** इदमेवाऽभिप्रेतं स्याद् यदुत - 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य', 'सम्बन्धविधया यः साध्यताऽवच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य' वा लक्षणत्वाङ्गीकारे अव्याप्तिः भवति, अतः तादृशलक्षणं नैवाङ्गीकार्यम्, किन्तु 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमङ्गीकार्यम्, ***तर्हि*** एतत्सिद्ध्यर्थं 'पर्वतः वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगस्य अनुयोगितासम्बन्धेन यदधिकरणं तस्य संयोगेन यः अभावः तमादायाऽव्याप्तिः किमर्थं दीयते ? किमर्थमेवं गुरुतरपथाश्रयणं क्रियते ? संयोगेन संयोग्यभावमादायैव सर्वसामञ्जस्ये तादृशाभावग्रहणस्याऽनुचितत्वात् ।

सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य वा लक्षणत्वाङ्गीकारे

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन संयोग्यभावमादायाऽव्याप्तिः भवत्येव, संयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्नत्वेन प्रथमलक्षणाऽनुसारेण तादृशप्रतियोगितानिरूपकसंयोग्यभावस्य ग्राह्यत्वात्, द्वितीयलक्षणाऽनुसारेणाऽपि संयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनावच्छिन्नत्वेन तादृशप्रतियोगिताऽवच्छेदकसंयोगधर्मस्यापि साध्यतावच्छेदकतया साध्यतावच्छेदकीभूतसंयोगधर्मावच्छिन्नत्वस्याऽपि तादृशप्रतियोगितायां सत्त्वेन च तादृशप्रतियोगितानिरूपकाऽभावस्य ग्राह्यत्वात् ।

पर्वते वह्निसंयोगिनः अभावोऽस्ति एवेति संयोग्यभावोऽपि कथ्यते एव, तादृशाऽभावाधिकरणपर्वते धूमस्य वृत्तित्वेन धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण च लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः ।

यदा च सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य लक्षणत्वमुररीक्रियते ***तदा*** संयोग्यभावस्य ग्रहीतुमशक्यत्वेन नाऽव्याप्तिः, संयोगेन संयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नत्वाभावेन सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावविधया न हि संयोग्यभावः ग्रहीतुं शक्यते । किन्तु संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, पूर्वोक्तयुक्त्या तादृशाभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनाऽवच्छिन्नत्वात्, धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनाऽवच्छिन्नत्वाच्च । तादृशाऽभावाधिकरणं न पर्वतः किन्तु जलह्रदादिकमेव, तत्र धूमोऽवृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात्कुतोऽव्याप्तिः ?

तथा च सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य लक्षणत्वाऽनभ्युपगमे 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य', 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य' वा लक्षणत्वाऽभ्युपगमे 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र संयोगेन संयोग्यभावमादाय अव्याप्तेः उक्तलक्षणमेवाङ्गीकार्यमिति स्थितम् ।

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र एव संयोगेन संयोग्यभावमादाय एव अभिप्रेतसिद्धेः किमर्थं संयोगेन वृत्तिनियामकवह्निसंयोग्यभावपर्यन्तमनुधावनं क्रियते ? ***इति चेद् ?***

भोः देवानांप्रिय ! किमर्थं पूर्वोक्तं पुनः पुनः विस्मरसि ? किं संयोग्यभावः पर्वते वर्तते न वा ? इति तु विमृश, न हि पर्वते संयोगेन संयोग्यभावः वर्तते, आकाशादिसंयोगिनः तृणादेः तत्र संयोगेन सत्त्वादिति सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगिताकाऽभावविधया, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावविधया च संयोगेन संयोग्यभावस्य ग्रहणेऽपि तदधिकरणविधया गुणादेरेव ग्राह्यत्वात्तत्र च धूमस्य असत्त्वाद् धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगिताकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावस्यैव, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव च सत्त्वेन लक्षणसमन्वयात् कथं 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणाङ्गीकारे 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा लक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र संयोग्यभावमादायाऽव्याप्तिः स्यात्, येन एतल्लक्षणं त्यक्त्वा 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीकरणीयं स्यादिति ।

य शो ल ता

तथा च 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायैवाऽव्याप्तिः दर्शनीया उक्तलक्षणद्विके, न तु संयोग्यभावः ग्राह्यः, तद्ग्रहणेऽव्याप्त्यभावादिति ।

अथ अत्राऽपि कश्चिदुच्छृङ्खलः शङ्केत - "ननु 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमस्माभिः अङ्गीक्रियते तथापि न काचिदव्याप्तिः भवेत् । भवता 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः उपदर्शिता, सा च नैव सम्भवति, वृत्तिनियामकवह्निसंयोग्यभावग्रहणस्यैवाऽशक्यत्वात् । तथा हि - अस्माभिः 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायः नैवाङ्गीक्रियते, तथा च वृत्तिनियामकवह्निसंयोगः शुद्धसंयोगश्च न अभिन्नौ किन्तु भिन्नौ एव । तथा च साध्यतावच्छेदकसम्बन्धस्य शुद्धसंयोगरूपत्वेन संयोगेन वह्निसंयोग्यभावीयप्रतियोगितावच्छेदकसम्बन्धस्य संयोगस्य साध्यतावच्छेदकत्वसम्भवेऽपि तादृशाभावीयप्रतियोगिताऽवच्छेदकीभूतधर्मस्य वृत्तिनियामकवह्निसंयोगस्य साध्यताऽवच्छेदकत्वं नैव सम्भवति, संयोगस्य वह्नित्वसमवायस्य चैव साध्यतावच्छेदकत्वात्, एतदतिरिक्तस्य वृत्तिनियामकवह्निसंयोगस्य साध्यतानवच्छेदकत्वात् ।

ततश्च वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेन अवच्छिन्नत्वेऽपि साध्यतावच्छेदकीभूतधर्मेणाऽनवच्छिन्नत्वम् एव, तादृशप्रतियोगितावच्छेदकीभूतवृत्तिनियामकवह्निसंयोगस्य साध्यताऽनवच्छेदकत्वात्, शुद्धसंयोगात्तादृशविशिष्टसंयोगस्य भिन्नत्वादेव । तथा च - सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यताऽवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावविधया संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः नैव गृह्यते, किन्तु संयोगेन वह्नित्वसमवाय्यभावः एव गृह्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनाऽवच्छिन्नत्वात्, साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्मावच्छिन्नत्वाच्च । तादृशाऽभावाधिकरणं जलह्रदादिकं तत्र च धूमः अवृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतोऽव्याप्तिः ? कुतः तद्वारणार्थं 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधि-

करणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकरणीयम्" ***इति ।***

एतदसत्, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायस्य सर्ववादिसिद्धस्याऽपलपितुमशक्यत्वात् । अस्तु वा 'तुष्यतु दुर्जनः' इतिन्यायेन भवदभिमतं यदुत शुद्धसंयोगः वृत्तिनियामकवह्निसंयोगात् पृथगेवेति, तथापि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्राऽव्याप्तिः स्यादेव । तथाहि - 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र न केवलं शुद्धसंयोगेन साध्यता अभिप्रेता, किन्तु वृत्तिनियामकवह्निसंयोगेनैव, वह्नित्वसमवायी वह्निः पर्वते येन संयोगेन वर्तते सः संयोगः वृत्तिनियामकः एवास्ति वह्निप्रतियोगिकश्च । ततः यत्र यत्र धूमः तत्र तत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायी स्यादेवेति व्याप्तिः अनाविला ।

एवञ्च प्रकृते साध्यम् - वह्नित्वसमवायी ।

साध्यतावच्छेदकधर्मः - वह्नित्वसमवायः ।

साध्यतावच्छेदकसम्बन्धः - वृत्तिनियामकवह्निसंयोगः ।

अत्र अभावः गृह्यते वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावः । पर्वते शुद्धसंयोगेनाऽपि यदि वृत्तिनियामकवह्निसंयोगी नास्ति तर्हि वृत्तिनियामकवह्निसंयोगेन तु सुतरां नैव स्यात् । अतः पर्वते वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावः प्राप्यते ।

एतादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

प्रतियोगितावच्छेदकधर्मः - वृत्तिनियामकवह्निसंयोगः ।

प्रतियोगितावच्छेदकसम्बन्धः - वृत्तिनियामकवह्निसंयोगः ।

न च वृत्तिनियामकवह्निसंयोगसम्बन्धेन वृत्तिनियामकवह्निसंयोगिनः पर्वतादेः किं कुत्रापि वृत्तिः प्रसिद्धा ? येन तदभावः तेन सम्बन्धेन पर्वते उच्यते ? वृत्तिनियामकवह्निसंयोग्यपेक्षया वृत्तिनियामकवह्निसंयोगस्य व्यधिकरणसम्बन्धत्वेन वृत्तिनियामकवह्निसंयोगेन वह्निसंयोगिनः कुत्रचिदपि वृत्तेः असम्भवेन तत्सम्बन्धेन तदभावः नैव वक्तुं शक्यते, व्यधिकरणसम्बन्धावच्छिन्न-प्रतियोगिताकाऽभावे मानाभाव***दिति वाच्यम्;***

'संयोग-समवायोभयसम्बन्धेन पर्वते वह्निः नास्ति' इति प्रतीतेः प्रमाणत्वात् । अग्रेऽपि संयोग-समवायोभयसम्बन्धेन वह्नेरभावः ग्रहीष्यते एव । किं संयोग-समवायोभयसम्बन्धेन वह्नेः वृत्तिता प्रसिद्धा ? नैव, न हि वह्निरेकत्रैव उभयसम्बन्धेन वर्तते तथापि यथा तादृशाऽभावः

य शो ल ता

आनुभाविकः अत एव अनपलपनीयः तथैव वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्य-भावकल्पने किमर्थं मुखं वक्रीभवति ?

न च संयोगेन समवायेन च वह्नेः वृत्तिता प्रसिद्धा इति संयोग-समवायोभयसम्बन्धेन वह्न्यभावः स्वीक्रियते ***इति वाच्यम्;***

तथा सति वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावोऽपि ग्राह्यः एव, वृत्तिनियामकसंयोगेन एव पर्वतस्य वृत्तिनियामकवह्निसंयोगिनः भूतलादौ वृत्तित्वात्, वृत्त्यनियामकवह्निसंयोगादिसम्बन्धेन च वृत्तिनियामकवह्निसंयोगिनः पर्वतस्य वह्नौ वृत्तेः, संयोगस्य द्विष्ठत्वेन अनुयोगिनि पर्वतेऽपि तस्य सत्त्वेन तेन सम्बन्धेन तस्य वह्नौ वृत्तेरनाविलत्वादित्येवं खण्डशः ताभ्यां सम्बन्धाभ्यां वृत्तिप्रसिद्ध्या वृत्तिनियामकवह्निसंयोगिनः वृत्तिनियामकवह्निसंयोगेन अभावाङ्गीकारे बाधकाभावात् ।

तथा च वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावाङ्गीकारे नास्ति बाधकमिति स्थितम् । एतादृशाऽभावः सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नसाध्यता-वच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावविधया गृह्यते एव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः तेन सम्बन्धविधया अवच्छिन्नत्वात्, धर्मविधया तादृशप्रतियोगिताऽवच्छेदकस्य वृत्तिनियामकवह्निसंयोगस्य साध्यतावच्छेदकत्वेन साध्यता-वच्छेदकीभूतवृत्तिनियामकवह्निसंयोगधर्मावच्छिन्नत्वात् । एतादृशाऽभावस्याधिकरणं पर्वतः, तत्र धूमः वृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यता-वच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य विरहेण लक्षणाऽ-समन्वयाद् भवत्येव अव्याप्तिः ।

य शो ल ता

एतदव्याप्त्यपाकरणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिक-रणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीकार्यम्, तथा सति नोक्ताऽव्याप्तिः, वृत्तिनियामक-वह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य प्रकृते ग्रहीतुमशक्यत्वात् । वृत्तिनियामकवह्नि-संयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तदवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तदवच्छिन्नत्वाभावात्, प्रकृते यदभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः

सम्बन्धविधया तदवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्नत्वम्, तदभावग्रहणस्यैव शक्यत्वान्न वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावः ग्रहीतुं शक्यते, किन्तु वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशवह्नित्वसमवाय्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तेनैवावच्छिन्नत्वात्, धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनैवावच्छिन्नत्वाच्च ।

पर्वते वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायी वह्निरस्ति इति न तत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवाय्यभावः लभ्यते किन्तु जलह्रदादौ एव, तत्र संयोगमात्रेण वह्नेरसत्त्वेन वृत्तिनियामकवह्निसंयोगेन सुतरामसत्त्वात् । तत्र च धूमोऽवृत्तिरेवेति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धलेशोऽपि ?

य शो ल ता

तथा च 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपेयते तदा 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायिनः वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिप्रसक्तेः नैव तल्लक्षणमभ्युपेयम् । किन्तु 'सम्बन्धविधया यः साध्यताऽवच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यताऽवच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणम् अभ्युपेयम् अव्याप्तिवारणाय इति स्थितम् । तथा च 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायानभ्युपगमेऽपि उच्छृङ्खलैः 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिभिया 'साध्यतावच्छेदकः यः सम्बन्धविधया, सम्बन्धविधया तदवच्छिन्नप्रतियोगिताकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः' इतिलक्षणं 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्न-साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इति वा लक्षणमभ्युपेतुं न शक्यते, किन्तु 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यता-

वच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपगन्तव्यम्, ततः 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायाभ्युपगमे तु का कथा ?

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः न सम्भवतीति अतः अत्र 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यत्वमभ्युपगम्य वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिरुपदर्शिता - इति नैव बोध्यम्, किन्तु 'तुष्यतु दुर्जनः' इतिन्यायेन उच्छृङ्खलोपदर्शितसिद्धान्तमभ्युपगम्य एव 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यत्वमभ्युपगम्य वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिरुपदर्शिता, 'उपाये सति कर्तव्यं सर्वेषां चित्तरञ्जनम्' इतिन्यायात् ।

वस्तुतः 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायस्याऽवश्यमभ्युपेयतया 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायामपि संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिरस्ति एव, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि अव्याप्तिरस्ति इति ध्येयम् ।

य शो ल ता

एतावता 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपेय***मिति फलितम् ।***

ननु 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमङ्गीक्रियताम्, अनेनाऽपि पूर्वोक्तनिखिलाऽभाववारणसम्भवात् । अनेनैव सामञ्जस्ये उभयत्र 'सम्बन्धविधया', 'धर्मविधया' - इत्येवं प्रवेशमादृत्य 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं गुरुतरलक्षणं किमर्थमङ्गीक्रियते ?

'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारे न कुत्रापि व्याप्यवृत्तिसाध्यकस्थले अव्याप्तिः स्यात्, स्याच्च अव्याप्यवृत्तिसाध्यकस्थले इति । तथा हि -

(१) 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसवृत्तितात्रिशिष्टवह्न्यभावमादाय नाऽव्याप्तिः सम्भवति, सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेन तादृशाऽभावीयप्रतियोगितायाः अवच्छिन्नत्वेऽपि धर्मविधया यत् साध्यतावच्छेदकं वह्नित्वम् तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीय-प्रतियोगितायाः महानसीयवृत्तितात्रिशिष्टवह्नित्वेनैवाऽवच्छेदात्तादृशमहानसवृत्तितात्रिशिष्टवह्न्य-भावस्याऽग्राह्यत्वात् ।

(२) एवमेव 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्नघटाभावमादायाऽपि नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्नत्वेऽपि धर्मविधया यत् साध्यतावच्छेदकं वह्नित्वं तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीय-प्रतियोगितायाः घटत्वेनैवाऽवच्छिन्नत्वात्तादृशघटाभावस्याऽग्राह्यत्वात् ।

(३) एवमेव 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैव न वह्नि-घटोभयाभावमादाय, वह्नि -जलोभयाभावमादाय वा अव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेन अवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः वह्नि-घटोभयत्वेनैव, वह्नि-जलोभयत्वेनैव वा अवच्छिन्नत्वात्तादृशवह्नि-घटोभयाभावस्य वह्नि-जलोभयाभावस्य वा अग्राह्यत्वात् ।

(४) एवमेव 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र न समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्न्य-भावमादायाऽपि अव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यताव-च्छेदकः वह्नित्वधर्मः तेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽनव-च्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः समवायसम्बन्धेनैव अवच्छिन्नत्वात्तादृशसमवायसम्बन्धाव-च्छिन्नप्रतियोगिताकवह्न्यभावस्याऽग्राह्यत्वात् ।

अतः 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताक-वह्न्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यताऽवच्छेदकः संयोगः तेन अवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तेनाऽपि अवच्छिन्न-

त्वात् । तादृशवह्न्यभावाधिकरणं जलह्रदः एव, धूमः तत्राऽवृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावसत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिः सम्भवति ?

(५) एवञ्च 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय न अव्याप्तिसम्भवः, जलत्वविशिष्टद्रव्यत्वाभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेन अवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः द्रव्यत्वत्वधर्मः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः जलत्वविशिष्टद्रव्यत्वत्वेनैवाऽवच्छेदात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

(६) एवमेव 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः द्रव्यत्वत्वधर्मः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः जलत्व-द्रव्यत्वोभयत्वेनैवावच्छिन्नत्वात्तादृशजलत्व-द्रव्यत्वोभयाभावस्य अग्राह्यत्वात् ।

(७) एवमेव 'घटः द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय न अव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः कालिकसम्बन्धेनैवाऽवच्छिन्नत्वात्तादृशकालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावस्याऽग्राह्यत्वात् ।

अतः 'घटः द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र समवायसम्बन्धाऽवच्छिन्न-द्रव्यत्वत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्नत्वे सति धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तेनापि अवच्छिन्नत्वात् । तादृशाभावाधिकरणं गुणादिकमेव, न तु घट-पटादिकम्, तत्र समवायेन द्रव्यत्वस्य सत्त्वात् । गुणादौ च नास्त्येव पृथ्वीत्वमिति पृथ्वीत्वे सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्ना, धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धलेशोऽपि ?

(८) एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादाय अव्याप्तिः नैव सम्भवति, समवायेन वह्नित्वसमवाय्यभावीयप्रतियोगितायाः

धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः समवायेनैवाऽवच्छिन्नत्वात् तादृशसमवायसम्बन्धावच्छिन्न-वह्नित्वसमवायाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावस्याऽग्राह्यत्वात् ।

इदमत्र तत्त्वम् - भवता एवमुक्तं यदुत 'धर्मविधया यः साध्यतावच्छेदकः भवति, सः प्रतियोगितायाः अवच्छेदकः अपि धर्मविधया एव भवेत्, यः सम्बन्धविधया साध्यतावच्छेदकः सः प्रतियोगितायाः अपि सम्बन्धविधयैवाऽवच्छेदकः भवेत्...' इति । भवतैवं नियन्त्रणं कृतम्, किन्तु उक्तस्थलीयाऽव्याप्तिवारणाय नैतादृशनियन्त्रणा आवश्यकी, यतः तत्र समवायेन वह्नित्वसमवायविशिष्टाभावः गृहीतः, तस्य प्रतियोगितावच्छेदकस्य धर्मस्य सम्बन्धस्य च साध्यतावच्छेदकत्वेऽपि साध्यतावच्छेदकस्य धर्मस्य सम्बन्धस्य च - उभयस्य न प्रतियोगिताऽवच्छेदकत्वं किन्तु धर्मस्यैव । तथा च तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य धर्मस्य वह्नित्वसमवायस्य सम्बन्धस्य च समवायस्य धर्मविधया एव साध्यताऽवच्छेदकत्वम् । समवाय-वह्नित्वसमवायोभयेनाऽप्यवच्छिन्ना हि साध्यता, किन्तु प्रतियोगिता साध्यतावच्छेदकीभूतसमवायधर्मेणैवाऽवच्छिन्ना, न तु साध्यतावच्छेदकीभूतसंयोगसम्बन्धेनाऽपि इति यदि एवं निवेश्यते यदुत सम्बन्धविधया यः साध्यतावच्छेदकः धर्मविधया च यः साध्यतावच्छेदकः तदुभयेनाऽपि अवच्छिन्ना या प्रतियोगिता तन्निरूपकाऽभावः एव ग्राह्यः तदा समवायसम्बन्धावच्छिन्न-वह्नित्वसमवायावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावः नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतेन धर्मेण वह्नित्वसमवायलक्षणेन अवच्छिन्नत्वेऽपि सम्बन्धविधया साध्यतावच्छेदकेन संयोगेन अनवच्छिन्नत्वात् । एवञ्च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लघुलक्षणाङ्गीकारेऽपि 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्न-वह्नित्वसमवायाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावस्य, अत एव तदापादिताऽव्याप्तेश्च वारणसम्भवे किमर्थम् उभयत्र 'धर्मविधया' 'सम्बन्धविधया' च इत्येवं निवेश्य 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमङ्गीकार्यम् ? लघुभूतपथा कार्यसिद्धौ गुरुतरपथाश्रयणस्याऽनुचितत्वात् ।

य शो ल ता

(९) एवमेव 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायसम्बन्धावच्छिन्न-वह्नित्वसमवायधर्मावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावमादायाऽपि नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः वह्नित्वसमवायेनैवाऽवच्छिन्नत्वात्तादृशवह्नित्वसमवायसम्बन्धावच्छिन्न-वह्नित्वसमवायाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावस्याऽग्राह्यत्वात् ।

(१०) एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽनवच्छिन्नत्वात्, वृत्तिनियामकवह्निसंयोगेन एव तादृशाऽभावीयप्रतियोगितायाः अवच्छिन्नत्वात्तादृशसंयोगसम्बन्धावच्छिन्न-वृत्तिनियामकवह्निसंयोगावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावस्याऽग्राह्यत्वात् ।

अत्रापि - संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितावच्छेदकीभूतेन संयोगेन वृत्तिनियामकवह्निसंयोगेन च उभयेनाऽपि साध्यतायाः अवच्छिन्नत्वेऽपि साध्यताऽवच्छेदकीभूतेन धर्मेण वह्नित्वसमवायलक्षणेन सम्बन्धेन च संयोगलक्षणेन - उभयेन तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन यदि 'साध्यतावच्छेदकीभूतधर्मेणाऽपि साध्यतावच्छेदकीभूतसम्बन्धेनाऽपि च = धर्मविधया यः साध्यतावच्छेदकः तेनाऽपि सम्बन्धविधया यः साध्यतावच्छेदकः तेनापि च अवच्छिन्ना या प्रतियोगिता तन्निरूपकाभावः एव साध्याभावपदेन ग्राह्यः' - इत्येवं विवक्ष्यते तदापि तादृशाऽभाववारणं सम्भवति एवेति 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारेणैव संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावस्य, तदापादिताऽव्याप्तेश्च वारणसम्भवाद् व्यर्थमेव 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणाङ्गीकरणमिति भावः ।

अतः 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वसमवायावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽपि अवच्छिन्नत्वात् । तादृशाऽभावाधिकरणं च जलह्रदादिकमेव, न तु पर्वतः, वह्नित्वसमवायिनः वह्नेः संयोगेन पर्वते वृत्तित्वात् । तत्र च धूमोऽवृत्तिरेवेति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावसत्त्वेन लक्षणसमन्वयात्कुतः अव्याप्तिगन्धलेशोऽपि ?

(११) एवमेव 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगसम्बन्धावच्छिन्न-वृत्तिनियामकवह्निसंयोगावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः तेनाऽवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगेनैवाऽवच्छिन्नत्वात्तादृशवृत्तिनियामकवह्निसंयोगसम्बन्धावच्छिन्न-वृत्तिनियामकवह्निसंयोगावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावस्याऽग्राह्यत्वात् ।

अत्र वृत्तिनियामकवह्निसंयोगसम्बन्धावच्छिन्न-वह्नित्वसमवायावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभाव एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः तेनाऽवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽवच्छिन्नत्वात् । तादृशाऽभावाधिकरणं जलह्रदादयः, न तु पर्वतः, तत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः सत्त्वात् । जलह्रदे च धूमोऽवृत्तिरेवेति धूमे सम्बन्धविधया यः साध्यताऽवच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्यैव सत्त्वेन लक्षणसमन्वयादव्याप्त्याशङ्काऽपि न ।

एवञ्च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणाङ्गीकारे व्याप्यवृत्तिसाध्यकस्थले न कुत्राप्यव्याप्तिः, पूर्वोक्तनिखिलाऽभाववारणात् । तथा च किमर्थं

'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम् ?

किञ्च, सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इतिलक्षणाङ्गीकारेऽपि अव्याप्यवृत्तिसाध्यकस्थले भवत्येव अव्याप्तिः, यतः 'कपिसंयोगी, एतद्वृक्षत्वाद्' - इत्येतत्स्थले शाखाऽवच्छेदेन कपिसंयोगसत्त्वेऽपि मूलावच्छेदेन कपिसंयोगाभावः एकस्मिन्नेव वृक्षे वर्तते । मूलाऽवच्छेदेन वर्तमानः कपिसंयोगाभावः समवायसम्बन्धावच्छिन्न-कपिसंयोगावच्छिन्न-प्रतियोगिताकः, मूलाऽवच्छेदेन वृक्षे एकस्याऽपि कपिसंयोगस्य समवायेनाऽवर्तमानत्वात् ।

तथा चोक्तस्थले साध्यतावच्छेदकधर्मस्य कपिसंयोगस्य साध्यतावच्छेदकसम्बन्धस्य समवायस्य च उभयस्य कपिसंयोग्यभावीयप्रतियोगितायाः अवच्छेदकत्वेन सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः कपिसंयोगः तेनाऽवच्छिन्नत्वात्तादृश-प्रतियोगितायाः उक्तस्थले समवायेन कपिसंयोग्यभावः गृह्यते एव, तदधिकरणं वृक्षः, तत्र एतद्वृक्षत्वं वृत्ति इति एतद्वृक्षत्वे सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य विरहेण लक्षणाऽसमन्वयादव्याप्तिः भवत्येव, सा च द्वितीयलक्षणाङ्गीकारेणाऽपनेया इति व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिविरहादेव अव्याप्यवृत्तिसाध्यकस्थलीयाऽव्याप्तिमाशङ्क्य द्वितीयलक्षणमुत्थापितं **तत्त्वचिन्तामणिकृता** । अतः **दीधितिकृदुक्तिः** न केवलं साध्याभाववद-वृत्तित्वमिति लक्षणमभिप्रेत्य, किन्तु सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्ति-त्वाभावलक्षणमभिप्रेत्य ।

इत्थं च 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारेणैव सर्वसामञ्जस्ये 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिक-रणनिरूपितवृत्तित्वाभावः' - इत्येवं गुरुभूतं लक्षणं किमर्थमनुसृतम् ? ***इति चेद् ?***

मैवं वोचः; 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगिनः समवायेनाऽभावमादायाऽव्याप्तिप्रसक्तेः ।

तथा हि - 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेनैव साध्यता अभिप्रेता इति प्रकृते -

साध्यम् - वह्नित्वसमवायी ।

साध्यतावच्छेदकः धर्मः - वह्नित्वसमवायः ।

साध्यतावच्छेदकः सम्बन्धः - संयोगः ।

'विशिष्टं शुद्धान्नातिरिच्यते' - इतिन्यायेन वह्नित्वसमवायस्य साध्यतावच्छेदकधर्मत्वे ततोऽनतिरिक्तशुद्धसमवायस्याऽपि साध्यतावच्छेदकत्वं स्यादेव ।

य शो ल ता

पर्वते संयोगविशिष्टाः तृणादयः संयोगेन वर्तन्ते किन्तु समवायेन न कोऽपि, रूपादयः ये समवायेन पर्वते वर्तन्ते, ते न सन्ति संयोगविशिष्टाः, रूपादिगुण-क्रिया-सामान्येषु संयोगगुणाऽयोगादिति नैयायिकराद्धान्तात् । तथा च पर्वते ये समवायेन वर्तन्ते ते न संयोगविशिष्टाः, ये च संयोगविशिष्टाः ते न समवायेन पर्वते वर्तन्ते । संयोगविशिष्टानि द्रव्याण्येव भवन्ति, अन्यत्र गुणाऽयोगात्, पर्वते च न हि किमपि द्रव्यं समवायेन वर्तते इति समवायसम्बन्धेन संयोग्यभावः पर्वते लभ्यते ।

तादृशाऽभावीयप्रतियोगी - संयोगी ।

प्रतियोगितावच्छेदकः धर्मः - संयोगः ।

प्रतियोगितावच्छेदकः सम्बन्धः - समवायः ।

अत्र प्रतियोगितावच्छेदकधर्मस्याऽपि, प्रतियोगिताऽवच्छेदकसम्बन्धस्याऽपि च साध्यतावच्छेदकत्वम् । नवरं धर्मविधया यः प्रतियोगितावच्छेदकः संयोगः वर्तते सः सम्बन्धविधया साध्यतावच्छेदकः वर्तते यश्च सम्बन्धविधया प्रतियोगितावच्छेदकः समवायः सः धर्मविधया साध्यतावच्छेदकः अस्ति ।

भवदभ्युपगतलक्षणाऽनुसारेण तादृशसमवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावः गृह्यते एव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः

तेनाऽवच्छिन्नत्वे सति धर्मविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्नत्वात् । यः सम्बन्धविधया साध्यतावच्छेदकः यश्च धर्मविधया साध्यतावच्छेदकः तेनोभयेन यदभावीयप्रतियोगिता अवच्छिन्ना भवेत् सः अभावः ग्राह्यः स्यादेव भवल्लक्षणाऽनुसारेण । धर्मविधया यः साध्यतावच्छेदकः भवेत् सः धर्मविधया एव प्रतियोगितायाः अवच्छेदकः यदि स्यात्, यश्च सम्बन्धविधया साध्यतावच्छेदकः स्यात् सः यदि सम्बन्धविधया एव प्रतियोगितायाः अवच्छेदकः स्यात् तदैव तादृशप्रतियोगितानिरूपकः अभावः ग्राह्यः - इत्येवं नियन्त्रणा भवता नैवाऽभ्युपगताऽस्ति । धर्मविधया यः साध्यतावच्छेदकः सम्बन्धविधया च यः साध्यतावच्छेदकः तेनोभयेनाऽपि येन केनाऽपि रूपेण प्रतियोगिता यदि अवच्छिन्ना भवेत्तदा तादृशप्रतियोगितानिरूपकः अभावः भवल्लक्षणाऽनुसारेण ग्राह्यः एव ।

प्रकृते समवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावीयप्रतियोगिता धर्मविधया यः साध्यतावच्छेदकः समवायः सम्बन्धविधया च यः साध्यतावच्छेदकः संयोगः तेनोभयेनाऽवच्छिन्ना, तादृशसंयोग्यभावीयप्रतियोगितावच्छेदकीभूतसंयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वात्, तादृशप्रतियोगितावच्छेदकीभूतसमवायस्य च धर्मविधया साध्यतावच्छेदकत्वात् । अतः तादृशसमवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावः ग्राह्यः एव, तदधिकरणं पर्वतः, पर्वते संयोगिनः कस्यचिदपि समवायेनाऽवृत्तित्वात्, तत्र च धूमः वृत्तिरेवेति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः इति ।

यदि 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयते ***तदा*** नोक्ताऽव्याप्तिः, तादृशसमवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावग्रहणस्याऽसम्भवात् । तथा हि - नूतनपरिष्काराऽनुसारेण प्रतियोगितावच्छेदकौ धर्मविधया सम्बन्धविधया च साध्यतावच्छेदकौ स्यातामित्येतावन्मात्रेण न तादृशप्रतियोगिताकाऽभावः गृह्यते किन्तु धर्मविधया यः साध्यतावच्छेदकः स धर्मविधया एव यदभावीयप्रतियोगिताऽवच्छेदकः स्यात्, सम्बन्धविधया च यः साध्यतावच्छेदकः सोऽपि सम्बन्धविधया एव यदभावीयप्रतियोगितावच्छेदकः स्यात् सः एवाऽभावः ग्राह्यः ।

समवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावश्च न तथा, धर्मविधया यः

साध्यतावच्छेदकः समवायः तस्य प्रतियोगितावच्छेदकत्वेऽपि न धर्मविधया एव प्रतियोगिताऽवच्छेदकत्वम्, किन्तु सम्बन्धविधया एव, सम्बन्धविधया च यः साध्यतावच्छेदकः संयोगः तस्य प्रतियोगितावच्छेदकत्वेऽपि न सम्बन्धविधया एव प्रतियोगिताऽवच्छेदकत्वम्, किन्तु धर्मविधया एव । ततश्च यः सम्बन्धविधया साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वस्य, यः धर्मविधया साध्यतावच्छेदकः वह्नित्वसमवायः समवायः वा धर्मविधया तदवच्छिन्नत्वस्य च समवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकाऽभावीयप्रतियोगितायामभावान्न सः अभावः ग्रहीतुं शक्यते, सम्बन्धविधया यः साध्यताऽवच्छेदकः सम्बन्धविधया एव तेन अवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया एव तेन अवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावस्यैव प्रकृते ग्राह्यत्वात् । अतः अत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वसमवायाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेन सम्बन्धविधया एव अवच्छिन्नत्वात्, धर्मविधया च यः साध्यतावच्छेदकः वह्नित्वसमवायः तेन धर्मविधया एवाऽवच्छिन्नत्वात् । तादृशाऽभावाधिकरणञ्च जलह्रदादिकमेव, धूमस्तत्राऽवृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तेनाऽवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयान्नैवाऽव्याप्तिः ।

ततश्च ***यदि*** 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनावच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमङ्गीक्रियते ***तदा*** 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र व्याप्यवृत्तिसाध्यकस्थले एव अव्याप्तिप्रसक्तेः अव्याप्यवृत्तिस्थलपर्यन्तमनुधावनं व्यर्थमेव स्यात् । तथा च दीधितिकृदुक्त्यसङ्गतिः इति 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तेनाऽवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तेनावच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणाऽभ्युपगमे एव श्रेयः, तथा सति व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्यादिः न स्यात्, स्याच्चाऽव्याप्यवृत्तिसाध्यकस्थले इति भावः ।

अत्रापि कश्चिदुच्छृङ्खलः शङ्केत - ***ननु*** 'विशिष्टं शुद्धान्नातिरिच्यते' - इति न्यायः नैवाऽस्माभिः अभ्युपगम्यते, मानाभावादिति । तथा च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधि-

य शो ल ता

करणनिरूपितवृत्तित्वाभावः' इति एवं लक्षणाऽभ्युपगमेऽपि न क्षतिः । 'पर्वतो वह्नित्वसमवायि-विशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावः नैव ग्रहीतुं शक्यते, यतः प्रकृते साध्यतावच्छेदकः धर्मः - वह्नित्वसमवायः, साध्यतावच्छेदकः सम्बन्धः - संयोगः, तादृशाभावीयप्रतियोगितावच्छेदकः धर्मः - संयोगः, प्रतियोगितावच्छेदकः सम्बन्धश्च - समवायः ।

ततश्च तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदवच्छिन्नत्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदवच्छिन्नत्वं तादृशाऽभावीयप्रतियोगितायां नास्ति, तादृशाऽभावीयप्रतियोगितायाः समवायेनाऽवच्छिन्नत्वेन समवायस्य च साध्यतावच्छेदकत्वाऽभावेन धर्मविधया साध्यतावच्छेदकस्य वह्नित्वसमवायस्य प्रतियोगिताऽवच्छेदकत्वाऽसम्भवात् ।

तथा च तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदवच्छिन्नत्वसत्त्वेऽपि धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदवच्छिन्नत्वाभावान्न हि तादृशोऽभावः ग्रहीतुं शक्यते इति कुतः तमादाय अव्याप्त्याशङ्काऽपि ?

एतदसत्, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायस्य अपलपितुमशक्यत्वात्, तादृशन्यायानभ्युपगमेऽपि अव्याप्तिविरहाभावाच्च ।

अत्र 'तुष्यतु दुर्जनः', 'उपाये सति कर्तव्यं सर्वेषां चित्तरञ्जनम्...' इत्यादिन्यायेन 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायापलापिमते अव्याप्तिः प्रदर्श्यते ।

तथा हि - 'पर्वतः समवायिविशिष्टः, धूमाद्' - इतिस्थलं ग्राह्यम्, धूमसत्त्वे वह्नित्वसमवायिनः अवश्यम्भावात् समवायी अपि अवश्यं स्यादेव, विशेषसत्त्वे सामान्यस्याऽवश्यं सत्त्वात्, आम्रवृक्षसत्त्वे वृक्षावश्यम्भाववत् । ततश्च सत्स्थलमिदम् । एतत्स्थले च समवायेन संयोग्यभावः ग्राह्यः ।

इत्थञ्च प्रकृते साध्यम् - समवायी = वह्निः ।

साध्यतावच्छेदकः धर्मः - समवायः ।

साध्यतावच्छेदकः सम्बन्धः - संयोगः ।

तथा तादृशाऽभावीयप्रतियोगी - संयोगी ।

अभावीयप्रतियोगितावच्छेदकः धर्मः - संयोगः ।

अभावीयप्रतियोगितावच्छेदकः सम्बन्धः - समवायः ।

ततश्च तादृशाऽभावीयप्रतियोगिता धर्मविधया यः साध्यतावच्छेदकः समवायः तेनाऽप्यवच्छिन्ना

वर्तते, सम्बन्धविधया च यः साध्यतावच्छेदकः संयोगः तेनाऽप्यवच्छिन्ना वर्तते । ततश्च समवायेन संयोग्यभावः धर्तुं शक्यते एव । तादृशाऽभावाधिकरणं पर्वतः धूमस्तत्र वृत्तिरिति स्यादेवाऽव्याप्तिः ।

यदि 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयते तदा नोक्ताऽव्याप्तिः । समवायेन संयोग्यभावीयप्रतियोगिता सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्ना वर्तते, किन्तु धर्मविधया एव, सम्बन्धविधया तु तेनाऽनवच्छिन्ना एव । एवं तादृशाऽभावीयप्रतियोगिता धर्मविधया यः साध्यतावच्छेदकः समवायः तेनाऽवच्छिन्ना वर्तते किन्तु सम्बन्धविधया एव, धर्मविधया तु तदनवच्छिन्ना एव । तथा च तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वाभावात्, धर्मविधया यः साध्यतावच्छेदकः समवायः धर्मविधया तदवच्छिन्नत्वाभावाच्च तादृशाऽभावो नैव ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिः ? एवं तादृशन्यायापलापिनामपि उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशः अङ्गीकार्यः एवेति स्थितम् ।

ननु अत्र स्थलं परावर्तितम्, वह्नित्वसमवायिसाध्यकस्थले किमव्याप्तिः सम्भवति ? इति चेज्जिज्ञासा ? तदा वह्नित्वसमवायिसाध्यकस्थलेऽपि अव्याप्तिं प्रदर्शयामः 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायाऽपलापिनां मते ।

तादृशस्थले वह्नित्वसमवायेन संयोग्यभावः ग्राह्यः । पर्वते समवायेन नास्ति कोऽपि संयोगी इति वह्नित्वसमवायेन तु सुतरां नैव स्यात् । वह्नित्वसमवायः = वह्नित्वप्रतियोगिकः समवायः, तथा च तादृशसम्बन्धेन वह्नित्वमेव कुत्रापि स्यान्नान्यत् किमपि ।

तथा च वह्नित्वसमवायेन संयोग्यभावः पर्वते प्राप्यते एव । अयञ्चाऽभावः भवदभ्युपगतलक्षणाऽनुसारेण ग्रहीतुं शक्यते एव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेनाऽपि अवच्छिन्नत्वात्, सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽपि अवच्छिन्नत्वाच्च । यद्यपि धर्मविधया साध्यतावच्छेदकः यः वह्नित्वसमवायः सः प्रतियोगितायाः धर्मविधया नाऽवच्छेदकः, तादृशप्रतियोगितायाः धर्मविधया संयोगेनाऽवच्छिन्नत्वात्, किन्तु सम्बन्धविधया एव, तथापि वह्नित्वसमवायः प्रतियोगितावच्छेदकः कथ्यते एव, सम्बन्धविधया धर्मविधया वेत्यन्यदेतत्, किन्तु वह्नित्वसमवायः तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकः नास्ति इति

य शो ल ता

तु नैव कथ्यते । तथा च तादृशाऽभावीयप्रतियोगिता धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेन अवच्छिन्ना एव कथ्यते, न तु अनवच्छिन्ना । एवमेव यद्यपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सः प्रतियोगितायाः अपि नैव सम्बन्धविधयैवाऽवच्छेदकः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया वह्नित्वसमवायेनाऽवच्छिन्नत्वात्, किन्तु धर्मविधयाऽवच्छेदकः तथापि सम्बन्धविधया साध्यतावच्छेदकः यः संयोगः सः प्रतियोगिताऽवच्छेदकः नास्तीति तु नैव कथ्यते, धर्मविधया तस्याऽवच्छेदकत्वात् । न हि सम्बन्धविधया प्रतियोगितायाः अनवच्छेदकस्याऽपि धर्मविधया तदवच्छेदकत्वे प्रतियोगिताऽवच्छेदकत्वं प्रच्यवते, धर्मविधया प्रतियोगिताऽवच्छेदकस्य प्रतियोगिताऽवच्छेदकत्वाऽनपायात् । तथा च तादृशाऽभावीयप्रतियोगिता सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना एव स्यात्, न तु अनवच्छिन्ना ।

एवञ्च वह्नित्वसमवायेन संयोग्यभावस्य सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकत्वेन तद्ग्रहणं सम्भवत्येव । तादृशवह्नित्वसमवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावस्याधिकरणं पूर्वोक्तयुक्त्या पर्वतः, तत्र च धूमः वृत्तिरिति धूमे सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः, 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्ना, धर्मविधया यः साध्यताऽवच्छेदकः तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति एवं लक्षणाङ्गीकारे ।

यदि 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमभ्युपेयते तदा नोक्ताऽव्याप्त्यवकाशः, यदभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः तेन धर्मविधया एव अवच्छिन्नत्वं सम्बन्धविधया यः साध्यताऽवच्छेदकः तेन सम्बन्धविधया एव अवच्छिन्नत्वञ्च तस्यैवाऽभावस्य ग्राह्यत्वात् । न हि धर्मविधया यः साध्यतावच्छेदकः तेन सम्बन्धविधया प्रतियोगिताऽवच्छेदकत्वे, धर्मविधया तदनवच्छेदकत्वे तादृशप्रतियोगितानिरूपकाऽभावः ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः तेन अवच्छिन्नत्वेऽपि धर्मविधयाऽनवच्छिन्नत्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः तेन धर्मविधया अवच्छिन्नत्वे एव तादृशप्रतियोगितानिरूपकाऽ-

भावस्य ग्राह्यत्वसम्भवात् ।

प्रकृते वह्नित्वसमवायेन संयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया अनवच्छिन्नत्वात्, धर्मविधया एव अवच्छिन्नत्वात् तादृशाभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वं नैव सम्भवेत् । किञ्च, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तेन अवच्छिन्नत्वेऽपि धर्मविधया तेनाऽनवच्छिन्नत्वात्, सम्बन्धविधया एवाऽवच्छिन्नत्वात् तादृशवह्नित्वसमवायसम्बन्धावच्छिन्न-संयोगाऽवच्छिन्नप्रतियोगिताकसंयोग्यभावीयप्रतियोगितायां धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनाऽवच्छिन्नत्वं नैव स्यादिति वह्नित्वसमवायेन संयोग्यभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्नत्वस्य धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्नत्वस्य च सत्त्वेन 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणाऽनुसारेण तादृशसंयोग्यभावस्य ग्राह्यत्वेऽपि तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नत्वस्य धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्नत्वस्य चाऽभावात् 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवंलक्षणाऽनुसारेण अग्राह्यत्वेन एतल्लक्षणाङ्गीकर्तृणां मते न तमादायाऽव्याप्तिसम्भवः ।

इत्थञ्च 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येव लक्षणमङ्गीकार्यम्, व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्यभावादव्याप्यवृत्तिसाध्यके च तत्सद्भावादित्यभिप्रेतसिद्धेः ।

एवञ्च प्रकृते अव्याप्तित्रितयं दर्शितम्,

(१) 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय,

(२) 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय

(३) 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन संयोग्यभावमादाय च ।

अग्रे तृतीयाऽव्याप्तिः तन्निराकरणं वा एव दर्शयिष्यते, अन्यदव्याप्तिद्वितयं तन्निराकरणं च सर्वत्र स्वयमूहनीयम् इत्यवधेयम् ।

'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता...' इत्येवं लक्षणप्रदर्शनं सामान्यशैल्या प्रतिपत्तिसौकर्यार्थं कृतम्, परिष्कारशैल्या अधुना लक्षणं प्रदर्शनीयम्, तदर्थं समस्तं सम्पूर्णं लक्षणं कार्यम् । अधुना तदेव प्रदर्श्यते -

- आदौ 'साध्याभाववदवृत्तित्वम्' इतिलक्षणार्थविधया 'साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणमङ्गीकृतम् ।

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादायाऽव्याप्तिवारणाय 'साध्यतावच्छेदकाऽवच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणमङ्गीकृतम् ।

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्नि-घटोभयाभावमादायाऽव्याप्तिवारणाय 'साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणमङ्गीकृतम् ।

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तिवारणाय 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणमङ्गीकृतम् ।

- 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादाय वह्नित्वसमवायेन वह्नित्वसमवाय्यभावमादाय चाऽव्याप्तिवारणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं सामान्यशैल्या लक्षणमङ्गीकृतम्, एतल्लक्षणं परिष्कारशैल्या प्रदर्शनीयमिति ।

- 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति

एवं लक्षणमङ्गीकार्यम्, एतदपि लक्षणं परिष्कारशैल्या प्रदर्शनीयमिति ।

- 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्रैव शुद्धसमवायेन संयोग्यभावमादाय वह्नित्वसमवायेन संयोग्यभावमादाय वा अव्याप्तिवारणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमङ्गीकरणीयम् । एतदपि परिष्कारशैल्या प्रदर्शनीयम् ।

तत्रादौ 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं परिष्कारशैल्या प्रदर्श्यते । 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यं वह्निः, साध्यतावच्छेदकसम्बन्धः संयोगः । यथा यदा घटः भूतले संयोगेन वर्तते तदा घटनिष्ठप्रकारतानिरूपितसंसर्गताविशिष्टः संयोगः भवति तथैव प्रकृते साध्यं वह्निः पर्वते संयोगेन वर्तते, अतः वह्निनिष्ठसाध्यतानिरूपितसंसर्गताविशिष्टः संयोगः भवति, यदि 'पर्वतः समवायेन संयोगी' इत्यादि स्थलं स्यात् तदा संयोगे साध्यतानिरूपितसंसर्गता नैव स्यात्, तदा साध्यस्य समवायेन वृत्तेः । साध्यं येन सम्बन्धेन पक्षे वर्तमानतया इष्यते तस्मिन्नेव सम्बन्धे साध्यतानिरूपितसंसर्गता भवति । तथा च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यतानिरूपितसंसर्गता संयोगे एव स्यात्, संयोगेन वह्नेः पर्वते वृत्तित्वस्येष्टत्वात् । यदा अत्र संयोगेन वह्न्यभावः गृह्यते तदा संयोगे तादृशवह्न्यभावीयप्रतियोगितावच्छेदकताऽपि स्यात्, प्रतियोगिताऽवच्छेदकता = प्रतियोगितायाः अवच्छेदकता, षष्ठ्यर्थत्वान्निरूपितत्वस्य 'प्रतियोगितानिरूपिताऽवच्छेदकता' इत्यर्थः । तादृशवह्न्यभावीयप्रतियोगितानिरूपिताऽवच्छेदकता वह्नित्वेऽपि संयोगेऽपि च वर्तते इति वह्नित्वनिष्ठावच्छेदकतानिरूपिका संयोगनिष्ठावच्छेदकतानिरूपिका च तादृशाऽभावीयप्रतियोगिता कथ्यते । संयोगश्च प्रकृते साध्यतानिरूपितसंसर्गता-

य शो ल ता

●

पर्वतो वह्निमान् धूमात् - અહીં સાધ્યતાઅવચ્છેદક સંબંધ સંયોગ. સંયોગમાં જે સંસર્ગતા છે તે સાધ્યતાનિરૂપિત છે. જેમ વહ્નિનિરૂપિત સંયોગનિષ્ઠ સંસર્ગતા કહેવાય તે રીતે વહ્નિનિષ્ઠસાધ્યતાનિરૂપિત પણ સંસર્ગતા કહેવાય. માટે, સંયોગ એ સાધ્યતાનિરૂપિત-સંસર્ગતાવિશિષ્ટ થયો. આ સંયોગમાં સંયોગથી વહ્ન્યભાવીયપ્રતિયોગિતાઅવચ્છેદકતા પણ રહે. તે પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપક તાદશઅભાવીયપ્રતિયોગિતા બને. જો સંયોગ સંબંધથી અભાવ લીધો હોય તો જ તાદશઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા સંયોગમાં રહે,

वि वे भा

विशिष्टः इति तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वं स्यात् । यदि संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावः प्रकृते गृह्यते तदापि तादृशघटाभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं स्यादेव, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकत्वस्य संयोगे सत्त्वात्, तादृशसंयोगस्य च साध्यतानिरूपितसंसर्गताविशिष्टत्वात् ।

एवमेव यदि प्रकृते वह्नित्वसमवायादिना संयोग्यभावः गृह्यते तदापि तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं स्यादेव, यतः वह्नित्वसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकसंयोग्यभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकतायाः वह्नित्वसमवाये एव सत्त्वेऽपि धर्मविधया अवच्छेदकतायाः संयोगे सत्त्वात् प्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टः संयोगः स्यादेव, अयमेव संयोगः सम्बन्धविधया साध्यतावच्छेदकः वर्तते इति साध्यतानिरूपितसंसर्गताविशिष्टः यः संयोगः तन्निष्ठा या धर्मविधया अवच्छेदकता तन्निरूपकत्वं तादृशाऽभावीयप्रतियोगितायामस्त्येवेति ध्येयम् ।

अत्र सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्नत्वं = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वम् इत्यर्थः फलितः । ततश्च 'सम्बन्धविधया यः साध्यतावच्छेदकः तेनाऽवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणस्य सामान्यशैल्योपदर्शितस्य परिष्कारशैल्योपदर्शनम् - 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपित-

●

બાકી નહીં. માટે, સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠઅવચ્છેદકતાનિરૂપકત્વ જે અભાવીયપ્રતિયોગિતામાં રહે તે અભાવ લઈ શકાય - આ પ્રમાણે આપણે કહી શકીએ. પ્રતિયોગિતાઅવચ્છેદક ધર્મ અને સાધ્યતાઅવચ્છેદક ધર્મ એક હોવા જોઈએ આ બાબતને પણ આ રીતે આપણે ઢાળીએ - સાધ્યતાનિરૂપિત સાધ્યતાઅવચ્છેદકતા કહેવાય. સાધ્યતાઅવચ્છેદકતાવિશિષ્ટ જે વહ્નિત્વધર્મ તેમાં સંયોગથી વહ્ન્યભાવીયપ્રતિયોગિતાઅવચ્છેદકતા પણ રહે. આ અવચ્છેદકતાનિરૂપકત્વ તાદૃશઅભાવીયપ્રતિયોગિતામાં જાય. જો વહ્ન્યભાવ લેવામાં આવે તો તાદૃશઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વમાં રહે, ઘટાભાવની પ્રતિયોગિતાઅવચ્છેદકતા તો વહ્નિત્વમાં ન જ રહે ને ! તે ઘટત્વમાં રહે. આથી, સાધ્યતાનિરૂપિતસાધ્યતાઅવચ્છેદકતાવન્નિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ જે અભાવીયપ્રતિયોગિતામાં રહે તે અભાવ લઈ શકાય. આ રીતે પણ પરિષ્કાર કરી દેવાનો.

वृत्तित्वाभावः' - इत्येवं भवति ।

अनेन लक्षणेन पूर्वोक्तरीत्या अनेकत्र अव्याप्तिः निराकृता भवति । परिष्कृतलक्षण-समन्वयः पुनः दर्श्यते ।

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादायाऽव्याप्तिः न सम्भवति, यतः एतादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकतायाः ***यद्यपि*** संयोगे सत्त्वेन संयोगस्यैव साध्यताऽवच्छेदकसम्बन्धरूपत्वेन साध्यतानिरूपितसंसर्गताविशिष्टः यः संयोगः तन्निष्ठा या सम्बन्धविधयाऽवच्छेदकता तन्निरूपकत्वं तादृशाऽभावीयप्रतियोगितायामस्ति, सम्बन्धविधया तादृशप्रतियोगिताऽवच्छेदकतायाः संयोगे सत्त्वात्, ***तथापि*** तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वं नास्ति, वह्नित्वस्य साध्यतावच्छेदकत्वात्, तेन प्रतियोगितायाः अनवच्छेदात्, घटत्वेनैव तादृशाऽभावीयप्रतियोगितायाः अवच्छिन्नत्वादिति संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावः नैव प्रकृते ग्राह्यः इति कुतः तमादाय अव्याप्तिः ?

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र वह्नि-घटोभयाभावमादायाऽपि न अव्याप्तिः । ***यद्यपि*** वह्नि-घटोभयाभावीयप्रतियोगितायाः सम्बन्धविधया संयोगेनाऽवच्छिन्नत्वेन संयोगस्यैव च सम्बन्धविधया साध्यतावच्छेदकत्वेन साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठाऽवच्छेदकतानिरूपकत्वं तादृशाभावीयप्रतियोगितायां स्यादेव ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः न साध्यतावच्छेदकीभूतधर्माऽवच्छिन्नत्वम्, साध्यतावच्छेदकीभूतवह्नित्वेन तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वात्, वह्नि-घटोभयत्वेनैव तादृशप्रतियोगितायाः अवच्छिन्नत्वादिति संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्नि-घटोभयाभावः एव अग्राह्यः, तर्हि कुतः तमादायाऽव्याप्तिसम्भवः ?

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिसम्भवः । ***यद्यपि*** पूर्वोक्तरीत्या महानसीयवह्न्यभावीयप्रतियोगितायाः सम्बन्धविधया संयोगेनाऽवच्छिन्नत्वम्, संयोगश्चैव प्रकृते सम्बन्धविधया साध्यतावच्छेदकः, तथा च साध्यतानिरूपितसंसर्गताविशिष्टः यः संयोगः तन्निष्ठा या सम्बन्धविधया अवच्छेदकता तन्निरूपकत्वं तादृशमहानसीयवह्न्यभावीयप्रतियोगितायां स्यादेव ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया महानसीयवह्नित्वेनैवाऽवच्छिन्नत्वेन साध्यताऽवच्छेदकीभूतवह्नित्वधर्माऽनवच्छिन्नत्वेन न तद्ग्रहणं सम्भवतीति नाऽव्याप्तिः ।

- 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैव समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः । ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायाः वह्नित्वेन अवच्छिन्नत्वम्, धर्मविधया

साध्यताऽपि वह्नित्वेनैवाऽवच्छिन्ना इति साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकत्वं तादृशाऽभावीयप्रतियोगितायां स्यादेव ***तथापि*** तादृशाभावीयप्रतियोगितायाः संसर्गविधया अवच्छेदकता समवाये वर्तते धर्मविधया च वह्नित्वे इति नैकाऽपि अवच्छेदकता संयोगे वर्तते, संयोगश्च सम्बन्धविधया साध्यतावच्छेदकः । ततश्च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठाऽवच्छेदकतानिरूपकत्वं नैव अस्ति, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकतायाः संयोगेऽसत्त्वात् । तथा च नैषः अभावः ग्राह्यः इति कुतः तमादायाऽव्याप्तिः ?

अत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः एव ग्राह्यः । तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावन्निष्ठाऽवच्छेदकतानिरूपकत्वमपि अस्ति, साध्यतानिरूपितसंसर्गताविशिष्टसंयोगे तादृशाभावीयप्रतियोगितानिरूपिताऽवच्छेदकतायाः सत्त्वात्, साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वमपि अस्ति, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वधर्माऽवच्छिन्नत्वात् । ततश्च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावविधया तादृशवह्न्यभावः एव ग्राह्यः, तदधिकरणं जलह्रदादिकमेव, न तु पर्वतः, तत्र च धूमः अवृत्तिरेवेति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयान्नाव्याप्तिसम्भवः ।

य शो ल ता

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्येतत्स्थलेऽपि जलत्वविशिष्टद्रव्यत्वाभावमादाय, जलत्व-द्रव्यत्वोभयाभावमादाय, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय च या या अव्याप्तिः पूर्वमुपदर्शिता तेषां सर्वेषां निराकरणमेतल्लक्षणाऽनुसारेण कर्तव्यम्, समवायसम्बन्धावच्छिन्न-द्रव्यत्वत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय लक्षणसमन्वयोऽपि कर्तव्यः इति ।

यद्यपि 'पर्वतो वह्निमान् धूमाद्' इत्यत्र 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र च याः याः अव्याप्तयः उपदर्शिताः तन्निवारणार्थं नोक्तलक्षणमङ्गीकृतम्, 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लघुभूतलक्षणेनाऽपि तन्निवारणसम्भवात् । ***तथापि*** 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादायाऽव्याप्तिवारणायैव उक्तलक्षणमङ्गीक्रियते, उपदर्शितलघुभूतलक्षणेन तदनिवारणात् । तथा हि -

- 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादायाऽ-

व्याप्तिः भवति, यदि 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणमङ्गीक्रियते तदा, तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य सम्बन्धस्य समवायलक्षणस्य धर्मस्य च वह्नित्वसमवायलक्षणस्य साध्यतावच्छेदकत्वात् ।

एवमेव 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन वह्नित्वसमवाय्यभावमादायाऽपि अव्याप्तिः स्यात्, 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येतल्लक्षणाङ्गीकारे, तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य वह्नित्वसमवायरूपस्य धर्मस्य सम्बन्धस्य च साध्यतावच्छेदकत्वात् ।

एतदव्याप्तिवारणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम्, तथा च नोक्ताऽव्याप्तिः, यतः 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावः नैव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वसमवायधर्मावच्छिन्नत्वेऽपि साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगितायां विरहात्, साध्यतानिरूपितसंसर्गताविशिष्टसंयोगे तादृशवह्नित्वसमवाय्यभावीयप्रतियोगितानिरूपितायाः सम्बन्धविधया धर्मविधया वा एकस्या अप्यवच्छेदकतायाः विरहात् ।

एवञ्च वह्नित्वसमवायेन वह्नित्वसमवाय्यभावोऽपि नैव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतवह्नित्वसमवायावच्छिन्नत्वसत्त्वेऽपि साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठाऽवच्छेदकतानिरूपकत्वविरहात् । न हि एकाऽपि धर्मविधया सम्बन्धविधया वा तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकता संयोगे वर्तते, संयोगस्य सम्बन्धविधया धर्मविधया वा प्रतियोगितावच्छेदकत्वाभावात् । ततः संयोगनिष्ठावच्छेदकतानिरूपकत्वं तादृशाऽभावीयप्रतियोगितायां कुतः स्यात् ?

ततश्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावस्य, वह्नित्वसमवायेन वह्नित्वसमवाय्यभावस्य वाऽग्रहणात् संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकतायाः सम्बन्धविधया साध्यतावच्छेदकीभूतसंयोगे सत्त्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकता-

निरूपकत्वं साध्यतावच्छेदकीभूतवह्नित्वसमवायावच्छिन्नत्वञ्च स्तः इति संयोगसम्बन्धावच्छिन्न-वह्नित्वसमवायावच्छिन्नप्रतियोगिताकः वह्नित्वसमवाय्यभावः एव ग्राह्यः, तदधिकरणं जलह्रदादिकम्, धूमस्तत्राऽवृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धलेशोऽपि ?

ननु साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं प्रतियोगिताविशेषणविधया प्रवेशनीयमिति स्वीकृतम्, किन्तु तत्सार्थक्योपपादनार्थं 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्येतत्स्थलपर्यन्तमनुधावनं किमर्थम् ? 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैव समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः प्रदीयत***मिति चेद् ?***

न, असम्भवात् । 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इतिलक्षणाङ्गीकारेऽपि 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र भवदुक्तरीत्या अव्याप्तिः नैव भवति, वह्नित्वसमवायेन वह्नित्वसमवाय्यभावाऽग्रहणात् । यदि वह्नित्वसमवायः साध्यतावच्छेदकः सम्बन्धः धर्मो वा स्यात् तदैव वह्नित्वसमवायेन समवायेन वा वह्नित्वसमवाय्यभावग्रहणं सम्भवति, तदैव साध्यतावच्छेदकीभूतसम्बन्ध-साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वस्य तादृशाऽभावीयप्रतियोगितायां सम्भवात् । 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगस्यैव साध्यतावच्छेदकसम्बन्धत्वात् वह्नित्वस्यैव च साध्यतावच्छेदकधर्मत्वान्न वह्नित्वसमवायः साध्यतावच्छेदकः सम्बन्धः धर्मो वा भवति, ततः 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावः एव ग्रहीतुं न शक्यते तर्हि कुतः तमादायाऽव्याप्तिः ? कुतश्च तदव्याप्तिवारणाय 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यं स्यात् ?

यदा 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इति स्थलमुपेयते तदा वह्नित्वसमवायः साध्यतावच्छेदकः धर्मः भवति । अतः साध्यतावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वञ्च वह्नित्वसमवायेन वह्नित्वसमवाय्यभावीयप्रतियोगितायां सम्भवतः । अतः एव च तद्ग्रहणं सम्भवति । ततश्च 'साध्यतावच्छेदकसम्बन्धाऽवच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इतिलक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायि-

विशिष्टः, धूमाद्' - इत्यत्रैवाऽव्याप्तिरुपदर्शनीया, न तु 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र इति फलितम् ।

एतदव्याप्तिवारणाय च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यमेवेत्यपि फलितम् ।

य शो ल ता

एतल्लक्षणाङ्गीकारेऽपि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां शुद्धसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय च अव्याप्तिः भवति एव । तथा हि - शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां साध्यं - वह्नित्वसमवायी, साध्यतावच्छेदकधर्मः - वह्नित्वसमवायः, साध्यतावच्छेदकसम्बन्धः - संयोगः ।

अत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः गृह्यते । तादृशाऽभावीयप्रतियोगितावच्छेदकः सम्बन्धः संयोगः धर्मश्च वृत्तिनियामकवह्निसंयोगः, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायात् शुद्धसंयोगश्च । एवञ्च तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतवृत्तिनियामकवह्निसंयोगावच्छिन्नत्वमस्ति एव, वृत्तिनियामकवह्निसंयोगस्याऽपि साध्यतावच्छेदकत्वात्, साध्यतावच्छेदकीभूत-

●

⟪ धर्मविधया साध्यतावच्छेदकत्वनो परिष्कारशैलिथी प्रवेश ⟫

सबूर ! आटलो परिष्कार करी देवाथी काम चाली नहीं जाय. अव्याप्ति तो ऊभी ज रहेशे. आपणु जूनुं स्थळ ज लईए - **पर्वतो वह्नित्वसमवायिमान् धूमात्.**

वि ना भा

साध्यताअवच्छेदक संबंध - संयोग. साध्यताअवच्छेदक धर्म - वह्नित्वसमवाय.
अभाव - वह्निसंयोगिअभाव.
प्रतियोगिताअवच्छेदक धर्म - वह्निसंयोग + संयोग.
प्रतियोगिताअवच्छेदक संबंध - संयोग.

ઉપર પરિષ્કાર કર્યો તે મુજબ જો વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં (१) साध्यतानिरूपितसंसर्गतावन्निष्ठअवच्छेदकतानिरूपकत्व અને (२) साध्यतानिरूपितसाध्यतावच्छेदकतावन्निष्ठप्रतियोगिताअवच्छेदकतानिरूपकत्व રહે તો વહ્નિસંયોગિઅભાવ લઈ શકાય. પ્રસ્તુતમાં, साध्यतानिरूपितसंसर्गता संयोगમાં રહે છે. અર્થાત તાદશસંસર્ગતાવિશિષ્ટ

संयोगावच्छिन्नत्वमपि तादृशाऽभावीयप्रतियोगितायामस्तीति कथ्यते एव, शुद्धसंयोगस्याऽपि प्रतियोगितावच्छेदकत्वात् । किञ्च, साध्यतानिरूपितसंसर्गता संयोगे वर्तते, प्रतियोगितावच्छेदक-सम्बन्धोऽपि संयोगः एवेति साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वमपि तादृशाऽभावीयप्रतियोगितायां स्यात्, संयोगस्य प्रतियोगितायाः अवच्छेदकत्वेन संयोगनिष्ठावच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वात् ।

इत्थं च संयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गता-विशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य च सत्त्वात् साध्यता-निरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितानिरूप-काऽभावविधया संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः गृह्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूत-धर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य विरहेण लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः ।

एवमेव 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽ-व्याप्तिः दुर्वारा, तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतवृत्तिनियामकवह्निसंयोग-धर्मावच्छिन्नत्वस्य साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामकवह्निसंयोगनिष्ठावच्छेदकतानिरूपक-त्वस्य च सत्त्वेन वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य ग्राह्यत्वात् । तादृशा-

●

संयोग थाय छे. એમાં જે प्रतियोगिताअवच्छेदकता तन्निरूपकत्व वह्निसंयोगिअभावीय-प्रतियोगितामां જશे. કારણ કે वह्निसंयोगिअभावीयप्रतियोगिताअवच्छेदकता संयोगमां જાય છે. આ રીતે પહેલી શરતમાંથી वह्निसंयोगिअभावीयप्रतियोगिता પાસ થઈ ગઈ. તથા साध्यतानिरूपितसाध्यताअवच्छेदकता संयोगमां પણ જાય જ. તેથી साध्यता-अवच्छेदकताविशिष्ट संयोग જ લઈશું. તેમાં प्रतियोगिताअवच्छेदकता પણ જાય છે. તે प्रतियोगिताअवच्छेदकतानिरूपकत्व वह्निसंयोगिअभावीयप्रतियोगितामां જશે જ. કારણ કે वह्निसंयोगिअभावीयप्रतियोगिताअवच्छेदकता संयोगमां રહે જ છે. આમ, બન્ને શરતમાંથી वह्निसंयोगिअभावीयप्रतियोगिता પાસ થઈ જવાને કારણે वह्निसंयोगिअभाव લઈ શકાશે. તેનું અધિકરણ પર્વત. તેમાં ધૂમ વૃત્તિ. લક્ષણઅસમન્વય. અવ્યાપ્તિતાદવસ્થ્યમ્ !

भावाधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकता-निरूपक-साध्यतावच्छेदकीभूतधर्माऽवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः ।

एतदव्याप्तिवारणाय 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपिका धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमङ्गीकार्यम् । अधुना 'धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना' - इत्यस्य परिष्कारशैल्या लक्षणेऽन्तर्भावः कर्तव्यः । तद्यथा - साध्यतावच्छेदकः यः धर्मः सः प्रतियोगितावच्छेदकः स्यादिति तदर्थः, ततश्च साध्यतानिरूपितावच्छेदकता यत्र तत्र प्रतियोगितानिरूपिताऽवच्छेदकताऽऽवश्यकीति साध्यतानिरूपिताऽवच्छेदकताविशिष्टनिष्ठावच्छेदकता-निरूपकत्वं प्रतियोगितावशेषणविधया प्रवेशनीयम् । ततश्च 'साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठाऽवच्छेदकतानिरूपक-साध्यतानिरूपिताऽवच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकप्रति-योगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणं फलितम् । एतल्लक्षणाङ्गीकारे नोक्ताऽव्याप्तिः, एतल्लक्षणाऽनुसारेण 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां शुद्धसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य वृत्ति-नियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य च ग्रहणाऽसम्भवात् । उक्ताऽभावद्वितय-निरूपितायां प्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टः यः वह्नित्वसमवायः तन्निष्ठाव-च्छेदकतानिरूपकत्वं नास्त्येव, वह्नित्वसमवायेन तादृशाभावीयप्रतियोगिताया सम्बन्धविधया धर्म-विधया चोभयथा अपि अनवच्छेदादिति तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गता-विशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकता-निरूपकत्वाऽसत्त्वान्न तादृशप्रतियोगितानिरूपकाऽभावद्वितयस्यापि ग्रहणं प्रकृते शक्यमिति कुतः तमादाय अव्याप्तिः ? तथा च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वह्नित्वसमवाय्यभावमादाय वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय चाऽव्याप्तिवारणाय लक्षणे प्रतियोगितावशेषणविधया साध्यतानिरूपिताऽवच्छेदकताविशिष्टनिष्ठा-वच्छेदकतानिरूपकत्वं प्रवेश्य 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यता-निरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपित-

वृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीकार्यमिति ।

ननु साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितावच्छेदकता-विशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इति एवं लक्षणाङ्गीकारेऽपि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्व-समवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन च वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः भवत्येव । तथा हि - शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां यदा संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः गृह्यते तदा भवतोक्तं 'सः अभावः साध्यतानिरूपितावच्छेदकतावि-शिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकः न भवति, यतः साध्यतानिरूपिताऽवच्छेदक-ताविशिष्टवह्नित्वसमवाये प्रतियोगितावच्छेदकता नास्ती' ति, किन्तु नैतत् सम्यक्, साध्यतानिरूपिता-वच्छेदकता न केवलं वह्नित्वसमवाये एव वर्तते किन्तु संयोगेऽपि वर्तते एव, यथा वह्नित्वसमवाये धर्मविधया साध्यतानिरूपितावच्छेदकताऽस्ति, तथा संयोगे सम्बन्धविधया साध्यतानिरूपिताऽव-च्छेदकताऽस्ति । संयोगे च प्रतियोगिताऽवच्छेदकताऽपि अस्ति एवेति संयोगनिष्ठावच्छेदकतानिरू-पिका एव तादृशाऽभावीयप्रतियोगिता वर्तते ।

इत्थं च तादृशसंयोगसम्बन्धावच्छिन्न-वृत्तिनियामकवह्निसंयोगाऽवच्छिन्नप्रतियोगिताकाभावीय-प्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वं स्यादेव, साध्यता-निरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं तु अस्ति एवेति साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठावच्छेदकतानिरूपक-साध्यतानिरूपिताऽवच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगिता-निरूपकाऽभावविधया तादृशाभावो गृह्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपिताऽवच्छेदकताविशिष्टनिष्ठा-वच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन वह्नित्व-समवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अपि अव्याप्तिः स्यादेव । यतः तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनिया-मकवह्निसंयोगनिष्ठावच्छेदकतानिरूपकत्वं तु अस्त्येव, साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठाऽ-

वच्छेदकतानिरूपकत्वमपि अस्त्येव । साध्यतानिरूपितावच्छेदकता न केवलं वह्नित्वसमवाये एव वर्तते येन तत्र प्रतियोगितानिरूपिताऽवच्छेदकतायाः विरहात् तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं न स्यादिति । किन्तु साध्यतानिरूपितावच्छेदकता वृत्तिनियामकवह्निसंयोगेऽपि वर्तते एव, सः च प्रतियोगितानिरूपितावच्छेदकताविशिष्टः इति तादृशवृत्तिनियामकवह्निसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वञ्च स्तः एव । ततश्च साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया वृत्तिनियामकवह्निसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावः गृह्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः ।

ततश्च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणाङ्गीकारेऽपि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्राऽव्याप्तिः भवति एवेति व्यर्थमेवैतल्लक्षण***मिति चेद्*** ?

नः 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणाभ्युपगमे दोषाभावादिति ।

●

❁ પરિષ્કારથી અવ્યાપ્તિનિવારણ ❁

હવે જે રીતે અવ્યાપ્તિ આપી તે ધ્યાન દઈને ફરીથી વાંચો. તેમાં નં-૧ માં જે (= સંસર્ગનિષ્ઠા) સાધ્યતાઅવચ્છેદકતા લીધી તે જ સંસર્ગનિષ્ઠા સાધ્યતાઅવચ્છેદકતા નં-૨માં લીધી. જો નં-૨માં સાધ્યતાનિરૂપિતસાધ્યતાઅવચ્છેદકતા ધર્મનિષ્ઠા લેવામાં આવે તો તાદૃશ-સાધ્યતાઅવચ્છેદકતાવિશિષ્ટ સંયોગ ન બને. કિંતુ વહ્નિત્વસમવાય બને. અને વહ્નિત્વસમવાયમાં તો વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા નથી જતી. જાય તો વહ્નિત્વ-

अयमाशयः - साध्यतानिरूपितावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं संयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां च प्राप्यते, यतः साध्यतानिरूपितावच्छेदकताविशिष्टः वृत्तिनियामकसंयोगः गृह्यते एव । यदि तादृशः परिष्कारः क्रियेत येन साध्यतानिरूपितावच्छेदकता वह्नित्वसमवायनिष्ठा एव गृह्यते तदा नोक्ताऽऽपत्तिः स्यात्, वह्नित्वसमवाये तादृशाभावद्वितयनिरूपितप्रतियोगितानिरूपिताऽवच्छेदकतायाः असत्त्वात् । न हि वह्नित्वसमवायः संयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगिताऽवच्छेदकः वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितावच्छेदकः वा, येन वह्नित्वसमवायनिष्ठावच्छेदकतानिरूपकत्वं तादृशप्रतियोगिताद्वितये स्यादिति येन परिष्कारेण साध्यतानिरूपिताऽवच्छेदकता संयोगनिष्ठा वृत्तिनियामकवह्निसंयोगनिष्ठा वा न गृह्यते किन्तु धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तन्निष्ठा एव गृह्यते सः परिष्कारः प्रकृते आश्रयणीयः ।

धर्मविधया यः साध्यतावच्छेदकः भवति तन्निष्ठावच्छेदकता सम्बन्धविधया यः साध्यतावच्छेदकः भवति तन्निष्ठावच्छेदकतातः भिन्ना, यतः सम्बन्धस्य सम्बन्धः अनवस्थाभयेन नैयायिकैः नाङ्गीक्रियते, यथा 'पर्वतो वह्निमान्' इत्यत्र साध्यतावच्छेदकः सम्बन्धः संयोगः, संयोगः

●

સમવાયિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા જાય. પણ, તાદશપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં નહીં જાય. કિંતુ વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતામાં જ જશે. માટે, સંયોગથી વહ્નિસંયોગિઅભાવ ન લઈ શકાય. પણ, વહ્નિત્વસમવાયિઅભાવ જ લેવાશે. તેનું અધિકરણ જલહ્રદ. તેમાં ધૂમ અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર ! પરંતુ, સૌથી મોટો પ્રશ્ન તો એ છે કે એવો કયો પરિષ્કાર કરવો કે જેના દ્વારા નં-૨માં સાધ્યતાનિરૂપિતસાધ્યતાઅવચ્છેદકતા સંબંધનિષ્ઠા ન પકડાય, કિંતુ ધર્મનિષ્ઠા જ પકડાય ? આ પ્રશ્નનો જવાબ ગ્રંથકાર આપે છે કે સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાનો પ્રવેશ કરો એટલે ધર્મનિષ્ઠસાધ્યતાઅવચ્છેદકતા જ લેવી પડે. કારણ કે એક નિયમ છે કે સંસર્ગનિષ્ઠઅવચ્છેદકતા એ સંસર્ગથી અવચ્છિન્ન ન હોય. બાકી અનવસ્થા આવે. એટલે કે સંસર્ગનિષ્ઠઅવચ્છેદકતાનો અવચ્છેદક કોઈ સંસર્ગ માનો તો તેમાં અવચ્છેદકતાની અવચ્છેદકતા આવે. તેનો અવચ્છેદક અન્ય સંબંધ માનવો પડે. તેમાં પાછી અવચ્છેદકતાઅવચ્છેદકતાની અવચ્છેદકતા આવે. એ અવચ્છેદકતાઅવચ્છેદક અન્ય સંસર્ગ... આમ, અનવસ્થા ચાલે. માટે ન્યાયજગતમાં સંસર્ગનિષ્ઠઅવચ્છેદકતાને

समवायसम्बन्धेन पर्वते वह्नौ च वर्तते, किन्तु तन्न अन्विष्यते, अर्थात् समवायः तादृशज्ञाने संयोगीयवृत्तितावच्छेदकतया न भासते, अन्यथा तस्यापि संसर्गस्य, तस्यापि संसर्गस्य कल्पनीयत्वापत्त्या अनवस्थाप्रसङ्गात् । अतः नैयायिकैः सम्बन्धनिष्ठा या काऽपि अवच्छेदकता सा सम्बन्धेनाऽनवच्छिन्ना एव स्वीक्रियते इति सम्बन्धविधया साध्यतावच्छेदकः यः संयोगः तन्निष्ठा या साध्यतावच्छेदकता सा न केनाऽपि सम्बन्धेनावच्छिन्ना भवति । धर्मविधया यः साध्यतावच्छेदकः तन्निष्ठा साध्यतावच्छेदकता तु समवायादिरूपसम्बन्धेनाऽवच्छिन्ना भवति एव, नैयायिकैः तथाऽभ्युपगमात् । तथा च धर्मविधया यः साध्यतावच्छेदकः तन्निष्ठा साध्यतावच्छेदकता यत्किञ्चित्सम्बन्धावच्छिन्ना भवति, सम्बन्धविधया यः साध्यतावच्छेदकः तन्निष्ठा साध्यतावच्छेदकता न केनाऽपि सम्बन्धेनाऽवच्छिन्ना भवति । अतः यदा साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता कुत्र स्यादिति पर्यनुयुज्यते तदा इदमेव समाधानं यदुत धर्मविधया यः साध्यतावच्छेदकः तत्रैव, न सम्बन्धविधया साध्यतावच्छेदके । ततः 'पर्वतो वह्निमान्' इत्यत्र साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता वह्नित्वे एव स्यात्, न तु संयोगे इति फलितम्, संसर्गनिष्ठायाः अवच्छेदकतायाः सम्बन्धाऽनवच्छिन्नत्वात् ।

य शो ल ता

प्रकृते "अनवस्थाभयेन सम्बन्धसम्बन्धभानस्य अनभ्युपगन्तव्यतया सम्बन्धनिष्ठायाः अवच्छेदकतायाः सम्बन्धाऽनवच्छिन्नत्वस्य सिद्धान्तसिद्धतया" (व्या.प.माथुरी-गङ्गा-पृ.३९) इति **व्याप्तिपञ्चकमाथुरीगङ्गावृत्तिकारशिवदत्तमिश्रोक्तिः** स्मर्तव्या ।

इत्थञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिः सम्भवति, यतः तादृशाऽभावीयप्रतियोगितायां

●

संसर्गथी अनवच्छिन्न मानवामां आवी छे. हा ! धर्ममां जे अवच्छेदकता आवे ते संबंधथी अवच्छिन्न होय. जेम के वह्नित्वमां साध्यताअवच्छेदकता आवे ते समवायसंबंधथी अवच्छिन्न होय. कारण के साध्यताअवच्छेदक धर्म जे संबंधथी साध्यमां रहे ते संबंधथी अवच्छिन्न साध्यताअवच्छेदकनिष्ठसाध्यताअवच्छेदकता कहेवाय. टूंकमां, साध्यतानिरूपितयत्किंचित्संबंधअवच्छिन्नअवच्छेदकता साध्यताअवच्छेदक धर्ममां ज जाय. साध्यताअवच्छेदक संबंधमां नहीं. आपणे जे दृष्टांत जोता हता ते मुजब साध्यतानिरूपितयत्किंचित्संबंधअवच्छिन्नअवच्छेदकता वह्नित्वसमवायनिष्ठा ज लेवी पडशे. एने लईने तो अव्याप्ति न ज आवे ते पूर्वे देखाडी ज दीधुं छे.

वि न भा

साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वं नास्ति । साध्यतानिरूपिताऽवच्छेदकताविशिष्टः संयोगः भवति, किन्तु साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्तु संयोगः नैव भवति, संयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तन्निष्ठा या साध्यतानिरूपिता अवच्छेदकता तस्याः केनचिदपि सम्बन्धेनाऽनवच्छिन्नत्वात् । अतः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टः वह्नित्वसमवायः एव भवति, वह्नित्वसमवायनिष्ठसाध्यतावच्छेदकतायाः स्वरूपसम्बन्धेनाऽवच्छिन्नत्वात्, वह्नित्वसमवायस्य धर्मविधया साध्यतावच्छेदकत्वेन तन्निष्ठाऽवच्छेदकतायाः यत्किञ्चित्सम्बन्धाऽवच्छिन्नत्वावश्यम्भावात् ।

वह्नित्वसमवायस्तु संयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य प्रतियोगिताऽवच्छेदकः धर्मविधयापि नास्ति, सम्बन्धविधयाऽपि नास्ति, एवमेव वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य प्रतियोगितावच्छेदकता धर्मविधया सम्बन्धविधया वा नास्त्येव वह्नित्वसमवाये इति संयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायाञ्च साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्याऽसत्त्वात् 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्य वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायाञ्च वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्य-

य शो ल ता

●

★ साध्यतावच्छेदकत्वनो परिष्कारशैलिथी उभयविधया प्रवेश ★

આમ, જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવન્નિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ જતું હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ = સાધ્યાભાવવદ્અવૃત્તિત્વ. (અહીં સાધ્યતાનિરૂપિતસાધ્યતાઅવચ્છેદકતા... આ પ્રમાણે જણાવવામાં આવે છે. હકીકતે સાધ્યતાઅવચ્છેદકતા એટલે જ સાધ્યતાનિરૂપિતઅવચ્છેદકતા. માટે, સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નઅવચ્છેદકતા... આટલું જ કહેવું પર્યાપ્ત છે, સાધ્યતાઅવચ્છેદકતા કહેવાની જરૂરત છે જ નહીં. છતાં તથાવિધબાલ-મંદજીવને અનુલક્ષીને તથાપ્રકારે નિરૂપણ કર્યું છે. પ્રતિયોગિતાઅવચ્છેદકતામાં પણ આ જ વાત સમજી લેવી.)

વિ ન ભા

भावस्य साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाभावविधया ग्रहणं नैव शक्यम् ।

अतः अत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टवह्नित्वसमवायनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसंयोगेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टवह्नित्वसमवायेन चाऽवच्छिन्नत्वात् । एवञ्च वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगेन, वह्नित्वसमवायेन चावच्छिन्नत्वेन वृत्तिनियामकवह्निसंयोगस्य वह्नित्वसमवायस्य च क्रमशः साध्यतानिरूपितसंसर्गताविशिष्टत्वेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेद-

य शो ल ता

●

पर्वतो वह्नित्वसमवायिमान् धूमात् આ સ્થલમાં સમવાયથી વહ્નિત્વસમવાયિઅભાવને લઈને અવ્યાપ્તિ ન આવે તે માટે નં-૧ પરિષ્કાર જરૂરી છે. તથા તે જ સ્થલમાં સંયોગસંબંધથી વહ્નિસંયોગિઅભાવને લઈને અવ્યાપ્તિ ન આવે તે માટે નં-૨ પરિષ્કાર જરૂરી છે. આ આપણે પહેલા જોઈ જ ગયા છીએ. માટે, ફરીથી તેના ઉપર વિસ્તાર નથી કરતા.

(**નોંધ** :- અમે પૂર્વે ગુજરાતી લક્ષણ તરીકે બતાવેલ કે

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મ બનતો હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ બનતો હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ - આ આખા લક્ષણને સંસ્કૃતમાં હજુ ઢાળ્યું નથી. જેટલું લક્ષણ સંસ્કૃતમાં જોયું તેનું ગુજરાતીમાં લક્ષણ આ રીતે કહેવાય -

વિ ના મા

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક ધર્મ પણ બનતો હોય. અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક સંબંધ પણ બનતો હોય તે અભાવીયઅધિકરણમાં અવૃત્તિત્વ.

આ લક્ષણ મુજબ **पर्वतो वह्नित्वसमवायिमान् धूमात्** અહીં સમવાયથી વહ્નિત્વસમવાયિ-અભાવને લઈને કે સંયોગથી વહ્નિસંયોગિઅભાવને લઈને અવ્યાપ્તિ નહીં આપી શકાય. કારણ કે બંને અભાવની પ્રતિયોગિતા સાધ્યતાઅવચ્છેદક ધર્મ કે સાધ્યતાઅવચ્છેદક સંબંધ બંનેમાંથી કોઈ એકથી જ અવચ્છિન્ન છે. ઉભયથી અવચ્છિન્ન નથી. આ બાબત પૂર્વે

कताविशिष्टत्त्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामक-वह्निसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-विशिष्टवह्नित्वसमवायनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात् ।

संयोगेन वह्नित्वसमवाय्यभावस्य वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवाय्यभावस्य च पर्वतेऽवृत्तित्वेन तदधिकरणविधया जलह्रदादिकमेव लभ्यते, तत्र च धूमोऽवृत्तिरिति धूमे साध्यता-निरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाव-च्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिगन्धलेशोऽपि ?

एतावता 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादायाऽव्याप्तिवारणाय प्रतियोगितावि‌शेषणविधया साध्यतानिरूपित-संसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वं लक्षणे प्रवेशनीयम्, उक्तस्थले एव संयोगेन वृत्तिनि-यामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय च साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्ना-वच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वञ्च प्रतियोगितावि‌शेषणविधया लक्षणे प्रवेशनीय***मिति फलितम् ।***

ननु 'साध्यतावच्छेदकधर्मावच्छिन्नत्वस्यैव प्रतियोगितावि‌शेषणविधया प्रवेशे अव्याप्तिः भवति, अतः प्रतियोगितावि‌शेषणविधया साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्ट-निष्ठाऽवच्छेदकतानिरूपकत्वं लक्षणे प्रतियोगितावि‌शेषणविधया प्रवेशनीयम्' - इत्येतद् भवतः

●

જણાવી જ દીધેલ છે. ટૂંકમાં, આ લક્ષણમાં સાધ્યતાઅવચ્છેદક પછી ધર્મ અને સંબંધનો પ્રવેશ કરવામાં આવેલ છે. કિંતુ પ્રતિયોગિતાઅવચ્છેદક પછી ધર્મ કે સંબંધ - કશાનો પ્રવેશ કરવામાં નથી આવ્યો.

હવે, આ લક્ષણમાં અવ્યાપ્તિ આપવામાં આવશે. તે દૂર કરવા પરિષ્કાર કરતા પૂર્વે જે ગુજરાતી લક્ષણ બતાવેલ તે સંપૂર્ણતયા ફલિત થશે, સાર્થક સાબિત થશે. આ ટ્રેક મગજમાં સ્થિર કરી પછી તે રીતે આગળ વધો કે જેથી ગાડી પાટા ઉપરથી ઉતરી ન જાય. પણ, એટલું યાદ રાખવું કે પદાર્થ એકદમ સ્પષ્ટ છે. ન સમજાય તો આને જ એક-બે-ત્રણ વાર ફરી-ફરીને વાંચવું. સ્પષ્ટતા થઈ જશે. હિંમત ન હારવી. અત્યાર સુધી જે લક્ષણ બન્યું તેમાં હજુ શું અવ્યાપ્તિ આવે છે ? તે જોઈએ -)

अभिप्रेतम् । एतत्सिद्ध्यर्थं भवता 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्येतत्स्थलं किमर्थं गृहीतम् ? साध्यतावच्छेदकधर्मावच्छिन्नत्वस्यैव प्रतियोगिताविशेषणविधया लक्षणे प्रवेशे कृते 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैव संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन च साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः भवति, एतदव्याप्तिनिवारणाय लक्षणे साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्यैव प्रवेशः कर्तव्यः, तेनोक्ताऽव्याप्तेर्वारणात् । तथा हि - यदि 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकसाध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः'-इत्येव लक्षणमभ्युपेयते तदा 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगेन वह्नेः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः भवति, तादृशाभावीयप्रतियोगिताऽवच्छेदकीभूतसंयोगसम्बन्धस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगिताऽवच्छेदकीभूतवृत्तिनियामकवह्निसंयोगस्याऽपि 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन शुद्धसंयोगवत् साध्यतावच्छेदकत्वेन च उक्ताऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वस्य च सत्त्वादुक्ताभावग्रहणसम्भवात् । तादृशाऽभावाधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् अव्याप्तिः भवत्येव ।

य शो ल ता

'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायाऽनभ्युपगन्तॄणामुच्छृङ्खलानां सङ्ग्रहायापि 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैव वृत्तिनियामकवह्निसंयोगेन वह्नेः साध्यत्वमभ्युपगम्य वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः प्रदर्शनीया । वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितावच्छेदकीभूतवृत्तिनियामकवह्निसंयोगसम्बन्धस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतवृत्तिनियामकवह्निसंयोगस्याऽपि साध्यतावच्छेदकत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामकवह्निसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वस्य च सत्त्वात् तादृशवृत्तिनियामकवह्निसंयोगावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावः गृह्यते एव ।

तादृशाऽभावाधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकसाध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण कुतः लक्षणसमन्वयः ? येन अव्याप्तिः न स्यादिति ।

ततश्च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणाऽभ्युपगमे 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र शुद्धसंयोगेन वह्नेः साध्यत्वे संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेनैव च वह्नेः साध्यत्वे वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः । एतदव्याप्तिवारणाय 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमभ्युपेयम् ।

एतल्लक्षणाऽभ्युपगमे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगेन वह्नेः साध्यत्वे संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्याऽसत्त्वात् । साध्यतानिरूपितयत्किञ्चित् सम्बन्धावच्छिन्नावच्छेदकताविशिष्टं वह्नित्वमेव स्यात्, न तु संयोगः, संयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तन्निष्ठावच्छेदकतायाः केनाऽपि सम्बन्धेनाऽनवच्छिन्नत्वात् । वह्नित्वं च तादृशाभावीयप्रतियोगितायाः सम्बन्धविधया धर्मविधया वा नास्ति अवच्छेदकमिति तन्निष्ठाऽवच्छेदकतानिरूपकत्वं नास्त्येव तादृशाऽभावीयप्रतियोगितायाम् । तथा च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः नैव ग्राह्यः, तस्याऽतथात्वात् ।

एवञ्च उक्तस्थले वृत्तिनियामकवह्निसंयोगेन वह्नेः साध्यत्वे वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावोऽपि नैव एतल्लक्षणाऽभ्युपगमे ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामकवह्निसंयोगनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वस्याऽसत्त्वात् । साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्ट-

वह्नित्वं तादृशाऽभावीयप्रतियोगितायाः धर्मविधया सम्बन्धविधया वा नास्ति अवच्छेदकमिति कुतः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वं तादृशाऽभावीयप्रतियोगितायां सम्भवेत् ? तथा च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावविधया वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावस्याऽग्राह्यत्वात् कुतस्तमादायाऽव्याप्तिसम्भवः ?

एवञ्चैतल्लक्षणाऽभ्युपगमे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगेन साध्यत्वे संयोगेन वह्न्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्संसर्गावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात्, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य संयोगस्य वह्नित्वस्य च यथाक्रमं साध्यतानिरूपितसंसर्गताविशिष्टत्वात्, साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टत्वाच्च । एतदभावस्य अधिकरणं जलह्रदः, धूमः तत्राऽवृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयान्नाऽव्याप्तिः ।

एवं वृत्तिनियामकवह्निसंयोगेन साध्यत्वे उक्तलक्षणाऽनुसारेण वृत्तिनियामकवह्निसंयोगेन वह्न्यभावः एव लक्षणघटकः भवितुमर्हति, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामकवह्निसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात्, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकतायाः वृत्तिनियामकवह्निसंयोगे वह्नित्वे चोभयत्र सत्त्वात्, वृत्तिनियामकवह्निसंयोगस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वात्, वह्नित्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टत्वाच्च । तादृशाभावाधिकरणं जलह्रदः, धूमस्तत्रावृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्तिः ?

इत्थञ्च "यदि 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकी-

यशोलता

भूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति एवं लक्षणमभ्युपेयते तर्हि 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र शुद्धसंयोगेन साध्यत्वे संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन साध्यत्वे वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय चाऽव्याप्तिः स्यादिति तन्निवारणाय 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपक-प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमभ्युपेयम्" - इत्येव भवता कथनीयम्, किमर्थं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्येतत्स्थलपर्यन्तमनुधावनं कृतम् ? ***इति चेत्*** ?

मैवम्, अभिप्राय-वस्तुस्थित्यपरिज्ञानात् । अयमभिप्रायः - लक्षणे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वमेव प्रवेशनीयम् । यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमेव प्रवेश्यते तदा 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यात् । यदि साध्यताऽवच्छेदकसम्बन्धावच्छिन्नत्वं प्रवेश्यते तदा 'पर्वतो वह्निमान्, धूमाद्' - इत्येतत्स्थले तु नास्त्येवाऽव्याप्तिः इति पूर्वमुक्तमेव । तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वघटितलक्षणे अव्याप्तिप्रदर्शनार्थं पूर्वं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्येवं स्थलं गृहीतम्, यदि एतत्स्थले एव साध्यतावच्छेदकधर्माऽवच्छिन्नत्वघटितलक्षणस्य अव्याप्तिः सम्भवति तर्हि तत्रैव तद्दर्शनमुचितं स्यात्, प्रकृतस्थले एवाऽव्याप्तिसम्भवे अन्यत्स्थलगवेषणस्याऽनुचितत्वात्, तथैव लाघवसम्भवाच्च । ग्रन्थकृत्पङ्क्तिदर्शनेन तत् स्पष्टं यदुत स्थलमपरावृत्त्यैकस्मिन् एव स्थले उभयथा (= धर्मविधया सम्बन्धविधया च) साध्यताद्यवच्छेदकताप्रवेशोपपादनम् अतीव शब्दलाघवेन सम्भवतीति ।

तथा च लक्षणे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वप्रवेशप्रयोजकाऽव्याप्तिप्रदर्शनाय धर्मविधया सम्बन्धविधया च प्रतियोगितावच्छेदकताप्रवेशप्रयोजकवक्ष्यमाणाऽव्याप्तिप्रदर्शनाय च 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्येतत्स्थलस्याऽवश्यं ग्राह्यत्वेन तत्रैव साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वप्रवेशप्रयोजकाऽव्याप्तिप्रदर्शनम् अव्याप्तिसम्भवे युक्तमिति 'पर्वतो वह्निमान् धूमाद्' इत्यत्र भवदुक्तरीत्या अव्याप्त्यादिसम्भवेऽपि ग्रन्थकृतां तु तत्प्रदर्शनमनुचितमेवेति न ग्रन्थकृता स्थलं परावृत्तमिति

य शो ल ता

सूक्ष्मेक्षिकया विभावनीयम् ।

एवञ्च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतीदमेव परिष्कारशैल्या 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं भवतीति, 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतीदमेव परिष्कारशैल्या 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं भवतीति च दृष्टम् ।

एतावता सम्बन्धविधया धर्मविधया च साध्यतावच्छेदकतायाः प्रवेशः आवश्यकः इति फलितम् । प्रतियोगिताऽवच्छेदकतायाः अपि सम्बन्धविधया धर्मविधया च प्रवेशः कार्यः - इत्येतदधुना दर्श्यते ।

य शो ल ता

ननु 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाऽभ्युपगमेऽपि न निस्तारः, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव समवायेन संयोग्यभावमादायाऽव्याप्तेरवारणात् । तथा हि - समवायेन संयोग्यभावीयप्रतियोगितानिरूपितावच्छेदकता समवाये संयोगे च वर्तते । समवायतः वह्नित्वसमवायस्य अनतिरिक्तत्वेन समवाये साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता स्यादेव, वह्नित्वसमवायवत् समवायस्यापि धर्मविधया साध्यतावच्छेदकत्वात् । संयोगोऽपि सम्बन्धविधया साध्यतावच्छेदकः एवेति संयोगे साध्यतानिरूपितसंसर्गता स्यादेव । तथा च तादृशसमवाय-सम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात् तादृशाऽभावग्रहणं स्यादेव। तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयात् स्यादेव अव्याप्तिः ।

न च समवायेन संयोग्यभावः साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाभावविधया नैव ग्रहीतुं शक्यते, विशिष्टं शुद्धान्नातिरिच्यते - इति न्यायस्याऽनभ्युपगतत्वादिति कुतः अव्याप्तिः ? ***इति वाच्यम्,***

वह्नित्वसमवायेन संयोग्यभावमादायाऽव्याप्तेः दुर्वारत्वात् । वह्नित्वसमवायेन पर्वते न कोऽपि संयोगी वर्तते, वह्नित्वसमवायेन वह्नित्वमेव कुत्रचिदपि वृत्ति भवति, न तु अन्यत् किमपि इति पर्वते वह्नित्वसमवायेन संयोग्यभावो लभ्यते एव । एतदभावीयप्रतियोगितानिरूपिताऽवच्छेदकता वह्नित्वसमवाये संयोगे च वर्तते । तत्र वह्नित्वसमवायः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टः, वह्नित्वसमवायस्य धर्मविधया साध्यतावच्छेदकत्वात् । संयोगोऽपि साध्यतानिरूपितसंसर्गताविशिष्टः, तस्य सम्बन्धविधया साध्यतावच्छेदकत्वात् । तथा च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य, साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य च सत्त्वात् तादृशाऽभावः गृह्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतानिरूपित-

द्या शो ल ता

●

✲ प्रतियोगिताअवच्छेदकतानो उभयविधया प्रवेश ✲

જે લક્ષણ આપણે જોયું તેમાં થોડું ઉમેરવું જોઈએ :- જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠા સંસર્ગવિધયા યા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવન્નિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ આ બંને જતું હોય તે અભાવીયઅધિકરણઅવૃત્તિત્વ સદ્ધેતુમાં જવું જોઈએ. જો આ રીતે ધર્મવિધયા અને સંસર્ગવિધયા પરિષ્કાર ન કરો, પણ પૂર્વે જે બતાવેલ તે જ લક્ષણ સ્વીકારો તો **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલમાં અવ્યાપ્તિ દુર્વાર બને. પૂર્વે જોઈ જ ગયા છીએ તેમ પ્રસ્તુતમાં

વિ ન ભા

સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય + સમવાય.

સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ.

અભાવ લઈશું સમવાયથી સંયોગિઅભાવ.

પ્રતિયોગિતાઅવચ્છેદક ધર્મ - સંયોગ.

પ્રતિયોગિતાઅવચ્છેદક સંબંધ - સમવાય.

संसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-विशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवत्येवाऽव्याप्तिः ।

तथा च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपित-संसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता-विशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारेऽपि 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च संयोग्यभावमादायाऽव्याप्तिः स्यादेव, एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽपि अव्याप्तिः स्यादेव ***इति चेत् ?***

●

प्रस्तुतमां, साध्यतानिरूपितसंसर्गताविशिष्ट संयोग. એમાં પ્રસ્તુત સંયોગિઅભાવીય-પ્રતિયોગિતાઅવચ્છેદકતા જાય છે. કારણ કે ઉપર બતાવ્યું તેમ સંયોગ એ પ્રતિયોગિતા-અવચ્છેદક ધર્મ છે. માટે, તાદૃશસંયોગનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ સંયોગિ-અભાવીયપ્રતિયોગિતામાં જશે.

તથા સાધ્યતાનિરૂપિતયત્કિંચિત્સંસર્ગઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટ સમવાય. (+ વહ્નિત્વસમવાય.) કારણ કે ધર્મવિધયા સાધ્યતાઅવચ્છેદક વહ્નિત્વસમવાય + સમવાય જ છે. તેમાં પ્રસ્તુતસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા જશે. કારણ કે ઉપર જણાવ્યું તેમ સમવાય ઉક્તઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ છે. માટે, તાદૃશસમવાય-નિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં જશે.

આ રીતે સંયોગિઅભાવીયપ્રતિયોગિતા તમારા પરિષ્કારમાંથી પાસ થઈ ગઈ. આ સંયોગિઅભાવનું અધિકરણ પર્વત, કારણ કે પર્વત ઉપર કોઈ પણ સંયોગી સમવાયસંબંધથી ન રહેતું હોય તે શક્ય છે. પર્વતમાં જે સમવાયથી રહે છે તે પર્વતત્વ વગેરે સંયોગી નથી અને જે સંયોગી ઘાસ વગેરે છે તે સમવાયથી રહેતા નથી. માટે, સમવાયથી સંયોગિઅભાવનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ. માટે, લક્ષણઅસમન્વય, અવ્યાપ્તિ દુર્વાર !

❀ સમવાયથી સંયોગ્યભાવનું વારણ ❀

આ અવ્યાપ્તિને દૂર કરવા માટે અમે જે પરિષ્કાર જણાવ્યો તે માનવો જ પડશે. ગુજરાતીમાં આપણે પરિષ્કાર કરેલો કે -

सत्यम्, अतः एव 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणं परित्यज्य 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमभ्युपेयम् । एतल्लक्षणाऽभ्युपगमे न पूर्वोक्ताऽऽपत्तिरिति पूर्वमुपदर्शितमेव । अधुना एतल्लक्षणं परिष्कारशैल्या उपदर्शनीयम् ।

सम्बन्धविधया यः साध्यतावच्छेदकः = साध्यतानिरूपितसंसर्गताविशिष्टः, धर्मविधया यः साध्यतावच्छेदकः = साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टः इत्यर्थः पूर्वं दृष्टः एव । एतादृशसाध्यतानिरूपितसंसर्गताविशिष्टनिष्ठा या प्रतियोगितानिरूपिताऽवच्छेदकता गृह्यते साऽपि संसर्गविधया एव स्यादित्यावश्यकम्, तथा च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठा या संसर्गीयाऽवच्छेदकता तन्निरूपकत्वं यदि प्रतियोगितायां भवेत्तदैव तादृशप्रतियोगिता सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना कथ्यते । ततश्च सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्नत्वं = साध्यतानिरूपितसंसर्गतावन्निष्ठसंसर्गीयाऽव-

●

(१) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મ હોય અને
(૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય
તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

पर्वतो वह्नित्वसमवायिमान् धूमात् સ્થલમાં
સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય + સમવાય.
સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ.
અભાવ - સમવાયેન સંયોગિઅભાવ.
પ્રતિયોગિતાઅવચ્છેદક ધર્મ - સંયોગ. પ્રતિયોગિતાઅવચ્છેદક સંબંધ - સમવાય.

સ્પષ્ટ છે કે જે સાધ્યતાઅવચ્છેદક ધર્મ છે તે પ્રતિયોગિતાઅવચ્છેદક ધર્મ નથી. કારણ કે સાધ્યતાઅવચ્છેદક ધર્મ છે સમવાય. જ્યારે પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે સંયોગ. તથા જે સાધ્યતાઅવચ્છેદક સંબંધ છે તે પ્રતિયોગિતાઅવચ્છેદક સંબંધ નથી. કારણ કે સાધ્યતાઅવચ્છેદક સંબંધ છે સંયોગ. જ્યારે સાધ્યતાઅવચ્છેદક સંબંધ છે સમવાય ! એટલે સમવાયથી સંયોગિઅભાવ નહીં લઈ શકાય. કિંતુ સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. કારણ કે આ અભાવ જ ઉક્તપરિષ્કારમાંથી પસાર થવા સક્ષમ છે. આ

च्छेदकतानिरूपकत्वम् इत्यर्थः फलितः । धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्नत्व-मित्यस्यापि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धाव-च्छिन्नावच्छेदकतानिरूपकत्वमेवार्थः ज्ञेयः । तथा च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीया-ऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्स-म्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं परिष्कारशैल्या लक्षणं फलितम् ।

य शो ल ता

एतल्लक्षणाभ्युपगमे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र न वह्नित्वसमवायेन संयोग्यभावमादायाऽव्याप्तिः सम्भवति, यतः साध्यतानिरूपितसंसर्गताविशिष्टः यः संयोगः सः तादृशाऽभावीयप्रतियोगितायाः धर्मविधया एवाऽवच्छेदकः, न तु सम्बन्धविधया । ततश्च साध्यता-निरूपितसंसर्गताविशिष्टनिष्ठा या धर्मविधया अवच्छेदकता तन्निरूपकत्वमेव तादृशाऽभावीय-

●

અભાવનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ લાખો જોજન દૂર !

❁ ઉભયનો ઉભયવિધયા પ્રવેશ ❁

હવે, સંસ્કૃત (= પરિષ્કૃત = પરિષ્કારશૈલિ મુજબના લક્ષણ =) વ્યાપ્તિ મુજબ જોઈ લઈએ. જે અભાવની પ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠા યા સંબંધવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ અને

વિ

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવન્નિષ્ઠા યા ધર્મ-વિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ - આ બંને રહે તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

न भा

❁ પરિષ્કૃત લક્ષણના આધારે સમન્વય ❁

પ્રસ્તુતમાં સાધ્યતાનિરૂપિતસંસર્ગતાવિશિષ્ટ છે - સંયોગ. સંયોગમાં સંયોગિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ખરી, પણ તે ધર્મવિધયા છે. કારણ કે સંયોગ સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ છે. સંયોગમાં સંબંધવિધયા પ્રતિયોગિતા-અવચ્છેદકતા તો જ જાય જો સંયોગસંબંધથી તમે અભાવ લો. જ્યારે પ્રસ્તુત અભાવ તો સમવાય સંબંધથી લેવામાં આવેલ છે. (કારણ કે સંયોગથી સંયોગિઅભાવ પર્વતમાં મળે

प्रतियोगितायां स्यात्, न तु साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठा या संसर्गीयाऽवच्छेदकता तन्निरूपकत्वम्, संयोगस्य तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अनवच्छेदकत्वात् । यदि संयोगः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकः भवेत् तदा तादृशसंयोगनिष्ठा या संसर्गीयाऽवच्छेदकता तन्निरूपकत्वं तादृशाभावीयप्रतियोगितायां सम्भवेत् । संयोगः साध्यतायाः सम्बन्धविधयाऽवच्छेदकोऽस्ति इति संयोगनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वं साध्यतायां सम्भवति, किन्तु तादृशाऽभावीयप्रतियोगितायां नैव सम्भवति । तथा च समवायेन संयोग्यभावीयप्रतियोगिता न साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपिका इति ।

किञ्च तादृशाऽभावीयप्रतियोगिता साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-विशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपिकाऽपि नास्ति । साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टः वह्नित्वसमवायः वर्तते, तस्य धर्मविधया साध्यतायाः अवच्छेदकत्वात् । वह्नित्वसमवाये तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकता वर्तते किन्तु सा संसर्गीयाऽवच्छेदकता, वह्नित्वसमवायस्य तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधयाऽवच्छेदकत्वात् । तादृशी संसर्गीयावच्छेदकता न केनाऽपि सम्बन्धेनाऽवच्छिन्ना भवति, सम्बन्धनिष्ठावच्छेदकतायाः सम्बन्धेनाऽनवच्छिन्नत्वाऽभ्युपगमात् । तथा च वह्नित्वसमवाये तादृशाऽभावीयप्रतियोगितानिरूपिता यत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता नैव सम्भवति, वह्नित्वसमवायस्य धर्मविधया तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकत्वे एव तत्सम्भवात् । तादृशाभावीयप्रतियोगितायाः धर्मविधया संयोगेनाऽवच्छिन्नत्वम्, अतः तादृशाऽभावीयप्रतियोगितायां संयोगनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतानिरूपकत्वं सम्भवति, किन्तु वह्नित्वसमवायनिष्ठयत्किञ्चित्सम्बन्धाव-

य शो ल ता

જ નહીં. મળે તોય કામ લાગે નહીં.) માટે, સંયોગિઅભાવીયપ્રતિયોગિતામાં તાદૃશસંયોગનિષ્ઠા યા સંબંધવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ નહીં રહે.

તથા સંયોગિઅભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવન્નિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ પણ નથી રહેતું. કારણ કે પ્રસ્તુતમાં સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટ છે - વહ્નિત્વસમવાય કે સમવાય. તે સમવાયનિષ્ઠા પ્રતિયોગિતાઅવચ્છેદકતા સંબંધવિધયા છે, ધર્મવિધયા નથી. કારણ કે સમવાય તાદૃશસંયોગિઅભાવીયપ્રતિયોગિતાનો સંબંધવિધયા જ અવચ્છેદક છે, ધર્મવિધયા નહીં. માટે, ધર્મવિધયા

વિ ન ભા

च्छिन्नाऽवच्छेदकतानिरूपकत्वं नैव सम्भवति, वह्नित्वसमवायनिष्ठायाः प्रतियोगितानिरूपिताऽवच्छेदकतायाः केनाऽपि सम्बन्धेनाऽनवच्छिन्नत्वात् । साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टश्च वह्नित्वसमवायः एव, न तु संयोगः इति साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वसमवायनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेऽपि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वसमवायनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतानिरूपकत्वं नास्ति एव ।

य शो ल ता

ततश्च वह्नित्वसमवायसम्बन्धावच्छिन्न-संयोगावच्छिन्नप्रतियोगिताकसंयोग्यभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावन्निष्ठसंसर्गीयावच्छेदकतानिरूपकत्वमपि नास्ति, साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वमपि नास्ति, तर्हि कुतः तादृशाऽभावग्रहणं सम्भवति ? कुतः तमादायाऽव्याप्तिश्च ? एवं समवायेन संयोग्यभावमादाय याऽव्याप्तिर्भवति तस्या अपि निराकरणं कर्तव्यम्, 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र च समवायेन संयोग्यभावमादाय याऽव्याप्तिरुपदर्शिता तस्याः अपि निराकरणमनया दिशा स्वयमूहनीयम् ।

अत्र संयोगेन वह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य वह्नित्वसमवायस्यैव साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टत्वात्, तादृशाभावीयप्रतियोगितानिरूपितसंसर्गीयावच्छेदकताविशिष्टस्य

●

પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં નહીં રહે.

આમ, બે પરિષ્કારમાંથી એક પણ પરિષ્કાર સંયોગિઅભાવીયપ્રતિયોગિતામાં ઘટતા નથી.

વિ ન

માટે, સંયોગિઅભાવ નહીં લઈ શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. તેમાં ધૂમ અવૃત્તિ. માટે, લક્ષણસમન્વય અને અવ્યાપ્તિનિરાકરણ.

મા

આ રીતે આપણે ફાઈનલ લક્ષણ બનાવ્યું. આ જ લક્ષણ ઉપર હવે આગળ ચર્ચા થશે. માટે આ લક્ષણ મગજમાં બરાબર સ્થિર કરવું. ગુજરાતી લક્ષણો (= સાદી સરળ ભાષામાં જણાવેલા લક્ષણો) બોલવામાં તથા સમજવામાં સરળ છે તેના આધારે સૌ પ્રથમ લક્ષણસમન્વય થાય છે કે નહીં તે જોઈ લેવું. પછી નવ્યન્યાયશૈલિથી પરિષ્કૃત લક્ષણ મુજબ લક્ષણસમન્વય થાય છે કે નહીં તે વિચારવું. જેથી સમજવામાં ઘણી સરળતા રહેશે.

संयोगस्यैव साध्यतानिरूपितसंसर्गताविशिष्टत्वाच्च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपित-संसर्गताविशिष्टसंयोगनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धाव-च्छिन्नाऽवच्छेदकताविशिष्टवह्नित्वसमवायनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वस्य च सत्त्वात् । तादृशाऽभावाधिकरणं न पर्वतः किन्तु जलह्रदादिकमेव, धूमस्तत्राऽवृत्तिरेव इति धूमे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्स-म्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगिता-निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावसत्त्वेन लक्षणसमन्वयात् कुतः अव्याप्त्याशङ्काऽपि ?

अत्र "साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चि-त्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरण-निरूपितवृत्तित्वाऽभावः - इत्येवं पूर्वोक्तलक्षणाऽभ्युपगमेऽपि 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादाय नाऽव्याप्तिः सम्भवत्येव, तादृशाऽभावीयप्रतियोगि-तायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकता-निरूपकत्वविरहेण तादृशाऽभावस्याऽग्राह्यत्वात् । अतः 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्येतत्स्थलाऽनुसरणं न्याय्यमेवे"ति स्पष्टमेव ।

एतावता "–'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादाय अव्याप्तिवारणाय लक्षणे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेद-कतानिरूपकत्वमभावीयप्रतियोगितायाः विशेषणविधया प्रवेशनीयम् । तथा च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरण-

य शो ल ता

●

❋ સમવાય - વહ્નિત્વસમવાય એક નહીં, અવ્યાપ્તિ ફોક ❋

અંતે એક વાત જણાવી દઈએ. આ પરિષ્કાર કેમ કરવો પડ્યો તેના માટે જે અવ્યાપ્તિ આપી હતી તે ફરીથી રિફર કરો. તેમાં વહ્નિત્વસમવાય અને સમવાય બંનેને સાધ્યતાઅવચ્છેદક માન્યા હતા. જો સમવાયને સાધ્યતાઅવચ્છેદક ધર્મ ન માનો તો અવ્યાપ્તિ આવે જ નહીં. કારણ કે સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતા-અવચ્છેદકતાવિશિષ્ટ વહ્નિત્વસમવાય જ છે, સમવાય નહીં. સંયોગિઅભાવીયપ્રતિયોગિતા-અવચ્છેદકતા વહ્નિત્વસમવાયમાં તો જતી જ નથી, સમવાયમાં જ જાય છે. માટે, સાધ્યતા-નિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટવહ્નિત્વસમવાયનિષ્ઠપ્રતિયોગિતા-

વિ ન ભા

निरूपितवृत्तित्वाभावः' - इत्येतदर्थकमिदं 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम् ।

- 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन साध्यतायां च वृत्तिनियामकवह्नि-संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय लक्षणे प्रतियोगितावि‌शेषणविधया साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं प्रवेशनीयम् । ततश्च 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यर्थकम् 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धाव-च्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्ति-त्वाभावः' - इत्येवं लक्षणमभ्युपेयमिति ।

- 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा संयोग्यभावमादायाऽव्याप्तिवारणाय प्रतियोगितानिरूपिता या अवच्छेदकता सा अपि धर्मविधया

●

અવચ્છેદકતાનિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં નહીં જાય. કારણ કે વહ્નિત્વસમવાય સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક બનતો જ નથી. તેથી સંયોગિઅભાવ હવે લઈ નહીં શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. તેમાં ધૂમ અવૃત્તિ. માટે લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ આવશે જ નહીં. અને તેથી જ અવ્યાપ્તિ દૂર કરવા માટે કરેલો પરિષ્કાર પણ વ્યર્થ ઠરશે.

★ સમવાયની જગ્યાએ વહ્નિત્વસમવાય લઈને અવ્યાપ્તિ ★

તેથી જે સમવાયને સાધ્યતાઅવચ્છેદક ન માનતા હોય તે લોકોના મતે વહ્નિત્વસમવાય-સંબંધથી સંયોગિઅભાવ લઈને આપત્તિ આપવી. પર્વત ઉપર જો સમવાયસંબંધથી કોઈ સંયોગી ન રહેતા હોય તો વહ્નિત્વસમવાયસંબંધથી તો સુતરામ્ ન જ રહે.

આ અભાવના

પ્રતિયોગિતાઅવચ્છેદક ધર્મ - સંયોગ.

પ્રતિયોગિતાઅવચ્છેદક સંબંધ - વહ્નિત્વસમવાય.

संसर्गविधया च प्रवेशनीया । तथा च 'सम्बन्धविधया यः साध्यताऽवच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यर्थकं 'साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठसंसर्गीयावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्ट-निष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इति एवं लक्षणमुपेयम् एवे"***ति फलितम् ।***

●

વહ્નિત્વસમવાયમાં પણ સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા હવે જશે. માટે સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટવહ્નિત્વસમવાય-નિષ્ઠસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં જશે. આમ, સંયોગિઅભાવીયપ્રતિયોગિતામાં બન્ને પરિષ્કાર ઘટી જવાને કારણે સંયોગિ-અભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. ધૂમ તેમાં અવૃત્તિ, લક્ષણઅસમન્વય અને અવ્યાપ્તિ.

આ અવ્યાપ્તિને દૂર કરવા માટે અમે જે પરિષ્કાર હમણાં ગુજરાતીમાં + સંસ્કૃતમાં બતાવ્યો તે સ્વીકારવો જ પડશે. જો તે પરિષ્કાર સ્વીકારો તો આ આપત્તિને કોઈ અવકાશ નહીં રહે. તે આ રીતે - ગુજરાતી મુજબ

સ્થલ - **पर्वतो वह्नित्वसमवायिमान् धूमात् ।**

સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય. સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ. અભાવ - વહ્નિત્વસમવાયથી સંયોગિઅભાવ. પ્રતિયોગિતાઅવચ્છેદક ધર્મ - સંયોગ. પ્રતિયોગિતાઅવચ્છેદક સંબંધ - વહ્નિત્વસમવાય.

સ્પષ્ટ છે કે, પ્રસ્તુત સ્થલમાં જે સાધ્યતાઅવચ્છેદક સંબંધ છે તે પ્રતિયોગિતાઅવચ્છેદક સંબંધ નથી. કારણ કે સાધ્યતાઅવચ્છેદકસંબંધ સંયોગ છે. જ્યારે પ્રતિયોગિતાઅવચ્છેદક સંબંધ વહ્નિત્વસમવાય છે. તથા જે સાધ્યતાઅવચ્છેદક ધર્મ છે તે પ્રતિયોગિતાઅવચ્છેદક ધર્મ નથી. કારણ કે સાધ્યતાઅવચ્છેદક ધર્મ છે - વહ્નિત્વસમવાય. જ્યારે પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે - સંયોગ.

આ રીતે, પ્રસ્તુત પરિષ્કારમાંથી વહ્નિત્વસમવાયસંબંધથી સંયોગિઅભાવ પાસ નહીં થાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. કારણ કે તેનો પ્રતિયોગિતાઅવચ્છેદક સંબંધ અને ધર્મ બંને અનુક્રમે સાધ્યતાઅવચ્છેદક સંબંધ અને ધર્મ છે. આ અભાવનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે.

⌘ પરિષ્કૃત લક્ષણ મુજબ સમન્વય ⌘

સંસ્કૃત મુજબ - સંયોગિઅભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવત્સંયોગસંબંધનિષ્ઠા યા સમ્બન્ધવિધયા અવચ્છેદકતા તન્નિરૂપકત્વ નથી. કારણ કે સંયોગિઅભાવીય જે પ્રતિયોગિતાઅવચ્છેદકતા સંયોગમાં જાય છે તે ધર્મવિધયા જાય છે. સંબંધવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તો વહ્નિત્વસમવાયમાં રહે. માટે સંયોગનિષ્ઠા યા સંબંધવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ પ્રસ્તુત સંયોગિઅભાવીયપ્રતિયોગિતામાં રહેતું નથી.

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવાન્ વહ્નિત્વ-સમવાય છે. કારણકે પ્રસ્તુત સ્થલમાં ધર્મવિધયા સાધ્યતાઅવચ્છેદક વહ્નિત્વસમવાય છે. વહ્નિત્વસમવાયમાં સંયોગિઅભાવીય જે પ્રતિયોગિતાઅવચ્છેદકતા જાય છે તે સંબંધવિધયા જાય છે. ધર્મવિધયા જતી નથી. માટે, વહ્નિત્વસમવાયનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતા-અવચ્છેદકતા તન્નિરૂપકત્વ વહ્નિત્વસમવાયથી જે સંયોગિઅભાવ લીધો છે તેની પ્રતિયોગિતામાં નહીં રહે. જો વહ્નિત્વસમવાયમાં સંયોગિઅભાવીયપ્રતિયોગતાઅવચ્છેદકતા ધર્મવિધયા રહેતી હોત (અર્થાત્ વહ્નિત્વસમવાય જો ધર્મવિધયા તાદશઅભાવીયપ્રતિયોગિતાઅવચ્છેદક બનતો હોત) તો વહ્નિત્વસમવાયનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં રહેત. કિંતુ ધર્મવિધયા સંયોગિઅભાવીયપ્રતિયોગિતા-અવચ્છેદકતા વહ્નિત્વસમવાયમાં જતી નથી, સંયોગમાં જાય છે. માટે, સંયોગનિષ્ઠા યા ધર્મ-વિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં રહે, કિંતુ વહ્નિત્વસમવાયનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીય-પ્રતિયોગિતામાં ન રહે.

વિ
ના
મ્રા

આમ, સંયોગિઅભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવત્સંયોગસંબંધનિષ્ઠા યા સમ્બન્ધવિધયા પ્રતિયોગિતા-અવચ્છેદકતા તન્નિરૂપકત્વ પણ નથી રહેતું અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટવહ્નિત્વ-સમવાયનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ પણ નથી રહેતું.

માટે, સંયોગિઅભાવ લઈ નહીં શકાય. સંયોગસંબંધથી વહ્નિત્વસમવાયિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર !

⌘ શબ્દશઃ પંક્તિનો અર્થ, ભાવાર્થ બાદ ⌘

ખૂબ જ શાંત ચિત્તે વારંવાર આ પદાર્થની વિભાવના કરવી. આ પદાર્થ દૃઢ કરવા

न, तत्समवायिनः संयोगेन साध्यतायां तत्समवायिनः समवायेनाऽभावीयप्रतियोगितायाः वारणाय साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकताकत्वस्य

●

एतदेवाह - **तत्समवायिनः संयोगेन साध्यतायाम्**, अत्र तत्समवायितया घटत्व-पटत्वादि-समवायिग्रहणमपि शक्यमेव, तथापि पूर्वं पर्वतपक्षक-धूमहेतुकस्थलस्य गृहीतत्वेन तत्रैव वह्नित्वसमवायिनः साध्यत्वाऽभ्युपगमे सामञ्जस्ये तत्स्वीकारस्यैवोचितत्वात् 'पर्वतो वह्नित्व-समवायिविशिष्टः धूमाद्' - इत्येतत्स्थले - इत्यर्थः । **तत्समवायिनः** = वह्नित्वसमवायिनः **समवायेनाऽभावीयप्रतियोगितायाः वारणाय** = समवायसम्बन्धावच्छिन्न-वह्नित्वसमवायावच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावमादायाऽव्याप्तिवारणाय लक्षणे प्रतियोगितायाः विशेषण-विधया **साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकताकत्वस्य** = साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठावच्छेदकतानिरूपकत्वस्य, अस्य च **'प्रवेशनीयत्वाद्'** - इत्यग्रेतनपदेन सममन्वयः । तथा च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादाय, समवाय-सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय च या अव्याप्तिः भवति तन्निवारणं 'साध्यता-वच्छेदकीभूतसम्बन्धाऽवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरण-

●

માટે સંસ્કૃતમાં તથા ગુજરાતીમાં જે લક્ષણ આપેલ છે તેનો દરેક સ્થલમાં સમન્વય ફરીથી એક વાર વિચારી જવો. તથા દરેક પદનું પદકૃત્ય પણ વિચારી જવું. હવે મૂળ પંક્તિનો શબ્દાર્થ જોઈ લઈએ -

(શબ્દાર્થ આમને આમ વાંચશો તો અસ્પષ્ટ જ લાગશે. પહેલા ઉપરનો ભાવાર્થ શાંત ચિત્તે મગજમાં સ્થિર કરી શબ્દાર્થ જોશો તો જ વ્યવસ્થિત સમજાશે. તથા જ્યાં શબ્દભેદ હશે. પણ, અર્થભેદ નહીં હોય તેવા સ્થલે મતિ મૂંઝાશે નહીં.)

शब्दार्थ :- तत्समवायी = वह्नित्वसमवायी એ જ્યારે સંયોગસંબંધથી સાધ્ય હશે ત્યારે એટલે કે **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થલે સમવાયસંબંધથી વહ્નિત્વસમવાયિ-અભાવની પ્રતિયોગિતાનું વારણ કરવા માટે સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠ(પ્રતિયોગિતા)-અવચ્છેદકતાનિરૂપકત્વ જે અભાવીયપ્રતિયોગિતામાં જાય... ઈત્યાદિ પરિષ્કાર કરવો પડશે અને એ જ સ્થલમાં સંયોગસંબંધથી વહ્નિસંયોગિઅભાવની પ્રતિયોગિતાનું વારણ કરવા માટે સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્ન(સાધ્યતા)અવચ્છેદકતાવન્નિષ્ઠ(પ્રતિયોગિતા)-અવચ્છેદકતાનિરૂપકત્વનો પ્રવેશ કરવો પડશે. (પ્રસ્તુતમાં મુદ્રિતપ્રતિમાં **'वन्निष्ठावच्छेदक-**

गूढार्थ *तत्संयोगिनः संयोगेनाभावप्रतियोगितायाः वारणाय साध्यतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावन्निष्ठावच्छेदक(ताक)त्वस्य (च) प्रवेशनीयत्वात्,*

●

निरूपितवृत्तित्वाभावः' इत्येवं लक्षणाऽभ्युपगमेऽपि सम्भवति। किन्तु तादृशलक्षणस्यैवाऽभ्युपगमे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन, उपलक्षणाद् वह्नित्वसमवायेन च, वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः भवतीति तन्निवारणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यर्थकं 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकसाध्यतावच्छेदकीभूतधर्माऽवच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयमिति भावः ।

यशोलता किञ्च, 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र वक्ष्यमाणाऽऽपत्तिसम्भवेऽपि स्थलपरावर्तने गौरवात् पुनः 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव अव्याप्तिः दर्श्यते - 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां **तत्संयोगिनः** = वृत्तिनियामकवह्निसंयोगिनः **संयोगेन अभावप्रतियोगितायाः वारणाय** = संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिवारणाय, उपलक्षणात् पूर्वोक्तस्थले एव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय, लक्षणे प्रतियोगितावि‌शेषणविधया **साध्यतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावन्निष्ठावच्छेदकताकत्वस्य** = साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य, **प्रवेशनीयत्वादिति** । यत्किञ्चित्सम्बन्धावच्छिन्नत्वविशेषणात् साध्यतानिरूपिता धर्मविधया या अवच्छेदकता तस्या एव ग्रहणं सम्भवति । अत्र **मुद्रितप्रतौ 'साध्यतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावन्निष्ठावच्छेदकत्वस्य'** - इति पाठः, सः

●

विना **त्वस्य**'.... આટલો જ પાઠ છે. પણ, તે અશુદ્ધ છે. કારણ કે (૧) પ્રતિયોગિતામાં અવચ્છેદકતા ન આવે. કિંતુ પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ આવે, (૨) પૂર્વે પણ પ્રથમ પરિષ્કાર વખતે અવચ્છેદકતાકત્વ જ લખેલ છે. (૩) અર્થના સંદર્ભથી પણ અવચ્છેદકતાકત્વ પાઠ જ સુસંગત જણાય છે. માટે, **अवच्छेदकताकत्व** - આ રીતે પાઠ પ્રસ્તુતમાં અમે લીધેલ છે. વિજ્ઞ વાચકવર્ગે આ વાત ધ્યાનમાં રાખવી.) તથા સમવાયસંબંધથી સંયોગિઅભાવની

संयोगिनः समवायेनाभावीयप्रतियोगितावारणाय च प्रतियोगितावच्छेदकताया अपि धर्म-संसर्गविधया प्रवेशनीयत्वात् ।

चाऽशुद्धः इति अपेक्षितः पाठः योजितः इति ध्येयम् ।

तथा च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूत-धर्मावच्छिन्नप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणाऽभ्युपगमे 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः स्यादिति अव्याप्त्यापादकतादृशाऽभावीयप्रतियोगितायाः वारणाय = तादृशं विशेषणं प्रतियोगितायाः लक्षणे योजनीयम्, येन तादृशप्रतियोगिता ग्रहीतुमेव न शक्यते, तथा करणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येतदर्थकं 'साध्यतानिरूपित-संसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकसाध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-विशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम् इति भावः ।

किञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव **संयोगिनः समवायेन अभावीयप्रतियोगितावारणाय च** लक्षणे **प्रतियोगिताऽवच्छेदकतायाः अपि धर्म-संसर्गविधया प्रवेशनीयत्वात् ।** उपलक्षणात्, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन वह्नित्वसमवाय्य-भावमादाय 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय च अव्याप्ति-वारणायाऽपि लक्षणे प्रतियोगितावच्छेदकता धर्म-संसर्गविधया प्रवेशनीयेति बोध्यम् ।

तथा च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरण-निरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणाऽभ्युपगमे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च संयोग्यभावमादाय अव्याप्तिः स्यादिति तन्निवारणाय 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्यर्थकं

પ્રતિયોગિતાનું વારણ કરવા માટે પ્રતિયોગિતાઅવચ્છેદકતા પણ લક્ષણમાં ધર્મવિધયા અને સંબંધવિધયા બે રીતે પ્રવિષ્ટ કરવી પડશે.

'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठा या संसर्गविधया अवच्छेदकता तन्निरूपिका, साध्यतानिरूपित-यत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठा या धर्मविधया अवच्छेदकता तन्निरूपिका च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्ट-निष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम्, अत्र साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-विशिष्टनिष्ठा या प्रतियोगितानिरूपिताऽवच्छेदकता तस्याः यत्किञ्चित्सम्बन्धावच्छिन्नत्वेन विशेषणात्

य शो ल ता

▒ સરળ અને સખત - બન્ને શૈલિમાં લક્ષણ ▒

ફલિત લક્ષણ :- **(A) સામાન્યભાષામાં** -

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મ હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધ હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

(B) નવ્ય ન્યાયની પરિષ્કૃત શૈલિમાં -

જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠા યા સંબંધવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તન્નિરૂપકત્વ અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્ન(સાધ્યતા)અવચ્છેદકતાવન્નિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તન્નિરૂપકત્વ રહેતું હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

વિ ન ભા

આ લક્ષણ સ્વીકારવાથી **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થલમાં

(૧) સમવાયથી વહ્નિત્વસમવાયિઅભાવ,

(૨) સંયોગથી વહ્નિસંયોગિઅભાવ અને

(૩) સમવાયથી સંયોગિઅભાવ લઈ નહીં શકાય.

(હવે મૂળની ૬-૭ પંક્તિ પછી **'एतेन'** કહીને ગ્રંથકાર પૂર્વપક્ષ ઉઠાવવાના છે. વસ્તુતઃ તે પૂર્વપક્ષ અહીં આવે. પણ સંસ્કૃતની શૈલિ મુજબ ઉત્તરપક્ષ બતાવ્યા પછી **एतेन...निरस्तम्** ઈત્યાદિ કહી પૂર્વપક્ષ પણ બતાવી દેવામાં આવે છે. માટે, અત્યારે વિસ્તારથી પૂર્વપક્ષ બતાવીશું. જ્યારે પંક્તિ આવશે ત્યારે તેટલો વિસ્તાર નહીં કરીએ. **अवहितमनसा पठितव्यम्** -)

धर्मविधया या अवच्छेदकता सैव गृह्यते ।

एवञ्च साध्यतावच्छेदकतायाः अपि धर्म-संसर्गविधया प्रवेशः कर्तव्यः, प्रतियोगिताऽवच्छेदकतायाः अपि धर्म-संसर्गविधया प्रवेशः कर्तव्यः एवेति फलितम् ।

अत्र चोपदर्शितः शब्दार्थः पूर्वोपदर्शितभावार्थानुसारेणैव स्पष्टीभविष्यतीति ध्येयम् ।

अथ 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च संयोग्यभावमादाय या अव्याप्तिः भवति तन्निवारणाय 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं बृहल्लक्षणाऽभ्युपगमाऽपेक्षा नास्त्येव, न हि अत्र प्रतियोगिताऽवच्छेदकता धर्म-संसर्गोभयविधया प्रवेशनीया, धर्मविधया सम्बन्धविधया वा - एकतरविधया एव प्रवेशनीया ।

एतत्स्पष्टावबोधार्थमादौ कति लक्षणानि साध्यतावच्छेदकता-प्रतियोगितावच्छेदकत्वयोः उभयविधया प्रवेशाऽप्रवेशमाश्रित्य भवन्ति तद्दृष्टव्यम् । भङ्गकरचना एवं भवति -

	साध्यतावच्छेदकत्वम्		प्रतियोगितावच्छेदकत्वम्	
	धर्मविधया	सम्बन्धविधया	धर्मविधया	सम्बन्धविधया
१	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्
२	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
३	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
४	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
५	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्
६	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
७	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
८	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
९	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्
१०	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
११	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
१२	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्

१३	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्
१४	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
१५	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
१६	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्

अत्र आदिमभङ्गत्रयवर्तिलक्षणाङ्गीकारे न काचिदपि क्षतिः विद्यते । अत्र तावत् प्रत्येकभङ्गानुसारिलक्षणानि पश्चानुपूर्व्या प्रदर्श्यन्ते -

– अन्तिमभङ्गकाऽनुसारिलक्षणम् -

साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र साध्यतावच्छेदकतायाः प्रतियोगिताऽवच्छेदकतायाः वा नास्ति सम्बन्धविधया धर्मविधया च प्रवेशः ।

दोषः - एतल्लक्षणाङ्गीकारे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसवृत्तितावच्छिन्नप्रतियोगिताकवह्न्यभावम्, वह्नि-घटोभयाभावम्, समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावम्, संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावञ्चादायाऽव्याप्तिः, 'घटः, द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावम्, जलत्व-द्रव्यत्वोभयाभावम्, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावञ्चादाय अव्याप्तिश्च ।

– द्विचरमभङ्गकाऽनुसारिलक्षणम् -

साध्यतावच्छेदकावच्छिन्ना साध्यतावच्छेदकनिष्ठा या संसर्गविधया अवच्छेदकता तन्निरूपिका च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र या प्रतियोगिता साध्यतावच्छेदकनिष्ठा संसर्गविधया या अवच्छेदकता तन्निरूपिका भविष्यति सा साध्यतावच्छेदकावच्छिन्ना भविष्यत्येवेति साध्यतावच्छेदकाऽवच्छिन्नत्वं न निवेश्यम् । तथा च साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इति लक्षणम् ।

दोषः - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसवृत्तितावच्छिन्नप्रतियोगिताकवह्न्यभावम्, वह्नि-घटोभयाभावम्, घटाभावञ्चादायाऽव्याप्तिः । समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टसमवायस्य साध्यतावच्छेदकत्वाभावात्, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वेऽपि तादृशवह्नित्वनिष्ठावच्छेदकतायाः संसर्गीयत्वाभावात् । 'घटो द्रव्यत्ववान्,

पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावञ्चादायाऽव्याप्तिः । कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽव्याप्तिः न सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य कालिकस्य साध्यतावच्छेदकत्वाभावेन, तादृशाभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतद्रव्यत्वत्वनिष्ठाऽवच्छेदकतानिरूपकत्वेऽपि तादृशद्रव्यत्वत्वनिष्ठावच्छेदकतायाः संसर्गीयत्वाभावेन च तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वाऽसम्भवात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

– चतुर्दशभङ्गकाऽनुसारिलक्षणम् -

साध्यतावच्छेदकाऽवच्छिन्ना, साध्यतावच्छेदकनिष्ठा या धर्मविधयाऽवच्छेदकता तन्निरूपिका च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र साध्यतावच्छेदकनिष्ठा या धर्मविधया अवच्छेदकता तन्निरूपिका या प्रतियोगिता भवति सा साध्यतावच्छेदकाऽवच्छिन्ना भवत्येव इति लक्षणे तन्निवेशनं नोचितमिति । धर्मविधया या अवच्छेदकता सा यत्किञ्चित्सम्बन्धावच्छिन्ना भवत्येवेति साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इति लक्षणम् ।

दोषः - पर्वतो वह्निमान् धूमाद् - इत्यत्र समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तिः । संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तितावच्छिन्नवह्न्यभावम्, वह्नि-घटोभयाभावं वा आदाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टानां घटत्व-महानसवृत्तितावच्छिन्नवह्नित्व-वह्निघटोभयत्वानां साध्यतावच्छेदकत्वाभावात्, तादृशाऽभावीयप्रतियोगितानां साध्यतावच्छेदकीभूतसंयोगनिष्ठाऽवच्छेदकतानिरूपकत्वेऽपि तादृशसंयोगनिष्ठावच्छेदकतायाः यत्किञ्चित्सम्बन्धावच्छिन्नत्वाभावात्तादृशाभावीयप्रतियोगितासु साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वविरहेण तादृशाऽभावानामग्राह्यत्वादिति ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' इत्यत्र कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽव्याप्तिः भवति । जलत्वविशिष्टद्रव्यत्वाभावं द्रव्यत्वजलत्वोभयाभावं वा आदाय न प्रकृतेऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टयोः जलत्वविशिष्टद्रव्यत्वत्व-द्रव्यत्वजलत्वोभयत्वयोः साध्यतावच्छेदकत्वाभावेन, साध्यतावच्छेदकीभूतसमवायनिष्ठावच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगित्वयोः सत्त्वेऽपि

तादृशसमवायनिष्ठावच्छेदकताया यत्किञ्चित्सम्बन्धावच्छिन्नत्वाऽभावेन च तादृशाऽभावीयप्रतियोगित्वयोः साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वविरहेण तादृशाऽभावस्याऽग्राह्यत्वादिति ।

– त्रयोदशभङ्गानुसारिलक्षणम् -

साध्यतावच्छेदकनिष्ठा या सम्बन्धविधया अवच्छेदकता तन्निरूपिका, साध्यतावच्छेदकनिष्ठा या धर्मविधया अवच्छेदकता तन्निरूपिका च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणं भवति । परिष्कारशैल्या च इदमेव इत्थम् अभिधीयते यदुत 'साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः ।'

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तितावविशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावं वादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयावच्छेदकताविशिष्टस्य संयोगस्य साध्यतावच्छेदकत्वेऽपि तादृशप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य घटत्व-महानसवृत्तितावविशिष्टवह्नित्व-वह्निघटोभयत्वादेः साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितासु साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावानामग्राह्यत्वात् ।

एवं समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य वह्नित्वस्य साध्यतावच्छेदकत्वेऽपि तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य समवायस्य साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्राऽपि जलत्वविशिष्टद्रव्यत्वाभावं जलत्वद्रव्यत्वोभयाभावं वाऽऽदाय नाऽव्याप्तिसम्भवः, तादृशाभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य समवायस्य साध्यतावच्छेदकत्वेऽपि तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य जलत्वविशिष्टद्रव्यत्वत्वस्य जलत्व-द्रव्यत्वोभयत्वस्य च

साध्यतानवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगित्वयोः साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यताऽवच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टस्य द्रव्यत्वत्वस्य साध्यतावच्छेदकत्वेऽपि तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य कालिकस्य साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

दोषः - 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र उक्तलक्षणाऽङ्गीकारे अनेकधा अव्याप्तिः भवति । तथा हि - (१) समवायेन वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यात् । उक्ताऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः समवायः तस्याऽपि 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायात् साध्यतावच्छेदकत्वम्, धर्मविधया यः अवच्छेदकः वह्नित्वसमवायः तस्याऽपि साध्यतावच्छेदकत्वम् अस्ति । अतः उक्ताऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य समवायस्याऽपि साध्यतावच्छेदकत्वेन उक्ताऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टस्य वह्नित्वसमवायस्याऽपि साध्यतावच्छेदकत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वस्य च सत्त्वात्तादृशाऽभावः गृह्यते एव, तादृशाऽभावाधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति धूमे साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहेण लक्षणाऽसमन्वयाद् भवेदेव अव्याप्तिः ।

(२) वह्नित्वसमवायेन वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यात् । उक्ताऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टः वह्नित्वसमवायः अपि साध्यतावच्छेदकः, उक्ताऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टः वह्नित्वसमवायः अपि साध्यतावच्छेदकः इति तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वस्य च सत्त्वेन तादृशाऽ-

भावस्य ग्राह्यत्वात्पूर्वोक्तरीत्या भवेदेवाऽव्याप्तिः ।

(३) उक्तस्थले एव शुद्धसंयोगेन वह्नित्वसमवायिनः साध्यतायां शुद्धसंयोगेन वृत्तिनियामक-वह्निसंयोग्यभावमादायाऽव्याप्तिः स्यात् । उक्ताऽभावीयप्रतियोगितायाः यः सम्बन्धविधया अवच्छेदकः संयोगः सोऽपि साध्यतावच्छेदकः, यः धर्मविधया अवच्छेदकः वृत्तिनियामकवह्निसंयोगः सोऽपि साध्यतावच्छेदकः इति उक्ताऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य संयोगस्य तादृशप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य वृत्तिनियामकवह्निसंयोगस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वं साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वञ्च स्यातामेवेति तादृशाऽभावः ग्रहीतुं शक्यते । तदधिकरणे पर्वते धूमस्य वृत्तित्वेन धूमे साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्याऽसम्भवेन भवेदेवाऽव्याप्तिः ।

य शो ल ता

(४) उक्तस्थले वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यत्वाऽभ्युपगमे वृत्तिनियामक-वह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यात् । तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टवृत्तिनियामकवह्निसंयोगोऽपि, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टवृत्तिनियामकवह्निसंयोगोऽपि साध्यतावच्छेदकः एवेति उक्ताऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वस्य च सत्त्वेन तादृशाऽभावः ग्रहीतुं शक्यते, तदधिकरणे पर्वते धूमस्य वृत्तित्वेन स्यादेव पूर्वोक्तरीत्या अव्याप्तिः इति ।

(५) एवञ्च उक्तस्थले एव वह्नित्वसमवायेन संयोग्यभावमादायाऽव्याप्तिः स्यात् । तादृशाऽभावीयप्रतियोगितायाः यः सम्बन्धविधया अवच्छेदकः वह्नित्वसमवायः यश्च धर्मविधया अवच्छेदकः संयोगः - एतद् द्वितयमपि साध्यतावच्छेदकमस्ति एवेति तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वस्य च सत्त्वेन तादृशाऽभावः ग्रहीतुं शक्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति पूर्वोक्तरीत्या लक्षणाऽसमन्वयाद् भवेदेव अव्याप्तिः ।

(६) एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽपि

अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः यः सम्बन्धविधया अवच्छेदकः समवायः यश्च धर्मविधया अवच्छेदकः संयोगः - एतद्द्वितयस्याऽपि साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्य साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वस्य च सत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् । तदधिकरणे च पर्वते धूमस्य वृत्तित्वाद् भवेदेव पूर्वोक्तरीत्या अव्याप्तिः ।

(७) एवमेव 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादाय अव्याप्तिः पूर्ववद् भावनीया । एतदव्याप्तिसप्तकं यद्यपि पूर्वोक्तलक्षणेषु अपि समस्ति तथापि तत्र एतदपेक्षया सरलतया आपादनीयाऽव्याप्तिसत्त्वेन 'पर्वतो वह्निमान्' - इत्यादिस्थलीयाऽव्याप्तिरेव प्रदर्शिता इत्यवधेयम् ।

– द्वादशभङ्गानुसारि लक्षणम् -

साध्यतावच्छेदकाऽवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र या प्रतियोगिता सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना भवेत् सा साध्यतावच्छेदकाऽवच्छिन्नाऽपि भवेदेवेति न तल्लक्षणे प्रवेशनीयम् । तथा च 'साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकतानिरूपकप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणं पर्यवसन्नम् ।

दोषः - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तिताविशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावं चाऽऽदायाऽव्याप्तिः तादृशाभावीयप्रतियोगितावच्छेदकसम्बन्धस्य संयोगस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगितासु साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावानां ग्राह्यत्वात् ।

अत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य समवायस्य वह्नित्वस्य वा एकस्याऽपि सम्बन्धविधया साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्य अग्राह्यत्वात् ।

एवमेव तल्लक्षणानुसारेण 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावञ्चादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य जलत्वविशिष्टद्रव्यत्वत्व-जलत्वद्रव्यत्वोभयत्वादेः सम्बन्धविधया साध्यताऽनवच्छेदक-

त्वेऽपि समवायस्य तादृशत्वेन तादृशाऽभावीयप्रतियोगित्वयोः साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावयोः ग्राह्यत्वात् ।

अत्र कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य कालिकस्य द्रव्यत्वत्वस्य वा एकस्यापि साध्यतानिरूपितसंसर्गताविशिष्टत्वाभावात् = सम्बन्धविधया साध्यताऽनवच्छेदकत्वात् । तथा च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्याऽसत्त्वेन न हि सः अभावः ग्रहीतुं शक्यते, येन तमादायाऽव्याप्तिः स्यादिति ।

– एकादशभङ्गानुसारिलक्षणम् -

साध्यतावच्छेदकावच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र या प्रतियोगिता सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना भवेत् सा साध्यतावच्छेदकाऽवच्छिन्ना भवेदेवेति लक्षणे तन्न निवेश्यम् । तथा च 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणम् ।

य शो ल ता

दोषः - अत्र तावदिदमवधेयं यदुत एतल्लक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः न सम्भवति, समवायेन वह्नित्वसमवाय्यभावीयप्रतियोगितानिरूपितसंसर्गीयावच्छेदकताविशिष्टस्य समवायस्य साध्यतावच्छेदकत्वेऽपि सम्बन्धविधया साध्यतावच्छेदकत्वाभावात्तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वं नैव सम्भवेदिति तादृशाऽभावग्रहणमेवाऽशक्यं सञ्जातमिति कुतः तमादाय अव्याप्तिसम्भवः ?

एवञ्च वह्नित्वसमवायेन वह्नित्वसमवाय्यभावीयप्रतियोगितानिरूपितसंसर्गीयावच्छेदकताविशिष्टस्य वह्नित्वसमवायस्य साध्यतावच्छेदकत्वेऽपि सम्बन्धविधया साध्यतावच्छेदकत्वाभावात्तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वं नैव सम्भवेदिति तमादायाऽपि अव्याप्तिर्नैव सम्भवति ।

एवञ्च समवायेन वह्नित्वसमवायेन वा संयोग्यभावमादायाऽपि नाऽव्याप्तिसम्भवः एतल्लक्षणानुसारेण, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य वह्नित्वसमवायस्य समवायस्य च सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरू-

पितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र शुद्धसंयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः सम्भवत्येव, तादृशाऽभावीयप्रतियोगितानिरूपित-संसर्गीयाऽवच्छेदकताविशिष्टस्य संयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीय-प्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽ-भावस्य ग्राह्यत्वात् । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति भवेदेवाऽव्याप्तिः ।

एवम् उक्तस्थले एव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्ति-नियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽ-वच्छेदकताविशिष्टस्य वृत्तिनियामकवह्निसंयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽ-भावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वात् तादृशाऽभावस्य ग्रहीतुं शक्यत्वात् । तादृशाऽभावाधिकरणं च पर्वतः, धूमस्तत्र वृत्तिरिति भवेदेवाऽव्याप्तिः ।

एवञ्च 'पर्वतो वह्निमान् धूमाद्' - इत्यादौ संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तिताविशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावञ्चादायाऽव्याप्तिः सम्भवत्येव, तादृशाभावीय-प्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य संयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रति-योगितासु सत्त्वात् तादृशाभावाः ग्रहीतुं शक्यन्ते । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति अव्याप्तिः दुर्वारा ।

समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीय-प्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य समवायस्य सम्बन्धविधया साध्यताऽनवच्छेद-कत्वेन सम्बन्धविधया साध्यतावच्छेदके संयोगे तादृशाभावीयप्रतियोगितानिरूपितसंसर्गीया-वच्छेदकताविरहेण च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगितायां विरहात् तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावञ्चादायाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेद-कताविशिष्टस्य समवायस्य सम्बन्धविधया साध्यताऽवच्छेदकत्वेन साध्यतानिरूपितसंसर्गताविशिष्ट-

निष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्य तादृशाऽभावीयप्रतियोगित्वयोः सत्त्वात्तादृशाऽभावयोः ग्राह्यत्वात् ।

कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य कालिकस्य सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन साध्यतानिरूपितसंसर्गताविशिष्टसमवायस्य तादृशाभावीयप्रतियोगितायाः सम्बन्धविधयाऽनवच्छेदकत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसमवायनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

– दशमभङ्गानुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, साध्यतावच्छेदकीभूतः यः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या इदमेव इत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

य शो ल ता

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तितात्रिशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावं वा आदाय नाऽव्याप्तिः सम्भवति । उक्ताऽभावीयप्रतियोगितानिरूपितावच्छेदकताविशिष्टः यः संयोगः तत्र साध्यतानिरूपितसंसर्गता वर्तते इति तादृशाऽभावीयप्रतियोगितायां यद्यपि साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वम् अस्ति तथापि कोऽपि साध्यतावच्छेदकः धर्मः संसर्गो वा तादृशाऽभावीयप्रतियोगितानां धर्मविधया नास्ति अवच्छेदकः, यतः साध्यतावच्छेदको धर्मः प्रकृते वह्नित्वम्, सम्बन्धश्च संयोगः, तादृशाऽभावीयप्रतियोगिताश्च क्रमशः धर्मविधया घटत्व-महानसीयवह्नित्व-वह्निघटोभयत्वादिभिरवच्छिन्नाः इति तादृशाऽभावीयप्रतियोगितासु साध्यतावच्छेदकनिष्ठा या धर्मविधया अवच्छेदकता तन्निरूपकत्वं नास्ति एव, अतः साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वमपि नास्ति एवेति साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया तादृशाभावानां ग्रहणमशक्यमेवेति कुतः तत्तदभावानादायाऽव्याप्तिसम्भवः ?

एवञ्च समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायापि अव्याप्तिः न सम्भवति,

तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकताविशिष्टः यः समवायः, यच्च वह्नित्वं - तत्र एकस्मिन् अपि संसर्गविधया साध्यतावच्छेदकता नास्ति, सम्बन्धविधया संयोगे एव साध्यतावच्छेदकतायाः सत्त्वात् । संयोगश्च सम्बन्धविधया धर्मविधया वा नास्ति तादृशाभावीयप्रतियोगितावच्छेदक इति तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं नैव स्यात् । ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया अवच्छेदकं वह्नित्वं साध्यतावच्छेदकं वर्तते, अतः तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वं सम्भवत्येव ***तथापि*** उक्तयुक्त्या तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं न सम्भवति इति साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया समवायसम्बन्धाऽवच्छिन्नप्रतियोगिताकवह्न्यभावः नैव ग्रहीतुं शक्यते । किन्तु प्रकृते संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावः एव ग्राह्यः । तमादाय च पूर्वोक्तरीत्या लक्षणसमन्वयः कार्यः इति एतल्लक्षणाङ्गीकारे 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र उक्ताऽभावानादाय नास्त्यव्याप्तिरिति स्थितम् ।

एवमेव 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि नाऽव्याप्तिः सम्भवति जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावं वा आदाय । तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टः यः समवायः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन यद्यपि तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं वर्तते तथापि तादृशाऽभावीयप्रतियोगितायाः यद् धर्मविधया अवच्छेदकं जलत्वविशिष्टद्रव्यत्वत्वं जलत्व-द्रव्यत्वोभयत्वञ्च तत्र साध्यतावच्छेदकता नास्त्येव इति तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वस्य विरहात् साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया जलत्वविशिष्टद्रव्यत्वाभावस्य जलत्व-द्रव्यत्वोभयाभावस्य वा ग्रहणं न सम्भवतीति कुतः तमादायाऽव्याप्तिसम्भवः ?

एवम् उक्तस्थले एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः सम्भवति । ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यद् अवच्छेदकं द्रव्यत्वत्वं तत् साध्यतावच्छेदकमपि अस्ति इति साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता-

निरूपकत्वं तादृशाऽभावीयप्रतियोगितायां वर्तते ***तथापि*** तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकतात्वविशिष्टः यः कालिकः द्रव्यत्वत्वञ्च - तत्र नैकस्मिन्नपि साध्यतानिरूपितसंसर्गता वर्तते, तयोः सम्बन्धविधया साध्यताऽनवच्छेदकत्वात्, समवायस्यैव सम्बन्धविधया साध्यतावच्छेदकत्वादिति तादृशाभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं नैव सम्भवति इति साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यताऽवच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावस्य ग्रहणं नैव सम्भवतीति कुतः तमादायाऽव्याप्तिसम्भवः ? किन्तु अत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय लक्षणसमन्वयः पूर्ववद् भविष्यत्येवेति 'घटो द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र उक्ताऽभावानादाय नाऽव्याप्तिः सम्भवतीति स्थितम् ।

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवाय्यभावमादायाऽपि नाऽव्याप्तिसम्भवः । तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टः यः वह्नित्वसमवायः सः साध्यतावच्छेदकः अपि अस्ति इति तादृशाऽभावीयप्रतियोगितायां यद्यपि साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वं सम्भवति तथापि तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टः यः वह्नित्वसमवायः समवायश्च तत्र नैकस्मिन्नपि साध्यतानिरूपितसंसर्गता वर्तते, सम्बन्धविधया साध्यताऽनवच्छेदकत्वात्तयोरिति तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं नास्ति एव । एवं वह्नित्वसमवायेन वह्नित्वसमवाय्यभावीयप्रतियोगितायामपि साध्यतावच्छेदकीभूतवह्नित्वसमवायनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वं सम्भवति, किन्तु साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वं नैव सम्भवति, संयोगस्य प्रतियोगितानिरूपितावच्छेदकताविशिष्टत्वाभावादिति साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावस्य ग्रहणं नैव सम्भवति इति कुतः तमादाय अव्याप्तिसम्भवः ?

किन्तु उक्तस्थले एव संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः भविष्यति, वृत्तिनियामकवह्निसंयोगेन साध्यतायाञ्च वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय । तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टः

यः संयोगः वृत्तिनियामकवह्निसंयोगः वा, तस्य उभयस्याऽपि साध्यतानिरूपितसंसर्गताविशिष्टत्वात्, तादृशाऽभावद्वितयनिरूपितप्रतियोगित्वयोः साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं सम्भवत्येव । तादृशाभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वृत्तिनियामकवह्निसंयोगः तस्य प्रथमस्थले 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायवशाद् द्वितीयस्थले च न्यायानाश्रयणेऽपि साध्यतावच्छेदकत्वात्तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वमपि सम्भवत्येवेति साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावविधया संयोगेन वृत्तिनियामकवह्निसंयोगेन च वृत्तिनियामकवह्निसंयोग्यभावः गृह्यते एव । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति अव्याप्तिः स्यादेव ।

एवमुक्तस्थले एव समवायेन वह्नित्वसमवायेन च संयोग्यभावमादाय अव्याप्तिः भावनीया, तादृशाभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य संयोगस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टस्य संयोगस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वादिति ।

य शो ल ता

– नवमभङ्गकानुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । इदमेव परिष्कारशैल्या इत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तिताविशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावञ्चादाय अव्याप्तिः न सम्भवति, तादृशाभावीयप्रतियोगितानां सम्बन्धविधया यः अवच्छेदकः संयोगः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाभावीयप्रतियोगितासु साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितानां ये धर्मविधया अवच्छेदकाः घटत्व-महानसवृत्तिताविशिष्ट-

वह्नित्व-वह्निघटोभयत्वादयः तेषां साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितासु साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावानामग्राह्यत्वात् ।

एवं समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यदवच्छेदकं वह्नित्वं तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः समवायः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावं वादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगित्वयोः साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगित्वयोः धर्मविधया यत् जलत्वविशिष्टद्रव्यत्वत्वं जलत्व-द्रव्यत्वोभयत्वञ्च तत्र साध्यतावच्छेदकत्वविरहेण तादृशाऽभावीयप्रतियोगित्वयोः साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यदवच्छेदकं द्रव्यत्वत्वं तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः कालिकः तस्य सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्य अग्राह्यत्वात् ।

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः यः धर्मविधया अवच्छेदकः वह्नित्वसमवायः तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः समवायः वह्नित्वसमवायः वा तस्य सम्बन्धविधया साध्यताऽनव-

च्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः संयोगः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वृत्तिनियामकवह्निसंयोगः तस्य 'विशिष्टं शुद्धान्नातिरिच्यते' - इतिन्यायेन साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वस्याऽपि सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् ।

एवमुक्तस्थले वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः वृत्तिनियामकवह्निसंयोगः तस्य सम्बन्धविधया साध्यतायाः अपि अवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वृत्तिनियामकवह्निसंयोगः तस्याऽपि साध्यतावच्छेदकत्वेन उक्ताऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वस्य सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । य शो ल ता

किञ्च, 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्रैव संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादायाऽव्याप्तिः नैव सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः संयोगः तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः वह्नित्वसमवायः समवायः वा तस्य सम्बन्धविधया साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्याऽसत्त्वात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

– अष्टमभङ्गकानुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, साध्यतावच्छेदकाऽवच्छिन्ना च या प्रतियोगिता

तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना या प्रतियोगिता भवेत् सा प्रतियोगिता साध्यतावच्छेदकाऽवच्छिन्नाऽपि भवेदेवेति तस्य लक्षणे प्रवेशः व्यर्थः । तथा च 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणं पर्यवसितम् ।

अत्र अव्याप्तिः कुत्र भविष्यति कुत्र च न तत्संक्षेपतः विमृश्यते -

स्थलम् - पर्वतो वह्निमान् धूमात् ।

अभावाः - संयोगसम्बन्धावच्छिन्नप्रतियोगिताको घटाभावः, महानसवृत्तितावविशिष्टवह्न्यभावः वह्नि-घटोभयाभावश्च ।

- प्रकृते साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टं वह्नित्वम्, तस्य धर्मविधया साध्यतावच्छेदकत्वात् ।

- वह्नित्वं च नास्ति उक्ताऽभावीयप्रतियोगितानां धर्मविधया सम्बन्धविधया वा अवच्छेदकम्, तादृशाभावीयप्रतियोगितानां सम्बन्धविधया संयोगेनाऽवच्छिन्नत्वात्, धर्मविधया यथाक्रमं घटत्व -महानसीयवह्नित्व-वह्निघटोभयत्वादिभिः अवच्छिन्नत्वात् ।

- ततः तादृशाभावीयप्रतियोगितासु साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता विशिष्टवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वं नैव स्यात् ।

- ततः तादृशाभावाः नैव ग्रहीतुं शक्यन्ते ।

- ततो न तानादायाऽव्याप्तिसम्भवः ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य वह्नित्वस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावं वाऽऽदाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य जलत्वविशिष्टद्रव्यत्वत्वस्य जलत्व-द्रव्यत्वोभयत्वस्य वा धर्मविधया साध्यतानवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगित्वयोः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्ट-द्रव्यत्वत्वनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

उक्तस्थले एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽव्याप्तिः भवति, तादृशाभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्वस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य समवायस्य वह्नित्वसमवायस्य च धर्मविधया साध्यताऽवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यत्वमभ्युपगम्य संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन च साध्यत्वमभ्युपगम्य वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य संयोगस्य वृत्तिनियामकवह्निसंयोगस्य च साध्यतायाः धर्मविधया अवच्छेदकत्वाभावेन तादृशप्रतियोगित्वयोः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावयोरग्राह्यत्वादिति । य शो ल ता

उक्तस्थले एव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादाय अव्याप्तिः सम्भवति एव, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य वह्नित्वसमवायस्य समवायस्य च साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

– सप्तमभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणम् । अत्र पूर्वोक्तपरिष्कारस्य सत्त्वेन ***यथा*** पूर्वोक्तलक्षणे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धाव-

च्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तितात्रिशिष्टवह्न्यभावम्, वह्नि-घटोभयाभावञ्चादाय, 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावम्, जलत्व-द्रव्यत्वोभयाभावञ्चादाय, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावम्, वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावञ्चादाय नाऽव्याप्तिः सम्भवति ***तथा*** प्रकृतलक्षणेऽपि नैव भवति । वक्ष्यमाणलक्षणेषु अपि उक्ताऽभावानादायाऽव्याप्तिः नैव भविष्यति, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्नत्वलक्षणपरिष्कारस्य सर्वत्र सत्त्वेन तेनैव तत्परिहाराद् इति स्वयमूह्यम् ।

किञ्च, प्रकृतलक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य वह्नित्वस्य साध्यतायाः धर्मविधया अवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टस्य समवायस्य साध्यतावच्छेदकत्वाऽभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'घटो द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य द्रव्यत्वत्वस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः संसर्गविधया यः अवच्छेदकः कालिकः तस्य साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

अस्मिन् लक्षणे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादाय अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकताविशिष्टस्य वह्नित्वसमवायस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः यः सम्बन्धविधया अवच्छेदकः समवायः वह्नित्वसमवायः वा

तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयावच्छेदकता-निरूपकत्वस्याऽपि सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् ।

एवम् उक्तस्थले एव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादायापि अव्याप्तिः भवति, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकताविशिष्टस्य वह्नित्वसमवायस्य समवायस्य च धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धा-वच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः संसर्ग-विधया यः अवच्छेदकः वह्नित्वसमवायः समवायो वा तस्य साध्यतावच्छेदकत्वेन साध्यतावच्छेदक-निष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्यापि तादृशाऽभावीयप्रतियोगितायां सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वादिति ।

– षष्ठभङ्गानुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना साध्यतावच्छेदकाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना या प्रतियोगिता भवेत् सा साध्यतावच्छेदकाऽवच्छिन्ना भवेदेवेति लक्षणे नैव तन्निवेश्यम् । तथा च 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाव-च्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽ-भावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणम् ।

अत्र प्रागुक्तस्थलेषु घटाद्यभावानादाय अव्याप्तिपरिहारः यथा उपदर्शितः तथैवाऽत्रानुसन्धेयः इति पूर्वमुक्तमेव । तदतिरिक्ताऽभावानाश्रित्यैव अव्याप्तिसत्त्वासत्त्वप्रदर्शनं कुर्मः इति अवधेयम् ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽ-व्याप्तिः भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यदवच्छेदकं वह्नित्वं तस्यैव धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽव-च्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाभावस्य ग्राह्य-त्वात् ।

एवं 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वा-भावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यदवच्छेदकं द्रव्यत्वत्वं तस्यैव धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चि-

त्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतानिरूपकत्व-सत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वह्नित्वसमवायः तस्यैव धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः संयोगः तस्य धर्मविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादाय नाऽव्याप्तिरिति स्वयमूह्यम्, पूर्विललक्षणेषु, एतल्लक्षणे वक्ष्यमाणलक्षणेषु च यथासम्भवम् ।

य शो ल ता

– पञ्चमभङ्गानुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना, यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपक-साध्यताऽवच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणम् ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधयाः यः अवच्छेदकः वह्नित्वधर्मः तस्यैव धर्मविधया साध्यताऽवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः समवायः तस्य साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहा-

त्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः द्रव्यत्वत्वधर्मः तस्यैव धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावैशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः कालिकः तस्य साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च च वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वह्नित्वसमवायः तस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतावैशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वात्तादृशाभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः समवायः वह्नित्वसमवायो वा तस्यापि साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वस्याऽपि सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् ।

य शो ल ता

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः वह्नित्वसमवायः समवायो वा तस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः संयोगः तस्य धर्मविधया साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावैशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याग्राह्यत्वात् ।

– चतुर्थभङ्गानुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या - 'साध्यतानिरूपितसंसर्गतावैशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धा-

वच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवं लक्षणम् ।

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताक-वह्न्यभावमादायाऽव्याप्तिः न सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदवच्छिन्नत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वाभावात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपित-संसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वाभावात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः समवायो वा तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेन धर्मविधया सम्बन्धविधया वाऽवच्छिन्नत्वाऽसत्त्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः समवायो वा तेनाप्यवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपित-

यत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वस्याऽपि सत्त्वाच्च तादृशाभावस्य ग्राह्यत्वात् ।

एवमेतल्लक्षणपर्यन्तानि सर्वाण्यपि लक्षणानि अव्याप्तिग्रस्तान्येव । किन्तु अधुना यानि तृतीय-द्वितीय-प्रथमलक्षणानि प्रदर्श्यन्ते तानि न कुत्रचिदपि अव्याप्तिग्रस्तानि इति सम्यग् द्रष्टव्यानि ।

– तृतीयभङ्गानुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या - 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणम् ।

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकं यद् वह्नित्वं तस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकः यः समवायः तस्य सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवं 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्रापि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकं यद् द्रव्यत्वत्वम्, तस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकः यः कालिकः तस्य सम्बन्धविधया साध्यतानवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन वह्नित्वसमवायेन

वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकः यः वह्नित्वसमवायः तस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावैशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः वह्नित्वसमवायः समवायो वा तस्य सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावैशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन समवायेन च संयोग्यभावमादायाऽपि नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकतावैशिष्टस्य वह्नित्वसमवायस्य समवायस्य वा धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतावैशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः अवच्छेदकः वह्नित्वसमवायः समवायः वा तस्य सम्बन्धविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावैशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽपि नाऽव्याप्तिसम्भवः इति स्वयमूह्यम् ।

य शो ल ता

एतदतिरिक्तस्थलेषु तत्तदभावानादायाऽव्याप्तिस्तु दूरतः अपास्ता एव वर्तते इति प्रागुपदर्शितम् । तथा च एतल्लक्षणाङ्गीकारे न कुत्रचिदपि अव्याप्तिगन्धलेशोऽपि इति किमर्थम् एतदेव लक्षणं नाङ्गीक्रियते ?

– द्वितीयभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तेन अवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या 'साध्यतानिरूपितसंसर्गतावैशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावैशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणं भवति ।

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः

वह्नित्वधर्मः धर्मविधया तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः द्रव्यत्वत्वधर्मः धर्मविधया तदवच्छिन्नत्वेन तादृशाभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तदनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः वह्नित्वसमवायः तस्यैव धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितानिरूपिताऽवच्छेदकताविशिष्टस्य समवायस्य वह्नित्वसमवायस्य वा सम्बन्धविधया साध्यताऽवच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाभावस्याग्राह्यत्वात् ।

एवं 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन समवायेन च संयोग्यभावमादाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितानिरूपितावच्छेदकताविशिष्टस्य संयोगस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः अवच्छेदकः संयोगः तस्य धर्मविधया साध्यताऽनवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । तथा च द्वितीयभङ्गानुसारिलक्ष-

णाङ्गीकारेऽपि नास्ति कुत्रचिदव्याप्तिरिति फलितम् ।

- प्रथमभङ्गकानुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः । एतच्च पूर्वमुक्तमेव भवता । परिष्कारशैल्या इदं भवतोपदर्शितरीत्या इत्थम् अभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । एतल्लक्षणं तु निर्दुष्टमस्ति एव ।

●

⁂ प्रतियोगिताअवच्छेकतानो उभयविधया प्रवेश व्यर्थ ⁂

पूर्वपक्ष :- तमे समवायथी संयोगिअभावने लईने अव्याप्ति आपी. अने ते अव्याप्ति दूर करवा माटे प्रतियोगिताअवच्छेदक धर्म अने प्रतियोगिताअवच्छेदक संबंध - आ रीते बन्नेनो प्रवेश कर्यो. पण, वास्तवमां ते जरूरी नथी. फक्त आटलो खुलासो करशो तो पण चाली जशे -

सादी भाषामां,

(A) (१) जे अभावीयप्रतियोगिताअवच्छेदक संबंध साध्यताअवच्छेदक संबंध होय

(२) अने जे अभावीयप्रतियोगिताअवच्छेदक साध्यताअवच्छेदक धर्म होय ते अभावना अधिकरणमां अवृत्तित्व. **अथवा**

(B) (१) जे अभावीयप्रतियोगिताअवच्छेदक साध्यताअवच्छेदक संबंध होय अने

(२) जे अभावीयप्रतियोगिताअवच्छेदक धर्म साध्यताअवच्छेदक धर्म होय ते अभावना अधिकरणमां अवृत्तित्व.

आ बंनेमांथी कोई पण लक्षण स्वीकारशो तो समवायथी संयोगिअभावने लईने अव्याप्ति नहीं आपी शकाय. प्रस्तुतमां आपणे जोयुं तेम प्रतियोगिताअवच्छेदक धर्म अने संबंध - उभयनो प्रवेश नथी कर्यो. प्रतियोगिताअवच्छेदक धर्मनो अथवा तो प्रतियोगिताअवच्छेदक संबंधनो बेमांथी एकनो ज प्रवेश करेल छे. आटलाथी पण काम चाली जाय तेम छे. समवायथी जे संयोगिअभाव लेवामां आवे छे तेमां

प्रतियोगिताअवच्छेदक धर्म - संयोग.

प्रतियोगिताअवच्छेदक संबंध - समवाय.

किन्तु 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपक-साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं सम्बन्धविधया केवलसाध्यतावच्छेदकतायाः एव प्रवेशमादृत्य लक्षणाङ्गीकारे 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं वा धर्मविधया केवलसाध्यतावच्छेदकतायाः एव प्रवेशमादृत्य लक्षणाङ्गीकारे च प्रागुक्तयुक्त्या यदि नास्ति कुत्राऽपि अव्याप्तिः, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन संयोग्यभावमादायाऽव्याप्तेरपि यदि उक्तलक्षणद्वितयाऽन्यतरलक्षणाङ्गीकारे निवारणं सम्भवति तर्हि किमर्थं धर्म-सम्बन्धविधया

य शो ल ता

●

જ્યારે **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થલમાં
સાધ્યતાઅવચ્છેદક ધર્મ - વહ્નિત્વસમવાય + સમવાય.
સાધ્યતાઅવચ્છેદક સંબંધ - સંયોગ.

⁂ લઘુભૂત બે લક્ષણ, અવ્યાપ્તિ પણ દૂર ! ⁂

પ્રથમ લક્ષણ મુજબ અહીં પ્રતિયોગિતાઅવચ્છેદક સંબંધ સમવાય તે સાધ્યતાઅવચ્છેદક સંબંધ નથી. માટે, સંયોગિઅભાવ નહીં લઈ શકાય. વહ્નિત્વસમવાયિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર !

બીજા લક્ષણ મુજબ વિચારીએ તો સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંયોગ સાધ્યતાઅવચ્છેદક સંબંધ બને છે. અહીં પ્રતિયોગિતાઅવચ્છેદક ધર્મ જ લેવાનો કે સંબંધ જ લેવાનો - તેવો ખુલાસો કર્યો નથી. માટે, પ્રતિયોગિતાઅવચ્છેદક તરીકે સંયોગ પણ લઈ શકાય. તે સાધ્યતાઅવચ્છેદક સંબંધ છે જ. તેથી પ્રથમ શરતમાંથી સંયોગિઅભાવ પસાર થઈ ગયો. કિંતુ બીજામાં અટકી જશે. કારણ કે સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સંયોગ છે. તે સાધ્યતાઅવચ્છેદક ધર્મ નથી. અર્થાત્ સાધ્યતાઅવચ્છેદક છે, પણ ધર્મવિધયા સાધ્યતાઅવચ્છેદક નથી. કારણ કે સાધ્યતાઅવચ્છેદક ધર્મ તો વહ્નિત્વસમવાય + સમવાય છે. માટે, સંયોગિઅભાવ લઈ નહીં શકાય. વહ્નિત્વસમવાયિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે. આ રીતે કોઈ પણ એકનો, સંબંધનો કે ધર્મનો પ્રવેશ કરવાથી જ અવ્યાપ્તિ દૂર થઈ જતી હોય તો ઉભયનો પ્રવેશ કરવાનું નિરર્થક ગૌરવ શા માટે લેવું ?

वि न भा

साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशमादृत्योक्तप्रथमभङ्गानुसारिलक्षणं कक्षीकर्तव्यम् ?

न च उक्तलक्षणद्वितयमध्ये कतरल्लक्षणमङ्गीकार्यम् ? नास्ति अत्र विनिगमकमिति विनिगमनाविरहेण तादृशलक्षणद्वितयस्याऽप्यङ्गीकाराऽऽपत्त्या तदपेक्षया तादृशप्रथमभङ्गवर्ति-लक्षणस्य अङ्गीकारे लाघव***दिति वाच्यम्;***

तथा सति प्रथमलक्षणमेव किमर्थमङ्गीक्रियते ? द्वितीयं वा तृतीयं वा किमर्थं न ? इत्यत्र विनिगमकाऽभावेन लक्षणत्रिकाङ्गीकारापत्तेः । वस्तुतः शब्दलाघवं पुरस्कृत्य 'साध्यता-निरूपितसंसर्गतावि‌शिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धा-वच्छिन्नाऽवच्छेदकतावि‌शिष्टनिष्ठावच्छेदकतानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येव लक्षणमभ्युपेयमिति ध्येयम् ।

●

★ परिष्कृत + लघुभूत लक्षणथी अव्याप्तिनिवारण ★

આ જ વાત નવ્યન્યાયની પરિષ્કૃત શૈલિ પ્રમાણે વિચારીએ તો

(A) જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠા યા સંસર્ગવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તન્નિરૂપકત્વ અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્ન(સાધ્યતા)અવચ્છેદકતાવન્નિષ્ઠ (પ્રતિયોગિતા)અવચ્છેદકતાનિરૂપકત્વ રહેતું હોય

તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

અથવા (B) જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતસંસર્ગતાવન્નિષ્ઠ(પ્રતિયોગિતા)અવચ્છેદકતાનિરૂપકત્વ અને

(૨) સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્ન(સાધ્યતા)અવચ્છેદકતાવન્નિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તન્નિરૂપકત્વ રહેતું હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ. આ બંનેમાંથી કોઈ પણ લક્ષણ સ્વીકારી લો, સમવાયથી સંયોગિઅભાવને લઈને અવ્યાપ્તિ નહીં આવે.

⁎ પ્રથમ લક્ષણથી અવ્યાપ્તિનિવારણ ⁎

પ્રથમ લક્ષણ પ્રમાણે વિચારીએ તો - સાધ્યતાનિરૂપિતસંસર્ગતાવિશિષ્ટ સંયોગસંબંધ છે. તેમાં સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા રહે. પણ, તે ધર્મવિધયા હોય. સંબંધવિધયા નહીં. માટે, સંબંધવિધયા સંયોગનિષ્ઠા યા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ

तथा च उभयथा साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशमादृत्य 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तेन अवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इतिलक्षणं तु व्यर्थमेवेति स्थितम् ।

य शो ल ता

संयोगिअभावीयप्रतियोगितामां न रहे. जो संयोग संयोगिअभावनो संबंधविधया प्रतियोगिताअवच्छेदक होत तो संबंधविधया संयोगनिष्ठा या प्रतियोगिताअवच्छेदकता तन्निरूपकत्व संयोगिअभावीयप्रतियोगितामां रहेत. किंतु संयोगिअभावनी प्रतियोगिताअवच्छेदकता संबंधविधया समवायमां जाय छे, संयोगमां नहीं. एटले समवायनिष्ठा या संबंधविधया प्रतियोगिताअवच्छेदकता तन्निरूपकत्व संयोगिअभावीयप्रतियोगितामां जाय. किंतु संयोगनिष्ठा या संबंधविधया प्रतियोगिताअवच्छेदकता तन्निरूपकत्व संयोगिअभावीयप्रतियोगितामां नहीं जाय. तेथी संयोगिअभाव लई नहीं शकाय. संयोगथी वह्नित्वसमवायिअभाव लेवो पडशे. तेनुं अधिकरण जलह्रद. धूम तेमां अवृत्ति. लक्षणसमन्वय, अव्याप्ति दूर !

❋ द्वितीय लक्षण प्रमाणे पण अव्याप्ति रवाना ❋

वि न भा

बीजा लक्षण प्रमाणे विचारीओ तो - (१) साध्यतानिरूपितसंसर्गताविशिष्ट संयोग. तेमां संयोगिअभावीयप्रतियोगिताअवच्छेदकता रहेशे ज. प्रस्तुतमां प्रतियोगिताअवच्छेदकता धर्मविधया लेवानी के संबंधविधया ते जणावेल नथी. संबंधविधया संयोगिअभावीयप्रतियोगिताअवच्छेदकता संयोगमां भले न रहेती होय, किंतु धर्मविधया संयोगिअभावीयप्रतियोगिताअवच्छेदकता संयोगमां रहे ज छे. प्रस्तुतमां धर्मविधया प्रतियोगिताअवच्छेदकता पण लई शकाशे. अने ते अवच्छेदकतानिरूपकत्व संयोगिअभावीयप्रतियोगितामां जशे ज. माटे, साध्यतानिरूपितसंसर्गतावत्संयोगनिष्ठप्रतियोगिताअवच्छेदकतानिरूपकत्व संयोगिअभावीयप्रतियोगितामां जतुं रह्युं. माटे, प्रथम परिष्कारमांथी संयोगिअभाव पसार थई गयो. किंतु द्वितीय परिष्कारमांथी पसार थई नहीं शके.

(२) साध्यतानिरूपितयत्किंचित्संबंधअवच्छिन्नसाध्यताअवच्छेदकताविशिष्ट प्रस्तुतमां समवाय छे. आ समवायमां संयोगिअभावीयप्रतियोगिताअवच्छेदकता धर्मविधया नथी ज रहेती. हा ! संबंधविधया रही जाय. कारण के समवाय संयोगिअभावीयप्रतियोगिता-

किञ्च, साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकसाध्यनिष्ठप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणाभ्युपगमेन एव सर्वं समञ्जसं भवति । सामान्यशैल्या सम्बन्धविधया यः साध्यतावच्छेदकः तदवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं कथ्यते । पूर्विललक्षणेषु केवलमभावस्यैव ग्रहणं कृतम्, अत्र साध्याभावस्य ग्रहणमिति विशेषः, साध्याभावः = साध्यनिष्ठप्रतियोगिताकाऽभावः, तादृशसाध्यनिष्ठप्रतियोगितावि‌शेषणविधया साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वं साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वञ्च निवेशनीयम् । एतल्लक्षणाऽनुसारेण न कुत्राऽप्यव्याप्तिः ।

तथा हि - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावम्, महानसवृत्तितावि‌शिष्टवह्न्यभावम्, वह्नि-घटोभयाभावं वाऽऽदाय नाऽव्याप्तिसम्भवः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकः यः संयोगः तस्य सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यद् अवच्छेदकं घटत्व-महानसवृत्तितावि‌शिष्टवह्नित्वादिकं तस्य साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वाभावात् तादृशाऽभावस्याऽग्राह्यत्वात् । यद्यपि तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नत्वं सम्बन्धविधया यः

અવચ્છેદક સંબંધ છે. પણ, પ્રસ્તુતમાં ધર્મવિધયા જ પ્રતિયોગિતાઅવચ્છેદકતા લેવાની છે. સંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા ધર્મવિધયા તો સંયોગમાં રહે છે. માટે, સંયોગનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં રહે. કિંતુ સમવાયનિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં નહીં જાય. આ રીતે સાધ્યતાનિરૂપિતયત્કિંચિત્સંબંધઅવચ્છિન્નસાધ્યતાઅવચ્છેદકતાવિશિષ્ટ સમવાય(+ વહ્નિત્વસમવાય)નિષ્ઠા યા ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતા તન્નિરૂપકત્વ સંયોગિઅભાવીયપ્રતિયોગિતામાં નહીં જાય. કિંતુ વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતામાં જ જશે. માટે, સંયોગિઅભાવ નહીં લેવાય. કિંતુ સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. માટે, લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે.

साध्यतावच्छेदकः तदवच्छिन्नत्वञ्च वर्तेते तथापि साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वं नास्ति इति भावः । महानसवृत्तितावि‌शिष्टवह्न्यभावस्य 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन साध्यनिष्ठप्रतियोगिताकत्वेऽपि, वह्नि-घटोभयाभावस्य साध्यनिष्ठप्रतियोगिताकत्वेऽपि च तादृशघटाभावस्य नैव साध्यनिष्ठप्रतियोगिताकत्वमतोऽपि न तद्ग्रहणं सम्भवतीत्यवधेयम् ।

एवं समवायसम्बन्धावच्छिन्नवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकस्य वह्नित्वस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वेऽपि साध्यतानिरूपितसंसर्गतावि‌शिष्टसंयोगेन तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावि‌शिष्टनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

तथा चाऽत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगिताऽवच्छेदकस्य वह्नित्वस्य धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यताऽवच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गतावि‌शिष्टसंयोगेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतावि‌शिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वाच्च । तदधिकरणं जलह्रदः, धूमस्तत्राऽवृत्तिरिति धूमे साध्यतानिरूपितसंसर्गतावि‌शिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावस्य सत्त्वेन लक्षणसमन्वयान्नाऽत्राऽव्याप्तिः । साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावि‌शिष्टनिष्ठावच्छेदकतानिरूपकत्वपरिष्कारस्यैव संक्षिप्तरूपं साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वम्, यद्वा साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वरूपमस्तु तत्, उभयथाऽपि अबाधा । साध्यतानिरूपितसंसर्गतावि‌शिष्टनिष्ठावच्छेदकतानिरूपक-साध्यनिष्ठप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणं यदि अभ्युपेयते तदा 'पर्वतो वह्निमान् धूमाद्' - इत्यादौ वह्नि-घटोभयाभावादिकमादायाऽव्याप्तिः स्यादिति लक्षणे साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वं धर्मविधया यः साध्यतावच्छेदकः तदवच्छिन्नत्वं वा किमपि निवेश्यम्, अर्थात् साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावि‌शिष्टनिष्ठावच्छेदकतानिरूपकत्वं प्रवेश्यतां साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वं वा प्रवेश्यताम्, लक्षणं निर्दुष्टमेव स्यादिति तत्त्वम् ।

एवं 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावं जलत्व-द्रव्यत्वोभयाभावं वाऽऽदाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगिताऽवच्छेदकस्य समवायस्य साध्यतानिरूपितसंसर्गताविशिष्टत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकं यद् जलत्वविशिष्टद्रव्यत्वत्वं जलत्व-द्रव्यत्वोभयत्वं वा तस्य साध्यतावच्छेदकत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'घटो द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्रैव कालिकसम्बन्धावच्छिन्नद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकधर्मस्य द्रव्यत्वत्वस्य साध्यतावच्छेदकत्वेन साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसमवायेन अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वाभावात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

तथा चात्र समवायसम्बन्धावच्छिन्न-द्रव्यत्वत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितावच्छेदकधर्मस्य द्रव्यत्वत्वस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यताऽवच्छेदकीभूतधर्मावच्छिन्नत्वस्य सत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसमवायेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसमवायनिष्ठावच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वाच्च । तदधिकरणीभूतगुणादौ पृथ्वीत्वस्याऽवृत्तेः भवति हि लक्षणसमन्वयः ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकधर्मस्य वह्नित्वसमवायस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसंयोगेनाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टसंयोगनिष्ठावच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्य अग्राह्यत्वात् ।

एतदभाववारणायैव 'साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणं परित्यज्य 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नसाध्यनिष्ठप्रतियो-

गिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणम् अङ्गीकृतम्, तादृशाऽभावीयप्रतियोगितावच्छेदकसम्बन्धस्य समवायस्य वह्नित्वसमवायस्य वा साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नत्वस्य = साध्यतावच्छेदकनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वस्य सत्त्वात्तादृशाभावस्य च साध्यनिष्ठप्रतियोगिताकत्वाच्च तादृशाऽभावस्य साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्न-साध्यतावच्छेदकीभूतधर्मावच्छिन्न-साध्यनिष्ठप्रतियोगिताकाऽभावविधया ग्रहणसम्भवात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसंयोगेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठाऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगिताऽवच्छेदकधर्मस्य वृत्तिनियामकवह्निसंयोगस्य 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वेऽपि च तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगिनिष्ठत्वेन वह्नित्वसमवायिनश्च प्रकृते साध्यत्वेन तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टवृत्तिनियामकवह्निसंयोगेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि, तादृशाऽभावीयप्रतियोगितावच्छेदकधर्मस्य च वृत्तिनियामकवह्निसंयोगस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगिनिष्ठत्वेन वृत्तिनियामकवह्निसंयोगिनः च साध्यत्वाभावेन वह्नित्वसमवायिनः एव साध्यत्वेन तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादायाऽपि नाव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टसंयोगेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठा-

य शो ल ता

ऽवच्छेदकतानिरूपकत्वसत्त्वेऽपि, तादृशाऽभावीयप्रतियोगितावच्छेदकधर्मस्य संयोगस्य साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वसत्त्वेऽपि च तादृशाऽभावीयप्रतियोगितायाः संयोगिनिष्ठत्वेन संयोगिनश्च साध्यत्वाभावेन, वह्नित्वसमवायस्यैव साध्यत्वेन तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्राऽपि समवायेन संयोग्यभावमादाय नाऽव्याप्तिरित्यूह्यम् ।

एवञ्च साध्यनिष्ठत्वस्य प्रतियोगिताविशेषणविधया प्रवेशमात्रेणैव उक्ताऽव्याप्तीनां निराकरणात् 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यतावच्छेदकीभूतधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः' इत्येव लक्षणस्वीकारेण सर्वसामञ्जस्ये 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवंलक्षणपर्यन्तमनुधावनं मौर्ख्यरूपमेव ।

य शो ल ता

न च "साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षणं माऽभ्युपगच्छतु, किन्तु "साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपक-साध्यनिष्ठप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षणं तु अभ्युपेयम् एव ।

भवतोक्तरीत्या 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन समवायेन च संयोग्यभावमादायाऽपि नाऽव्याप्तिः सम्भवति, तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वविरहात् । तथा च तमादायाऽव्याप्तिवारणाय लक्षणे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपकत्वं न प्रवेशनीयम्, किन्तु लक्षणे साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वमेव प्रवेशनीयम् । परन्तु उक्तस्थले एव वह्नित्वसमवायेन समवायेन वा संयोगि-वह्नित्वसमवाय्युभयाभावमादायाऽव्याप्तिवारणाय तन्निवेशनीयमेव, यतः तादृशाऽभावीयप्रतियोगिता यथा संयोगिनि वर्तते तथा वह्नित्वसमवायिनि अपि वर्तते इति तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वसिद्ध्या तमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावाधिकरणीभूते पर्वते धूमस्य वृत्तित्वात् ।

साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वप्रवेशे तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यताऽवच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वाभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वविरहात्तादृशाऽभावस्याग्राह्यत्वान्नास्त्येवाऽव्याप्तिः ।

एवञ्च साध्यनिष्ठत्वस्य प्रतियोगिताविशेषणविधया प्रवेशेऽपि यदि 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपक-साध्यनिष्ठप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयमेव तदा किं तादृशाऽन्तर्गडुकल्पेन साध्यनिष्ठत्वेन ? 'साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतावच्छेदकनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमङ्गीक्रियता***मिति वाच्यम्;***

साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपक-साध्यताऽवच्छेदकीभूतधर्मावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणाऽभ्युपगमेनैव सर्वसामञ्जस्ये तादृशलक्षणपर्यन्ताऽनुधावनस्य व्यर्थत्वात् । एतल्लक्षणानुसारेण 'पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवायि-संयोग्युभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितसंसर्गताविशिष्टेन संयोगेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपकत्वसत्त्वेऽपि तादृशोभयाभावीयप्रतियोगितायाः च वह्नित्वसमवायिरूपसाध्येऽपि सत्त्वेन तादृशाऽभावस्य साध्यनिष्ठप्रतियोगिताकत्वेऽपि तादृशाऽभावीयप्रतियोगितावच्छेदकधर्मस्य वह्नित्वसमवायि-संयोग्युभयत्वस्य साध्यतावच्छेदकत्वाऽभावेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । (साध्यनिष्ठत्वप्रवेशे प्रतियोगितावच्छेद-

●

આ રીતે સમવાયથી સંયોગિઅભાવને લઈને **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થલમાં તમે જે અવ્યાપ્તિ આપી હતી તે ઉપર્યુક્ત પરિષ્કારથી જ (કે જેમાં પ્રતિયોગિતા-અવચ્છેદકતાનો ધર્મવિધયા અથવા સંબંધવિધયા કોઈ એક રૂપે જ પ્રવેશ કરાવવામાં આવેલ છે) દૂર થઈ જાય છે તો તમે જે ધર્મવિધયા અને સંબંધવિધયા બંને રીતે પ્રતિયોગિતા-અવચ્છેદકતાનો પ્રવેશ કરાવી લક્ષણ બનાવો છો તેની પાછળ શું પ્રયોજન છે ?

कतायाः संसर्गविधया प्रवेशः न कर्तव्यः, संसर्गविधया साध्यतावच्छेदकता धर्मविधया च प्रतियोगितायाः साध्यतायाः वाऽवच्छेदकता निवेश्या, तदप्रवेशे संसर्गविधया उभयावच्छेदकत्वयोः प्रवेशः, धर्मविधया च एकतरस्य इति विशेषः सूक्ष्ममीक्षणीयः।)

एवञ्च साध्यनिष्ठत्वं प्रतियोगितावि शेषणविधया निवेश्योक्तलक्षणाङ्गीकारे नास्ति एवाऽव्याप्तिः इति उभयविधया साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशः व्यर्थः एवेति फलितम् । ततश्च किमर्थं तादृशं लक्षणमुपदर्श्यते भवद्भिः ? इत्याशङ्कायामाह - **वस्तुतः** इत्यादि ।

अयमाशयः - 'साध्याभाववदवृत्तित्वम्' इत्येतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसवृत्तितावि शिष्टवह्न्यभावमादायाऽव्याप्तिः भवति, महानसवृत्तितावि शिष्टवह्न्यभावीयप्रतियोगितायाः 'विशिष्टं शुद्धान्नाऽतिरिच्यते' इतिन्यायेन वह्नौ अपि सत्त्वेन तादृशाऽभावस्य साध्याभावविधया ग्राह्यत्वात्, तदधिकरणीभूतपर्वते धूमस्य वृत्तित्वाच्च ।

तन्निराकरणाय अभावविशेषणविधया साध्यतावच्छेदकधर्माऽवच्छिन्नप्रतियोगिताकत्वं निवेशितम्, ततश्च महानसीयवह्न्यभावीयप्रतियोगितायाः महानसीयवह्नित्वेनाऽवच्छिन्नत्वेन, महानसीयवह्नित्वस्य च साध्यतावच्छेदकत्वाऽभावेन तादृशमहानसीयवह्न्यभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वाऽभावात्तादृशाऽभावस्याऽग्राह्यत्वान्न तमादायाऽव्याप्तिः ।

●

❀ એક નવા પરિષ્કારની આવશ્યકતા ❀

ઉત્તરપક્ષ :- ભાગ્યશાળી ! આપની વાત સાચી છે. એટલે જ ગ્રંથકાર **વસ્તુતઃ** કહીને અભિનવ પંથ બતાવે છે. આના દ્વારા ઉભયનો = પ્રતિયોગિતાઅવચ્છેદકતા અને સાધ્યતાઅવચ્છેદકતા બંનેનો ધર્મવિધયા અને સંબંધવિધયા - ઉભયવિધયા જ પ્રવેશ કરવો પડશે - તે વાત સાબિત થઈ જશે. વાત જરા વિગતે અને મૂળમાંથી જોઈએ. મૂળ લક્ષણ છે આપણું સાધ્યાભાવવદ્અવૃત્તિત્વ.

આ લક્ષણમાં **पर्वतो वह्नित्वसमवायिमान् धूमात्** સ્થલે બે રીતે અવ્યાપ્તિ આપી. (૧) મહાનસીયવહ્નિ એ વહ્નિસામાન્યથી અનતિરિક્ત જ છે. માટે, મહાનસીયવહ્નિ પણ સાધ્યઅંતર્ગત જ કહેવાય. ∴ મહાનસીયવહ્નિઅભાવ = સાધ્યાભાવ. યદ્વા **विशिष्टं शुद्धान्नातिरिच्यते** ન્યાયથી મહાનસીયવહ્નિ તથા શુદ્ધવહ્નિ વચ્ચે અભેદ હોવાથી મહાનસીયવહ્નિઅભાવ = વહ્નિઅભાવ = સાધ્યાભાવ. તેનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ. માટે, લક્ષણસમન્વય ન થવાને કારણે અવ્યાપ્તિ. અથવા પર્વતમાં વહ્નિ-જલઉભયાભાવ લઈએ. આ અભાવનો પ્રતિયોગી સાધ્ય બને છે. માટે, આ અભાવ સાધ્યાભાવ તરીકે લઈ જ શકાય. તેનું

साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येवं लक्षणाङ्गीकारेऽपि समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वधर्मावच्छिन्नत्वेन तादृशाऽभावस्य ग्राह्यत्वात्, तादृशाऽभावाधिकरणपर्वते धूमस्य वृत्तित्वाच्च ।

तन्निवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वमपि लक्षणेऽभावविशेषणविधया निवेशितम् । तथा च तादृशाऽभावीयप्रतियोगितायाः समवायसम्बन्धावच्छिन्नत्वेन साध्यतावच्छेदकीभूतसंयोगसम्बन्धाऽनवच्छिन्नत्वेन तादृशाऽभावस्याऽग्राह्यत्वान्नाऽव्याप्तिः ।

किन्तु 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारेऽपि 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय अव्याप्तिः स्यादेव, यतः यथा महानसीयवह्न्यभावीयप्रतियोगिता महानसीयवह्नित्वेन अवच्छिन्ना तथैव महानसीयत्व-वह्नित्वोभयधर्मेणापि अवच्छिन्ना, प्रतियोगिताऽनतिरिक्तवृत्तिधर्मः प्रतियोगितावच्छेदकः भवति, महानसीयत्वं = महानसवृत्तिता वह्नित्वञ्चैतद्द्वितयमपि महानसीयवह्नौ स्यादेव, तत्रैव च स्यात्, नान्यत्रेति महानसीयत्वं वह्नित्वञ्चैतद्द्वितयं

●

અધિકરણ પર્વત. ધૂમ તેમાં અવૃત્તિ. લક્ષણઅસમન્વય. અવ્યાપ્તિ દુર્વાર !

(૨) પર્વત ઉપર સંયોગસંબંધથી વહ્નિ રહે. સમવાયસંબંધથી વહ્નિ ન રહે. સમવાયસંબંધથી વહ્નિ પોતાના અવયવોમાં જ રહે. માટે, સમવાયસંબંધઅવચ્છિન્નપ્રતિયોગિતાક એવો વહ્નિઅભાવ = સાધ્યાભાવ પર્વતમાં રહી જશે. ધૂમ તેમાં વૃત્તિ. લક્ષણઅસમન્વય, અવ્યાપ્તિ !

આ બંને પ્રકારની અવ્યાપ્તિ દૂર કરવા માટે પરિષ્કાર કર્યો - સાધ્યતાઅવચ્છેદકસંબંધ-અવચ્છિન્નસાધ્યતાઅવચ્છેદકધર્મઅવચ્છિન્નપ્રતિયોગિતાકસાધ્યાભાવવદ્વૃત્તિત્વ. પ્રસ્તુતમાં સાધ્યતાઅવચ્છેદક સંબંધ → સંયોગ. સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વ. અત્યાર સુધીમાં અવ્યાપ્તિ આપવા માટે જે - જે અભાવ લીધા તેમાં

(૧) મહાનસીયવહ્નિત્વઅવચ્છિન્ન-સંયોગસંબંધઅવચ્છિન્નપ્રતિયોગિતાક મહાનસીય-વહ્નિઅભાવ,

(૨) વહ્નિ-જલઉભયત્વઅવચ્છિન્ન-સંયોગસંબંધઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિ-જલ ઉભયાભાવ,

(૩) વહ્નિત્વઅવચ્છિન્ન-સમવાયસંબંધઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ

प्रतियोगिताऽनतिरिक्तवृत्ति, प्रतियोगितायाः महानसीयवह्नौ सत्त्वात् तत्रैव च उक्तधर्मद्वितयस्य सत्त्वात् । अतः महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता महानसीयवह्नित्वे स्यात्, महानसीयत्व-वह्नित्वोभयस्मिन्नपि च स्यादिति यथा तादृशाऽभावीयप्रतियोगिता महानसीयवह्नित्वाऽवच्छिन्ना तथैव महानसीयत्वेनाऽपि अवच्छिन्ना, वह्नित्वेनाऽपि अवच्छिन्ना । तथा च तादृशाऽभावीयप्रतियोगितायां वह्नित्वरूपसाध्यतावच्छेदकधर्मावच्छिन्नत्वसत्त्वात्, संयोगसम्बन्धरूपसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसत्त्वाच्च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावविधया महानसीयवह्न्यभावः गृह्यते एव, तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति स्यादेवाऽव्याप्तिः ।

य शो ल ता

एतदव्याप्तिनिराकरणाय साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नत्वं प्रतियोगिताविशेषणविधया प्रवेशनीयम्, महानसीयवह्न्यभावीयप्रतियोगिता साध्यतावच्छेदकीभूतवह्नित्वेनाऽवच्छिन्ना वर्तते एव, किन्तु तदतिरिक्तमहानसीयत्वेनाऽपि अवच्छिन्ना, न केवलं वह्नित्वेनैवाऽवच्छिन्ना । तथा च तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वधर्मेतरमहानसीयत्वधर्मेणाऽवच्छिन्नत्वेन

●

- આ બધાં અભાવો છે. આમાં એક પણ અભાવ વહ્નિત્વઅવચ્છિન્ન-સંયોગસંબંધ-અવચ્છિન્નપ્રતિયોગિતાક નથી. આપણે પરિષ્કાર કર્યો તે મુજબ વહ્નિત્વ-સંયોગઉભયથી અવચ્છિન્નપ્રતિયોગિતાક અભાવ જ લઈ શકાશે. તેવો અભાવ સંયોગથી વહ્નિઅભાવ જ મળશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ, લક્ષણસમન્વય થઈ ગયો. અવ્યાપ્તિ નહીં આવે.

❁ મહાનસીયવહ્નિઅભાવને લઈને અવ્યાપ્તિ ઊભી જ ❁

વિ ન ભા

હજુ ઊંડાણથી વિચારશું તો આમાં પણ આપણે અવ્યાપ્તિ આપી શકીશું. સ્થલ → **पर्वतो वह्निमान् धूमात्** । અભાવ લઈશું → મહાનસીયવહ્નિઅભાવ. આ અભાવીયપ્રતિયોગિતા જે રીતે મહાનસીયવહ્નિત્વથી અવચ્છિન્ન કહેવાય. તે રીતે મહાનસીયત્વ-વહ્નિત્વઉભયથી અવચ્છિન્ન પણ કહેવાય. મતલબ કે મહાનસીયવહ્નિઅભાવ મહાનસીયવહ્નિત્વઅવચ્છિન્ન-પ્રતિયોગિતાક પણ કહેવાય અને મહાનસીયત્વ-વહ્નિત્વઉભયઅવચ્છિન્નપ્રતિયોગિતાક પણ કહેવાય. કારણ કે મહાનસીયવહ્નિત્વની જેમ મહાનસીયત્વ-વહ્નિત્વઉભય ધર્મો પણ મહાનસીયવહ્નિમાં રહેનારા અને મહાનસીયવહ્ન્યભાવીયપ્રતિયોગિતાને અનતિરિક્તવૃત્તિ છે. પરિણામે તે બન્ને ધર્મો પણ તાદશઅભાવીયપ્રતિયોગિતાઅવચ્છેદક બને જ. તથા પ્રતિયોગિતાઅવચ્છેદક સંબંધ સંયોગ જ છે. આમ, મહાનસીયવહ્નિઅભાવ સાધ્યતા-

तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नत्वविरहात्तादृशाऽभावस्याग्राह्यत्वात् । एवञ्च 'साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम् ।

किन्तु एवं लक्षणाङ्गीकारेऽपि न निस्तारः, 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतवह्नित्वेतरधर्माऽनवच्छिन्नत्वसत्त्वात्, संयोग-समवायोभयसम्बन्धेन तादृशाऽभावीयप्रतियोगितायाः अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नत्वस्याऽपि सत्त्वाच्च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नप्रतियोगिताकाऽभावविधया संयोग-समवायोभयसम्बन्धेन वह्न्यभावोऽपि गृह्यते एव । पर्वते संयोगेन वह्नेः सत्त्वेऽपि समवायेन वह्नेरसत्त्वात्तादृशसंयोग-समवायोभयसम्बन्धेन वह्नेरभावः पर्वते लभ्यते एव, 'एकसत्त्वेऽपि द्वयं नास्ती'ति न्यायात् । तत्र च धूमः वृत्तिरिति धूमे साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावविरहाल्लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

एतदव्याप्त्यपाकरणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य साध्यतावच्छेदकसम्ब-

य शो ल ता

અવચ્છેદકધર્મ વહ્નિત્વ તથા સાધ્યતાઅવચ્છેદક સંબંધ સંયોગ - ઉભયથી અવચ્છિન્નપ્રતિયોગિતાક છે જ. હા ! સાધ્યતાઅવચ્છેદક સિવાયના મહાનસીયત્વથી પણ અવચ્છિન્ન છે. કિંતુ તાદૃશ અભાવ સાધ્યતાઅવચ્છેદક ધર્મથી અને સંબંધથી અવચ્છિન્નપ્રતિયોગિતાક હોવાને કારણે સાધ્યાભાવ તરીકે તે લઈ જ શકાશે. તેનું અધિકરણ પર્વત, ધૂમ તેમાં વૃત્તિ. લક્ષણઅસમન્વય. અવ્યાપ્તિ !

❀ संयोग-समवायोभयथी अभाव लईने अव्याप्ति ❀

वि

आ જ રીતે **पर्वतो वह्निमान् धूमात्** સ્થલમાં સંયોગ-સમવાયઉભયસંબંધથી વહ્નિઅભાવ લઈએ. પર્વત ઉપર સંયોગસંબંધથી વહ્નિ રહે છે. પણ, સંયોગ-સમવાયઉભયથી તો વહ્નિ અવૃત્તિ જ છે. તે અભાવ સંયોગ-સમવાયઉભયસંબંધઅવચ્છિન્નપ્રતિયોગિતાક તથા વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ કહેવાશે. આ રીતે પ્રસ્તુત વહ્નિઅભાવ પણ સાધ્યતાઅવચ્છેદક સંબંધ સંયોગ અને સાધ્યતાઅવચ્છેદક ધર્મ વહ્નિત્વ - ઉભયથી અવચ્છિન્નપ્રતિયોગિતાક અભાવ હોવાથી સાધ્યાભાવ તરીકે લઈ શકાશે. આ અભાવનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ. લક્ષણઅસમન્વય. પુનઃ અવ્યાપ્તિ !

ना भा

न्धेतरसम्बन्धाऽनवच्छिन्नत्वं प्रवेशनीयम् । तथा च न संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादाय अव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतसंयोगसम्बन्धाऽवच्छिन्नत्वसत्त्वेऽपि साध्यतावच्छेदकीभूतसंयोगसम्बन्धेतरसमवायसम्बन्धाऽवच्छिन्नत्वस्यापि सत्त्वात्तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकीभूतसम्बन्धेतरसम्बन्धाऽनवच्छिन्नत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

तथा च 'साध्यतावच्छेदकसम्बन्धेतरसम्बन्धाऽनवच्छिन्न-साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येव लक्षणमभ्युपन्तव्यमिति फलितम् ।

अत्रेदमवधेयम् - 'सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तदवच्छिन्ना धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपक-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गी-

●

❋ साध्यतावच्छेदकઈतरअनवच्छिन्नत्वप्रवेश જરૂરી ❋

આ બન્ને પ્રકારની અવ્યાપ્તિ દૂર કરવા માટે એક નવો પરિષ્કાર કરવો પડશે કે → साध्यताअवच्छेदकधर्मअवच्छिन्नत्व = साध्यताअवच्छेदकधर्मईतरधर्मअनवच्छिन्नत्व. तथा साध्यताअवच्छेदकसंबंधअवच्छिन्नत्व = साध्यताअवच्छेदकसंबंधईतरसंबंधअनवच्छिन्नत्व. આ બન્ને જે અભાવીયપ્રતિયોગિતામાં જાય તે અભાવના અધિકરણમાં અવૃત્તિત્વ = साध्याभाववद्वृअवृत्तित्व.

પ્રસ્તુતમાં સૌ પ્રથમ (૧) મહાનસીયવહ્નિઅભાવને લઈને અવ્યાપ્તિ આપી. આ મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા વહ્નિત્વધર્મથી અવચ્છિન્ન છે. સાથે સાથે મહાનસીયત્વધર્મથી પણ અવચ્છિન્ન છે. એટલે કે સાધ્યતાઅવચ્છેદક ધર્મ જે વહ્નિત્વ તેનાથી ઈતર = ભિન્ન ધર્મ જે મહાનસીયત્વ તેનાથી અવચ્છિન્ન છે. પ્રસ્તુત પરિષ્કાર મુજબ જે અભાવીયપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકધર્મથી ઈતર જે ધર્મ તેનાથી અનવચ્છિન્ન હોય તે જ અભાવ લઈ શકાય છે. માટે મહાનસીયવહ્નિઅભાવ લઈ નહીં શકાય. સંયોગથી વહ્નિઅભાવ લેવો પડશે. તદધિકરણ - જલહ્રદ. તેમાં ધૂમ અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર.

(૨) બીજી વાર અવ્યાપ્તિ આપતી વખતે સંયોગ - સમવાયઉભયસંબંધથી વહ્નિઅભાવ લીધેલ. આ વહ્નિઅભાવીયપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકસંબંધ સંયોગથી તો અવચ્છિન્ન છે જ. સાથે સાથે સમવાયથી પણ અવચ્છિન્ન છે. એટલે કે સાધ્યતાઅવચ્છેદકસંબંધસંયોગઈતર-

कारेऽपि उक्ताऽव्याप्तिद्वितयं तु भवत्येव, 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावीय-प्रतियोगितायाः उक्तरीत्या वह्नित्वाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत्साध्यतावच्छेदकं वह्नित्वं धर्मविधया तेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यता-निरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छे-दकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्ट-निष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वस्याऽपि सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । साध्यनिष्ठत्व-प्रवेशेऽपि उक्ताऽभावीयप्रतियोगितायाः तादृशत्वेन न उक्ताऽभाववारणं सम्भवति । तथा च साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकसाध्यतानिरूपितयत्किञ्चि-त्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रति-योगितानिरूपकाऽभावविधया तादृशमहानसीयवह्न्यभावग्रहणसम्भवात्तमादायाऽव्याप्तिः स्यादेव,

या शो ल ता

●

સમવાયસંબંધથી અવચ્છિન્ન છે. આપણા પરિષ્કાર મુજબ જે અભાવીયપ્રતિયોગિતા સાધ્યતા-અવચ્છેદકસંબંધઈતરસંબંધથી અનવચ્છિન્ન હોય તે જ અભાવ લઈ શકાય. માટે, સંયોગ -સમવાયઉભયસંબંધથી વહ્નિઅભાવ લઈ નહીં શકાય. કેવલ સંયોગસંબંધથી વહ્નિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર !

❋ પ્રતિયોગિતા અને અવચ્છેદકતા : પરસ્પર નિરૂપિત ❋

આ રીતે, સાધ્યતાઅવચ્છેદકધર્મઅવચ્છિન્નત્વ = સાધ્યતાઅવચ્છેદકધર્મઈતર-ધર્મઅનવચ્છિન્નત્વ ફલિત થયું. સાધ્યતાઅવચ્છેદકધર્મઈતરધર્મઅનવચ્છિન્નત્વ એટલે કે સાધ્યતાનિરૂપિતા ધર્મવિધયા યા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટઈતરનિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્અનિરૂપકત્વ = તદ્અનિરૂપિતત્વ. પ્રસ્તુતમાં જે રીતે પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપક પ્રતિયોગિતા થાય તે રીતે પ્રતિયોગિતાઅવચ્છેદકતાથી નિરૂપિત પણ પ્રતિયોગિતા થાય. બન્ને વચ્ચે પરસ્પર નિરૂપ્ય-નિરૂપકભાવ છે. દા.ત. રામનિષ્ઠપિતૃત્વનિરૂપિત લવણનિષ્ઠપુત્રત્વ અને લવણનિષ્ઠપુત્રત્વનિરૂપિત રામનિષ્ઠપિતૃત્વ - બન્ને રીતે કહી શકાય. કારણ કે લવણમાં પુત્રત્વ છે. માટે, રામમાં પિતૃત્વ છે. તથા રામમાં પિતૃત્વ છે. માટે, લવણમાં પુત્રત્વ છે - બન્ને પ્રકારે કહી શકાય છે. આ જ રીતે (જો ઘટાભાવ લઈએ તો) ઘટનિષ્ઠપ્રતિયોગિતાનિરૂપિત ઘટત્વનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતા કહેવાય. તથા ઘટત્વનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિત ઘટનિષ્ઠપ્રતિયોગિતા - આ

વિ ન ભા

महानसीयवह्न्यभावाधिकरणे पर्वते धूमस्य वृत्तित्वात् ।

एवं संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽपि अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः उक्तरीत्या संयोगेनाऽपि अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपकत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः धर्मविधया तदवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्रिशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वस्यापि सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । उक्ताऽभावीयप्रतियोगितायाः वह्निनिष्ठत्वेन साध्यनिष्ठत्वप्रवेशेऽपि न तद्वारणं सम्भवति । एवं संयोग-समवायोभयसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तिः स्यादेव ।

ततश्च धर्म-सम्बन्धविधया साध्यता-प्रतियोगिताऽवच्छेदकत्वप्रवेशेऽपि उक्ताऽव्याप्तिद्वितयसत्त्वात् प्रकृताऽव्याप्तिद्वितयं धर्मविधया सम्बन्धविधया वा साध्यतावच्छेदकत्वस्य प्रतियोगिताऽवच्छेदकत्वस्य वाऽप्रवेशप्रत्ययिकं नास्ति इति निश्चीयते, अतः तन्निवारणाय मूलतः एव परिष्कारः कर्तव्यः । अतः एव साध्याभाववदवृत्तित्वम् इति एवं मूललक्षणं गृहीत्वा अव्याप्तिद्वितयमुपदर्शितमित्यवधेयम् ।

इत्थञ्च पूर्वोक्तरीत्या उक्ताऽव्याप्तिद्वितयवारणाय 'साध्यतावच्छेदकधर्मावच्छिन्नत्वम्' - इत्यस्य 'साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नत्वम्' इत्यर्थः, 'साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्' इत्यस्य 'साध्यतावच्छेदकसम्बन्धेतरसम्बन्धानवच्छिन्नत्वम्' इत्यर्थः ज्ञेयः, तथा च 'साध्यतावच्छेदकसम्ब-

●

પ્રમાણે પણ કહેવાય. કારણ કે ઘટમાં પ્રતિયોગિતા છે. માટે, ઘટત્વમાં પ્રતિયોગિતાઅવચ્છેદકતા છે. અને ઘટત્વમાં પ્રતિયોગિતાઅવચ્છેદકતા છે. માટે, ઘટમાં પ્રતિયોગિતા છે - આ પ્રમાણે બન્ને પ્રકારે કહી શકાય છે. પ્રસ્તુતમાં પહેલા પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપકત્વ પ્રતિયોગિતામાં લઈ ગયા. હવે પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ લઈ જઈએ છીએ - બન્નેમાં કોઈ વિરોધ નથી. બન્ને રીતે કહી શકાય છે. નવ્ય ન્યાયની આ શાબ્દિક શૈલિથી પરિચિત રહેવા જેવું છે.) તથા સાધ્યતાઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ = સાધ્યતાઅવચ્છેદકસંબંધઈતરસંબંધઅનવચ્છિન્નત્વ. અર્થાત્ સાધ્યતાનિરૂપિતા યા સંબંધવિધયા અવચ્છેદકતા તદ્વિશિષ્ટઈતરનિષ્ઠા યા સંબંધવિધયા અવચ્છેદકતા તદ્અનિરૂપિતત્વ. આ બન્ને જે અભાવીયપ્રતિયોગિતામાં રહે તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

न्धेतरसम्बन्धानवच्छिन्न-साध्यताऽवच्छेदकधर्मेतरधर्माऽनवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपेयम् ।

अत्र धर्मविधया सम्बन्धविधया च प्रतियोगितावच्छेदकत्वस्यापि साध्यतावच्छेदकत्वस्यापि चाऽवश्यं प्रवेशः कार्यः एव, अन्यथा अव्याप्त्याद्यापत्तेः । 'साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्न-त्वम्' इत्यस्य चत्वारो विकल्पाः - (१) धर्मविधया यः साध्यतावच्छेदकः तदितरेण धर्मविधया अनवच्छिन्नत्वम् - इत्येवं तदर्थः, (२) धर्मविधया यः साध्यतावच्छेदकः तदितरेण अनवच्छिन्नत्वम् इति तदर्थः, (३) साध्यतावच्छेदकभिन्नः यः तेन धर्मविधया अनवच्छिन्नत्वम् - इति तदर्थः, (४) साध्यतावच्छेदकभिन्नेन अनवच्छिन्नत्वम् इति वा तदर्थः अभिप्रेतः ? अत्र प्रथमविकल्पः एवाङ्गीकर्तव्यः । 'साध्यतावच्छेदकसम्बन्धेतरसम्बन्धाऽनवच्छिन्नत्वम्' - इत्यस्याऽपि चतुर्धा अर्थः भवति - (१) सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेण सम्बन्धविधया अनवच्छिन्नत्वम् - इति तदर्थः, (२) सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेण अनवच्छिन्नत्वम् इति तदर्थः, (३) साध्यतावच्छेदकभिन्नः यः तेन सम्बन्धविधया अनवच्छिन्नत्वम् - इति तदर्थः (४) साध्यतावच्छेदकभिन्नेनाऽनवच्छिन्नत्वम् - इति वा तदर्थः अभिप्रेतः ? प्रथमविकल्प एव अत्रापि अङ्गीकर्तव्यः ।

'सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेण सम्बन्धविधया अनवच्छिन्नत्वम्' - इदमेव परिष्कारशैल्या इत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽ-निरूपकत्वं यद्वा साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वम् । इदञ्च अभावीयप्रतियोगितायाः विशेषणम् । अभावीयप्रतियोगिता यथा स्वावच्छेदकनिष्ठावच्छे-दकतानिरूपिका भवति तथा स्वावच्छेदकनिष्ठाऽवच्छेदकतानिरूपिताऽपि, घटाभावीयप्रतियोगिता घटत्वनिष्ठावच्छेदकतानिरूपिताऽपि भवति, घटत्वनिष्ठावच्छेदकतानिरूपिकाऽपि भवति, तादृश-प्रतियोगितायाः घटत्वेनैवाऽवच्छिन्नत्वेन घटत्वनिष्ठाऽवच्छेदकतानिरूपितत्वमेव तत्र स्यात्, पटत्व-निष्ठावच्छेदकतानिरूपितत्वं नैव, अतः तादृशप्रतियोगिता पटत्वनिष्ठावच्छेदकताऽनिरूपिताऽपि कथ्यते, एवं पटत्वनिष्ठाऽवच्छेदकताऽनिरूपिकाऽपि कथ्यते । पूर्वम् अवच्छेदकतानिरूपिका प्रतियोगिता उक्ता, अत्र अवच्छेदकतानिरूपिता प्रतियोगिता कथ्यते इति न व्यामोह्यम्, परस्पर-निरूप्य-निरूपकभावापन्नत्वात्तयोः, यथा रामनिष्ठपितृत्वनिरूपितं लवणनिष्ठपुत्रत्वं कथ्यते, राम-निष्ठपितृत्वनिरूपकमपि लवणनिष्ठपुत्रत्वं कथ्यते तथा इति अवधेयम् । साध्यतानिरूपितसंसर्गता-

विशिष्टः = सम्बन्धविधया यः साध्यतावच्छेदकः, तद्भिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वम् = तदितरेण संसर्गविधया अनवच्छिन्नत्वम् । तथा च सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेण सम्बन्धविधया अनवच्छिन्नत्वम् = साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वम् इति ।

एवं 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तदितरेण अनवच्छिन्नत्वम्' इति इदमपि परिष्कारशैल्या इत्थमभिधीयते - साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वम् इति ।

एवं लक्षणाङ्गीकारे 'पर्वतो वह्निमान् धूमाद्' इत्यत्र महानसीयवह्न्यभावमादाय नाऽव्याप्तिः, न वा संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽव्याप्तिः सम्भवति । अत्र धर्मविधया सम्बन्धविधया वा साध्यतावच्छेदकत्वस्य प्रतियोगिताऽवच्छेदकत्वस्य वा अप्रवेशे काऽऽपत्तिः ? इति निरूपणीयम् । तदर्थं पूर्वोक्ताः षोडशभङ्गाः एवाऽनुगन्तव्याः । अतः सुखप्रतिपत्त्यर्थं पूर्वमुपन्यस्ता अपि षोडश भङ्गाः क्रमं परावर्त्य पुनः प्रदर्श्यन्ते । तदनु तद्भङ्गानुसारिलक्षणानि प्रदर्शयिष्यन्ते । तत्रैकमेव लक्षणं निर्दुष्टं स्यात्, अन्यानि सर्वाण्यपि दोषग्रस्तान्येवेत्यवधेयम् ।

तत्र षोडशभङ्गकरचना एवम् -

	साध्यतावच्छेदकत्वम्		प्रतियोगितावच्छेदकत्वम्	
क्रमाङ्कः	धर्मविधया	सम्बन्धविधया	धर्मविधया	सम्बन्धविधया
१	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
२	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
३	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
४	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्
५	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
६	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
७	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
८	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्
९	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
१०	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्	प्रविष्टम्

११	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
१२	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्	प्रविष्टम्
१३	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	अप्रविष्टम्
१४	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्	प्रविष्टम्
१५	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्	अप्रविष्टम्
१६	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्	प्रविष्टम्

अत्र अन्तिमभङ्गानुसारिलक्षणमेव निदुर्ष्टम् अस्ति । तत्पूर्विलानि सर्वाण्यपि दुष्टानि । तथा हि -

– प्रथमभङ्गानुसारिलक्षणम् -

साध्यतावच्छेदकभिन्नाऽनवच्छिन्नप्रतियोगितानिरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः इति । साध्यतानिरूपिताऽवच्छेदकताविशिष्टेतरनिष्ठावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इत्यर्थः ।

अत्र साध्यनिष्ठत्वं प्रवेश्यतां मा वा ? अव्याप्तिः स्यादेवेति यत्र साध्यनिष्ठत्वप्रवेशेऽपि अव्याप्तिः भवति तादृशैकस्थले अव्याप्तिः प्रतिलक्षणं दर्शयिष्यते, अन्यत्र अव्याप्तिः भवति न वा तत्स्वयमूह्यम् ।

उक्तलक्षणाङ्गीकारे 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकवह्नित्व-संयोगेतरघटत्वधर्मेणाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यता-

•※• નૂતન પરિષ્કારમાં ઉભયવિધયા પ્રવેશ ન કરતા અનર્થ •※•

આ રીતે બે જગ્યાએ ધર્મ અને સંબંધનો આપણે પ્રવેશ કર્યો. હવે ધર્મ અને સંબંધ બન્ને જગ્યાએથી કાઢી નાંખો તો લક્ષણ થાય → જે અભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતઅવચ્છેદકતાવિશિષ્ટઈતરનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાઅનિરૂપિતત્વ જાય તે અભાવના અધિકરણમાં અવૃત્તિત્વ. જો આવું લક્ષણ બનાવશો તો **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલમાં સમવાય સંબંધથી વહ્નિત્વસમવાયિઅભાવ લઈને અવ્યાપ્તિ આવે. પ્રસ્તુતમાં સાધ્યતા-

य शो ल ता

वि न भा

निरूपितावच्छेदकताविशिष्टवह्नित्व-संयोगभिन्नवह्नि-घटोभयत्वनिष्ठावच्छेदकतानिरूपितत्वसत्त्वेन साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरसमवायनिष्ठावच्छेदकतानिरूपितत्वसत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगभिन्नं यद् महानसीयवह्नित्वं महानसीयत्वं वा तेनाऽवच्छिन्नत्वसत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपित्वत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

य शो ल ता

एवं संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरसमवायसम्बन्धनिष्ठावच्छेदकतानिरूपितत्वसत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवञ्च 'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः, साध्यतानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरजलत्वविशिष्टद्रव्यत्वत्वनिष्ठावच्छेदकतानिरूपितत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, साध्यतानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरजलत्व-द्रव्यत्वोभयत्वनिष्ठाऽवच्छेदकतानिरूपितत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरकालिकसम्बन्धनिष्ठावच्छेदकतानिरूपितत्वसत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्व-

विरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्राऽव्याप्तिः स्यात्, समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय, यतः तादृशाऽभावीयप्रतियोगिता वह्नित्वसमवाय-समवायनिष्ठाऽवच्छेदकतानिरूपिता केवलवह्नित्वसमवायनिष्ठावच्छेदकतानिरूपिता वा । वह्नित्व-समवायः समवायश्चैतद्द्वितयमपि साध्यतावच्छेदकमेव । समवाय-वह्नित्वसमवायेतरेण केनचिदपि तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां समवाय-वह्नित्व-समवायेतरधर्मनिष्ठावच्छेदकताऽनिरूपितत्वं वर्तते एवेति साध्यतावच्छेदकभिन्ननिष्ठावच्छेदकताऽ-निरूपितत्वमपि वर्तते एव = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽ-निरूपितत्वमपि तत्र स्यादेवेति तादृशाऽभावः ग्रहीतुं शक्यते एव । अत्र प्रतियोगितावि‌शेषणविधया साध्यनिष्ठत्वप्रवेशेऽपि तादृशाऽभावीयप्रतियोगितायाः वह्नित्वसमवायिरूपसाध्यनिष्ठत्वेन न तदभावमादायाऽव्याप्तेर्वारणं शक्यम् ।

य शो ल ता

●

અવચ્છેદક ધર્મ છે → વહ્નિત્વસમવાય + સમવાય. તથા સાધ્યતાઅવચ્છેદક સંબંધ છે → સંયોગ. પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે - વહ્નિત્વસમવાય + સમવાય. પ્રતિયોગિતાઅવચ્છેદક સંબંધ છે - સમવાય.

તેથી, સાધ્યતાનિરૂપિતઅવચ્છેદકતાવિશિષ્ટ જે સમવાય + વહ્નિત્વસમવાય. તેનાથી ઈતરઘટત્વ-સમવાયાદિનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાઅનિરૂપિતત્વ વહ્નિત્વસમવાયિ-અભાવીયપ્રતિયોગિતામાં રહેશે જ. કારણ કે વહ્નિત્વસમવાયિઅભાવના પ્રતિયોગિતા-અવચ્છેદક વહ્નિત્વસમવાય તથા સમવાય છે. માટે, આ ઉભયમાં રહેલી પ્રતિયોગિતા-અવચ્છેદકતાનિરૂપિતત્વ વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતામાં જાય, આ સિવાયના ઘટત્વસમવાયાદિમાં રહેલી પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ ન જ જાય. કારણ કે ઘટત્વસમવાય વગેરે ન તો વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ બને છે કે ન તો સંબંધ. અને વહ્નિત્વસમવાય + સમવાય સાધ્યતાઅવચ્છેદક જ છે. તદિતર નહીં. માટે, વહ્નિત્વસમવાયિઅભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ, લક્ષણ-અસમન્વય તથા અવ્યાપ્તિ !

વિ ન ભ્રા

❀ સમવાયથી સમવાયિઅભાવ પર્વત ઉપર ન મળે ❀

પૂર્વે જણાવ્યુ તે મુજબ નિમ્નોક્ત રીતે અવ્યાપ્તિ આપી ન શકાય.

"સ્થળ → **पर्वतः समवायिमान् धूमात्** ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायां संयोग-वृत्तिनियामकवह्निसंयोगैतद्द्वितयनिष्ठावच्छेदकतानिरूपितत्वसत्त्वेन तदितरनिष्ठावच्छेदकतानिरूपितत्वविरहेण तादृशसंयोग-वृत्तिनियामकवह्निसंयोगयोश्च साध्यतावच्छेदकत्वेन साध्यतानिरूपितावच्छेदकताविशिष्टसंयोग-वृत्तिनियामकवह्निसंयोग-वह्नित्वसमवायेतरनिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

य शो ल ता

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायिनः साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायां वृत्तिनियामकवह्निसंयोगनिष्ठाऽवच्छेदकतानिरूपितत्वस्यैव सत्त्वेन तदितरनिष्ठाऽवच्छेदकतानिरूपितत्वविरहेण तादृशवृत्तिनियामकवह्निसंयोगस्य च साध्यतावच्छेदकत्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टवृत्तिनियामकवह्निसंयोग-वह्नित्वसमवायेतरधर्मनिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

●

साध्यताअवच्छेदक संबंध → संयोग. साध्यताअवच्छेदक धर्म → समवाय.
अभाव → समवायथी समवायिअभाव.
प्रतियोगिताअवच्छेदक संबंध → समवाय.
प्रतियोगिताअवच्छेदक धर्म → समवाय.
समवायिअभावीयप्रतियोगितामां
साध्यतानिरूपितअवच्छेदकताविशिष्टसमवायईतर જે स्वरूपसंबंध, घटत्व वगेरे तन्निष्ठप्रतियोगिताअवच्छेदकतानिरूपितत्व नहीं रहे. कारण के समवायिअभावीयप्रतियोगिताअवच्छेदक धर्म अने संबंध मात्र समवाय ज छे. एटले समवायनिष्ठप्रतियोगिताअवच्छेदकतानिरूपितत्व ज समवायिअभावीयप्रतियोगितामां रहे. स्वरूपसंबंध वगेरेमां तथा घटत्व वगेरेमां रहेल प्रतियोगिताअवच्छेदकतानिरूपितत्व समवायिअभावीयप्रतियोगितामां न रहे. कारण के स्वरूपसंबंध - घटत्व वगेरे न तो समवायिअभावीयप्रतियोगिताअवच्छेदक संबंध छे, न तो धर्म. माटे, समवायिअभाव लई शकाशे. तेनुं अधिकरण पर्वत. धूम तेमां वृत्ति. लक्षणअसमन्वय अने अव्याप्ति ! " अहीं पर्वत उपर समवायथी समवायिअभाव मळे ज नहीं. कारण के रूपत्वसमवायी एवुं रूप समवायथी पर्वत उपर रहेल छे. माटे पूर्वोक्त वह्नित्वसमवायीसाध्यक स्थले ज अव्याप्ति समजवी.

वि न भा

एवमुक्तस्थले एव संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन च संयोग्यभावमादायाऽपि अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायां संयोग-वह्नित्वसमवायनिष्ठावच्छेदकतानिरूपित-त्वस्यैव संयोग-समवायनिष्ठावच्छेदकतानिरूपितत्वस्यैव वा सत्त्वेन तदितरनिष्ठावच्छेदकतानिरूपित-त्वविरहेण तादृशवह्नित्वसमवाय-समवाय-संयोगानाञ्च साध्यतावच्छेदकत्वेन साध्यतानिरूपिताऽ-वच्छेदकताविशिष्टसंयोग-समवाय-वह्नित्वसमवायेतरनिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वात् तादृशाऽ-भावस्य ग्राह्यत्वादिति । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभाव-मादायाऽव्याप्तिः भावनीया ।

– द्वितीयभङ्गकानुसारिलक्षणम् -

साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना साध्यतावच्छेदकभिन्नः यः तेन सम्बन्धविधयाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । अत्र या प्रतियोगिता साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना स्यात् सा साध्यतावच्छेदकभिन्नः यः तेन सम्बन्धविधयाऽन-वच्छिन्नाऽपि स्यादेव, 'साध्यताऽवच्छेदकभिन्नेन धर्मविधया सम्बन्धविधया' वा इत्यकथने उभय-विधया तदनवच्छिन्नत्वे एव सा प्रतियोगिता साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना कथ्यते । तथा च या प्रतियोगिता साध्यताऽवच्छेदकभिन्नाऽनवच्छिन्ना सा साध्यतावच्छेदकभिन्नेन सम्बन्धविधया अनवच्छिन्ना भवत्येवेति लक्षणे साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वमेव प्रतियोगितावि‌शेषणविधयाऽ-नुप्रवेश्यम् । ततश्च सर्वमव्याप्त्यादिकं प्रथमलक्षणवदनुसन्धेयम् ।

यदि च केवलं 'साध्यतावच्छेदकभिन्नः यः तेन सम्बन्धविधयाऽनवच्छिन्नप्रतियोगितानिरूपकाऽ-भावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीया-वच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणम-भ्युपेयते तदा तु बहुशः अव्याप्तिः भवेत् ।

तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभाव-मादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकवह्नित्व-संयोगेतरघटत्वेनाऽ-वच्छिन्नत्वेऽपि तेन सम्बन्धविधयाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिता-वच्छेदकताविशिष्टवह्नित्व-संयोगभिन्नघटत्वादिनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वस्याऽनपाया-त्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि अव्याप्तिः स्यात्, यतः तादृशाऽभावीयप्रतियोगितायां

संयोगनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपितत्वमेव अस्ति, संयोगेतरनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपितत्वं नास्त्येव, तादृशाऽभावीयप्रतियोगितायाः संसर्गविधया संयोगेनैवावच्छिन्नत्वात् । तथा च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरवह्नि-घटोभयत्वेन अवच्छिन्नत्वसत्त्वेऽपि संसर्गविधया तदनवच्छिन्नत्वस्यैव सत्त्वेन साध्यतानिरूपितावच्छेदकताविशिष्ट-भिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् । अत्र साध्यनिष्ठत्व-प्रवेशेऽपि एतदभावमादायाऽव्याप्तिः स्यादेव, एतदभावस्य साध्यनिष्ठप्रतियोगिताकत्वादिति ।

एवं महानसीयवह्न्यभावमादायाऽप्यव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः साध्यता-निरूपितावच्छेदकताविशिष्टसंयोग-वह्नित्वेतरमहानसीयत्वेन अवच्छिन्नत्वेऽपि संसर्गविधया तदनव-च्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टेतरनिष्ठसंसर्गीयाऽ-वच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

समवायेन वह्न्यभावमादायाऽव्याप्तिः न स्यात्, तादृशाऽभावीयप्रतियोगितायाः साध्यताव-
य च्छेदकवह्नित्व-संयोगेतरसमवायेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां
शो साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्नसमवायनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहा-
ल त्तादृशाऽभावस्याऽग्राह्यत्वात् ।
ता एवं समवाय-संयोगोभयसम्बन्धेन वह्न्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकवह्नित्व-संयोगेतरसमवायेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रति-योगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्नसमवायनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्व-विरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नजलत्वविशिष्टद्रव्यत्वत्वेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया तदनवच्छिन्नत्वेन सम्बन्धविधया साध्यतावच्छेदकसमवायेनैवाऽवच्छिन्नत्वेन च तादृशाभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेद-कताऽनिरूपितत्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि अव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यता-वच्छेदकेतरजलत्व-द्रव्यत्वोभयत्वेनाऽवच्छिन्नत्वेऽपि सम्बन्धविधया तदनवच्छिन्नत्वेन सम्बन्धविधया साध्यतावच्छेदकसमवायेनैवाऽवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिता-

वच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वातादृशाऽभावस्य ग्राह्यत्वात् ।

कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय न अव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकेतरकालिकेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्राऽव्याप्त्यादिकं पूर्ववद् भावनीयम्, तत्र साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वघटितप्रथमलक्षणस्याप्यव्याप्तत्वेन एतल्लक्षणाऽव्याप्तिर्ध्रौव्यादिति ।

– तृतीयभङ्गकानुसारिलक्षणम् -

साध्यतावच्छेदकभिन्नः यः धर्मविधया तदनवच्छिन्ना, साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । अत्र या प्रतियोगिता साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना सा साध्यताऽवच्छेदकभिन्नः यः धर्मविधया तदनवच्छिन्नाऽपि भवेदेव, यतः साध्यतावच्छेदकभिन्नेन या प्रतियोगिता धर्मविधया सम्बन्धविधया च उभयथा अनवच्छिन्ना भवेत् सा एव साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना कथ्यते, अतः साध्यतावच्छेदकभिन्नानवच्छिन्ना प्रतियोगिता साध्यतावच्छेदकभिन्नेन धर्मविधया अनवच्छिन्ना भवेदेवेति लक्षणे साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वमेव प्रवेशनीयम्, साध्यतावच्छेदकभिन्नः यः धर्मविधया तदनवच्छिन्नत्वं न निवेश्यम् इति प्रथमलक्षणवदेव सर्वमव्याप्त्यादिकमत्राऽनुसन्धेयम् ।

यदि च 'साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतावच्छेदकभिन्नः यः धर्मविधया तदनवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणमङ्गीक्रियते तदा अव्याप्तिबाहुल्यम् ।

तथा हि - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र समवायेन वह्न्यभावमादाय अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टवह्नित्व-संयोगेतरसमवायेन अवच्छिन्नत्वसत्त्वेऽपि धर्मविधया तदनवच्छिन्नत्वसत्त्वेन धर्मविधया तादृशाभावीयप्रतियोगितायाः साध्यतावच्छेदकीभूतवह्नित्वेनैवाऽवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् । धर्मविधया तादृशाऽभावीयप्रतियोगिता च वह्नित्वेनैवाऽवच्छिन्ना, वह्नित्वेतरेण न

हि केनचिदपि तादृशाऽभावीयप्रतियोगिता धर्मविधया अवच्छिन्ना इति स्यादेवाऽव्याप्तिः । साध्यनिष्ठत्वप्रवेशेऽपि नैतदव्याप्तिनिवारणम्, एतदभावीयप्रतियोगितायाः तथात्वादेवेति ।

समवाय-संयोगोभयसम्बन्धेन वह्न्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरसमवायेन अवच्छिन्नत्वसत्त्वेऽपि धर्मविधया तदनवच्छिन्नत्वसत्त्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

पर्वतो वह्निमान्, धूमाद् - इत्यत्र घटाभावमादायाऽव्याप्तिः न स्यात्, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरघटत्वेन धर्मविधयाऽवच्छिन्नत्वसत्त्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं महानसीयवह्न्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टवह्नित्व-संयोगेतरमहानसीयत्वेन धर्मविधया अवच्छिन्नत्वसत्त्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टवह्नित्व-संयोगेतरवह्नि-घटोभयत्वेन धर्मविधया अवच्छिन्नत्वसत्त्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'घटो द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरजलत्वविशिष्टद्रव्यत्वत्वेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितावच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरजलत्व-द्रव्यत्वोभयत्वेन धर्मविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धा-

वच्छिन्नावच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपिताऽवच्छेदकताविशिष्टद्रव्यत्वत्व-समवायेतरकालिकेनाऽवच्छिन्नत्वेऽपि तेन धर्मविधयाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र अव्याप्त्यादिकं प्रथमलक्षणवद् भावनीयम्, तत्र प्रथमलक्षणस्याऽव्याप्तत्वेन एतल्लक्षणाऽव्याप्तिर्ध्रौव्यादिति ।

– चतुर्थभङ्गकाऽनुसारिलक्षणम् -

साध्यतावच्छेदकभिन्नः यः तेन सम्बन्धविधया अनवच्छिन्ना, साध्यतावच्छेदकभिन्नः यः तेन धर्मविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । इदमेव परिष्कारशैल्या इत्थमभिधीयते - साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । या प्रतियोगिता साध्यतावच्छेदकभिन्नेन धर्मविधयाऽपि अवच्छिन्ना न स्यात्, सम्बन्धविधयाऽपि अवच्छिन्ना न स्यात् सैव प्रतियोगिता साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना कथ्यते । ततश्च यस्यां प्रतियोगितायां साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वं स्यात् तस्यां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वं साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वञ्च स्यातामेव, यस्याञ्च साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वं साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वञ्च स्याताम्, तस्यां साध्यतावच्छेदकभिन्नानवच्छिन्नत्वं स्यादेवेति द्वेऽपि लक्षणे (= प्रथम-चतुर्थलक्षणे) शब्दमात्रेण भिन्ने, अर्थापेक्षयाऽभिन्ने इति तुल्ययोगक्षेमत्वाद् यत्र यत्र प्रथमलक्षणाऽव्याप्तिः तत्र तत्र चतुर्थलक्षणस्याऽपि अव्याप्तिः स्यादेव, यत्र यत्र च चतुर्थलक्षणाऽव्याप्तिः तत्र तत्र प्रथमलक्षणस्यापि अव्याप्तिः स्यादेव इति प्रथमलक्षणवदेव अस्य अव्याप्त्यादिकं सर्वं विभावनीयम् । यत्र स्थले यमभावमादाय प्रथमलक्षणाऽनुसारेण अव्याप्तिः यथा भवति, न वा भवति तथैव तत्र तमभावमादाय चतुर्थलक्षणस्याऽपि

य शो ल ता

ज्ञेयमिति भावः ।

– पञ्चमभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन अनवच्छिन्ना, साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र या प्रतियोगिता साध्यतावच्छेदकभिन्नाऽनवच्छिन्ना सा सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेनापि अनवच्छिन्ना एव भवेत् - इति नियमः नास्ति । यथा पर्वतो वह्निमान् धूमाद् - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावीयप्रतियोगिता साध्यतावच्छेदकीभूतसंयोग-वह्नित्वेतरधर्माऽनवच्छिन्ना अस्ति, किन्तु सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन वह्नित्वेन तु अवच्छिन्ना एव वर्तते, न तु अनवच्छिन्ना । परिष्कारशैल्या इदं लक्षणम् इत्थम् अभिधीयते - साध्यतानिरूपित-संसर्गताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठा-वच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

य शो ल ता

❁ साध्यताअवच्छेदकतानो संसर्गविधया प्रवेश ❁

આ પ્રકારની અવ્યાપ્તિ દૂર કરવા માટે આટલો ખુલાસો અનિવાર્ય બનશે કે → જે અભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટઈતર-નિષ્ઠઅવચ્છેદકતાઅનિરૂપિતત્વ રહે તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

પહેલા આપણે લક્ષણ સ્વીકારેલ કે →

જે અભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતઅવચ્છેદકતાવદ્ઇતરનિષ્ઠઅવચ્છેદકતા-અનિરૂપિતત્વ જાય તે અભાવના અધિકરણમાં અવૃત્તિત્વ. સરળ ભાષામાં →

વિ ન મ્રા

જે અભાવીયપ્રતિયોગિતાના અવચ્છેદક સાધ્યતાઅવચ્છેદક સિવાયના ન બનતા હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

આટલું જ લક્ષણ માનવા જતા **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલમાં સમવાયથી વહ્નિત્વસમવાયિઅભાવને લઈને અવ્યાપ્તિ દોષ આવ્યો.

માટે, પરિષ્કાર કર્યો કે →

જે અભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટઈતરનિષ્ઠઅવચ્છેદકતાઅનિરૂપિતત્વ હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

સરળ ભાષામાં →

સાધ્યતાઅવચ્છેદકસંબંધ સિવાયના જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ન બનતા

હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

★ પરિષ્કારથી અવ્યાપ્તિનિવારણ ★

હવે, **पर्वतो वह्नित्वसमवायिमान् धूमात्** - આ સ્થળમાં અવ્યાપ્તિ નહીં આવે. કારણ કે વહ્નિત્વસમવાયિઅભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટ જે સંયોગસંબંધ (= સંબંધવિધયા જે સાધ્યતાઅવચ્છેદક સંયોગસંબંધ) તદ્ઈતર સમવાયસંબંધનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ જાય છે. કારણ કે વહ્નિત્વસમવાયિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સમવાય છે. એટલે કે વહ્નિત્વસમવાયિઅભાવીય-પ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંયોગસંબંધથી ભિન્ન છે. માટે, સમવાયથી વહ્નિત્વસમવાયિઅભાવ નહીં લઈ શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય. અવ્યાપ્તિ દૂર !

❀ સંયોગથી વહ્નિસંયોગિઅભાવને લઈને અવ્યાપ્તિ ❀

પરંતુ, જો આટલું જ લક્ષણ કહો તો પુનઃ અવ્યાપ્તિ આવે. સ્થલ - **पर्वतो वह्नित्व-समवायिमान् धूमात्**. સાધ્યતાઅવચ્છેદક સંબંધ → સંયોગ. સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વ-સમવાય. અભાવ → સંયોગથી વહ્નિસંયોગિઅભાવ. પ્રતિયોગિતાઅવચ્છેદક સંબંધ → સંયોગ. પ્રતિયોગિતાઅવચ્છેદક ધર્મ → વહ્નિસંયોગ + સંયોગ. આ વહ્નિસંયોગિઅભાવીય-પ્રતિયોગિતામાં સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટ જે સંયોગ તદ્ઈતરસમવાયાદિનિષ્ઠઅવચ્છેદકતાઅનિરૂપિતત્વ છે જ. કારણ કે વહ્નિસંયોગિઅભાવીય-પ્રતિયોગિતાઅવચ્છેદક ધર્મ અને સંબંધ સંયોગ જ છે. સમવાય વહ્નિસંયોગિઅભાવીય-પ્રતિયોગિતાઅવચ્છેદક ધર્મ પણ નથી, સંબંધ પણ નથી. માટે વહ્નિસંયોગનિષ્ઠપ્રતિયોગિતા-અવચ્છેદકતાનિરૂપિતત્વ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં રહે. પણ, સમવાયનિષ્ઠ-પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ ન રહે. વહ્નિસંયોગ તો સાધ્યતાનિરૂપિતા યા સંસર્ગ-વિધયા અવચ્છેદકતા તદ્વિશિષ્ટ છે જ. (**'विशिष्टं शुद्धान्नातिरिच्यते'** - આ ન્યાયથી.) પરિણામે, વહ્નિસંયોગિઅભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ. લક્ષણઅસમન્વય, અવ્યાપ્તિ દુર્વાર !

વિ
ના
શ

❀ વહ્નિસંયોગસંબંધથી અભાવ લઈને પણ અવ્યાપ્તિ ❀

આ જ રીતે, સ્થલ → **पर्वतो वह्नित्वसमवायिमान् धूमात्** ।
સાધ્યતાઅવચ્છેદક સંબંધ → વહ્નિસંયોગ. (આ સ્થલની સમજણ પહેલા વ્યવસ્થિત

રીતે આપી જ છે.) સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વસમવાય.

અભાવ → વહ્નિસંયોગથી વહ્નિસંયોગિ-અભાવ. પ્રતિયોગિતાઅવચ્છેદક ધર્મ → વહ્નિસંયોગ. પ્રતિયોગિતાઅવચ્છેદક સંબંધ → વહ્નિસંયોગ.

આ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટ જે વહ્નિસંયોગ તદ્ઈતરસમવાયાદિનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતા-અનિરૂપિતત્વ રહે છે. કારણ કે વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ અને ધર્મ બંને વહ્નિસંયોગ જ છે. સમવાયાદિ તો વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ પણ નથી અને ધર્મ પણ નથી. માટે, વહ્નિસંયોગનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતા-નિરૂપિતત્વ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં રહે. કિંતુ સમવાયાદિનિષ્ઠપ્રતિયોગિતા-અવચ્છેદકતાનિરૂપિતત્વ ન જ રહે. માટે, વહ્નિસંયોગિઅભાવ લઈ શકાશે. તેનું અધિકરણ પર્વત. ધૂમ તેમાં વૃત્તિ. લક્ષણઅસમન્વય અવ્યાપ્તિ દુર્વાર !

❁ ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનો પ્રવેશ ❁

વિ આ અવ્યાપ્તિ દૂર કરવા માટે લક્ષણ આ રીતે બનાવવું પડશે →

જે અભાવીયપ્રતિયોગિતામાં

ન (૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટઈતર-

મા નિષ્ઠ(પ્રતિયોગિતા)અવચ્છેદકતાઅનિરૂપિતત્વ અને

(૨) સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટઈતરનિષ્ઠ-(પ્રતિયોગિતા)અવચ્છેદકતાઅનિરૂપિતત્વ રહે તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

સરળ ભાષામાં →

(૧) સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ન હોય

(૨) તથા સાધ્યતાઅવચ્છેદક ધર્મથી ભિન્ન જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ન હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

·❋· પરિષ્કારપ્રમાણે પૂર્વોક્ત આપત્તિનું નિવારણ ·❋·

હવે, **पर्वतो वह्नित्वसमवायिमान् धूमात्** (સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વસમવાય. સાધ્યતાઅવચ્છેદક સંબંધ → સંયોગ.) - આ સ્થલમાં સંયોગ સંબંધથી વહ્નિસંયોગિઅભાવ લઈને અવ્યાપ્તિ નહીં આપી શકાય. કારણ કે વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં (૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટસંયોગઈતરસમવાયાદિનિષ્ઠ-પ્રતિયોગિતાઅવચ્છેદકતાઅનિરૂપિતત્વ રહેશે. કારણ કે સમવાય વહ્નિસંયોગિઅભાવીય-

પ્રતિયોગિતાઅવચ્છેદક સંબંધ પણ નથી અને ધર્મ પણ નથી. (૨) કિંતુ સાધ્યતાનિરૂપિતા યા ધર્મવિધયા અવચ્છેદકતા તદ્વિશિષ્ટ જે સમવાય + વહ્નિત્વસમવાય તદ્ઇતરસંયોગનિષ્ઠ-પ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ જ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં જશે, અનિરૂપિતત્વ નહીં. કારણ કે સંયોગ એ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ પણ છે, ધર્મ પણ છે. એટલે કે વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક સંયોગસંબંધથી ભિન્ન નથી. પણ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતા-અવચ્છેદક ધર્મ સમવાય + વહ્નિત્વસમવાયથી તો ભિન્ન છે જ. માટે, વહ્નિસંયોગિઅભાવ નહીં લઈ શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ જ લેવો પડશે. તેનું અધિકરણ જલહ્રદ ! ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય થઈ ગયો. અવ્યાપ્તિ દૂર થઈ ગઈ.

❁ વહ્નિસંયોગિઅભાવને લઈને અવ્યાપ્તિ અશક્ય ❁

આ જ રીતે, **पर्वतो वह्नित्वसमवायिमान् धूमात्** (સાધ્યતાઅવચ્છેદક સંબંધ → વહ્નિસંયોગ. સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વસમવાય + સમવાય.) - આ સ્થલમાં વહ્નિસંયોગસંબંધથી વહ્નિસંયોગિઅભાવને લઈને અવ્યાપ્તિ દોષ નહીં આવે. કારણ કે વહ્નિસંયોગિઅભાવીય-પ્રતિયોગિતામાં (૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટવહ્નિ-સંયોગઈતરસમવાયાદિનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ નથી. કારણ કે વહ્નિસંયોગ જ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ છે, અને સંબંધ છે. સમવાયાદિ ન તો વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ છે કે ન તો ધર્મ છે ! માટે, વહ્નિસંયોગિ-અભાવીયપ્રતિયોગિતામાં વહ્નિસંયોગનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ રહે. પણ, વહ્નિસંયોગભિન્નસમવાયાદિનિષ્ઠઅવચ્છેદકતાનિરૂપિતત્વ ન રહે, અનિરૂપિતત્વ જ રહે. (૨) કિંતુ સાધ્યતાનિરૂપિતા યા ધર્મવિધયા અવચ્છેદકતા તદ્વિશિષ્ટવહ્નિત્વસમવાય + સમવાયઈતરવહ્નિસંયોગનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાઅનિરૂપિતત્વ વહ્નિસંયોગિઅભાવીય-પ્રતિયોગિતામાં નહીં રહે. કારણ કે વહ્નિસંયોગ તો વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતા-અવચ્છેદક સંબંધ પણ છે, ધર્મ પણ છે. માટે, વહ્નિસંયોગનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતા-નિરૂપિતત્વ જ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતામાં રહે, અનિરૂપિતત્વ નહીં.

ટૂંકમાં, વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદકસંબંધથી ભિન્ન નથી. કિંતુ વહ્નિસંયોગિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક ધર્મ વહ્નિત્વ-સમવાય + સમવાયથી ભિન્ન છે જ. માટે, વહ્નિસંયોગિઅભાવ લઈ નહીં શકાય. સંયોગથી વહ્નિત્વસમવાયિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ ! ધૂમ તેમાં અવૃત્તિ. લક્ષણ-સમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે. આમ, લક્ષણનો પરિષ્કાર કરવાથી હવે કોઈ

एतल्लक्षणाङ्गीकारे तु असम्भवः एव स्यात्, कुत्रापि लक्षणाऽसमन्वयात् । पर्वतो वह्निमान्, धूमाद् - इत्यत्र लक्षणघटकतया संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः संयोग-वह्नित्वोभयनिष्ठावच्छेदकतानिरूपितत्वेन संयोग-वह्नित्वयोश्च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वस्य = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वस्य सत्त्वेऽपि साध्यतानिरूपितसंसर्गताविशिष्टः यः संयोगः तद्भिन्नं यद् वह्नित्वं (वह्नित्वस्य साध्यतानिरूपित-

य
शो
ल
ता

●

આપત્તિ નહીં આવે.

❋ परिष्कृत लक्षण तो असंभवदोषग्रस्त ! ❋

સબૂર ! શું આ રીતે આંખ મીંચીને અમારી વાત સ્વીકારી લો છો. આ લક્ષણમાં તો અસંભવ દોષ રહેલો છે ! જુઓ, તમે લક્ષણ બનાવ્યું છે →

જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટભિન્ન-નિષ્ઠ(પ્રતિયોગિતા)અવચ્છેદકતાઅનિરૂપિતત્વ અને

(૨) સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટભિન્નનિષ્ઠ-(પ્રતિયોગિતા)અવચ્છેદકતાઅનિરૂપિતત્વ રહે

વિ

તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

ન

સરળ ભાષામાં,

મા

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક ધર્મથી ભિન્ન ન હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન ન હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

આ લક્ષણ મુજબ **पर्वतो वह्निमान् धूमात्** વગેરે કોઈ પણ સ્થળે લક્ષણસમન્વય નહીં થઈ શકે. કારણ કે લક્ષણસમન્વય કરવા માટે સંયોગસંબંધઅવચ્છિન્નપ્રતિયોગિતાક અને વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ લેવો પડશે. આ વહ્નિઅભાવીયપ્રતિયોગિતા-અવચ્છેદક વહ્નિત્વધર્મ સાધ્યતાઅવચ્છેદકસંબંધથી ભિન્ન જ છે. મતલબ કે સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા અવચ્છેદકતા તદ્વિશિષ્ટસંયોગઈતરવહ્નિત્વનિષ્ઠઅવચ્છેદકતાનિરૂપિતત્વ જ વહ્નિઅભાવીયપ્રતિયોગિતામાં જશે. અનિરૂપિતત્વ નહીં. તે જ રીતે સાધ્યતાનિરૂપિતા

संसर्गताऽविशिष्टत्वात्, तस्य संसर्गविधया साध्यताऽनवच्छेदकत्वात्) तेनाऽनवच्छिन्नत्वविरहेण तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । यदि साध्याभावोऽपि लक्षणघटकतया ग्रहीतुं न शक्यते तर्हि अन्यं कमभावमादाय लक्षणसमन्वयः स्यात् ? यथा चात्र तथा अन्यत्र सर्वत्र लक्षणसमन्वयाऽसम्भवाद् दुर्वार एवाऽसम्भवो दोषः । अत्र साध्यनिष्ठत्वप्रवेशेऽपि न निस्तारः इति तु स्पष्टमेव ।

नन्वत्र असम्भवदोषः नैव सम्भवति, सर्वत्र लक्षणाऽसमन्वयाऽभावात्, यथा 'घटः समवायिविशिष्टः, रूपाद्' इत्यत्र लक्षणसमन्वयः सम्भवति । अत्र घटे रूपं वर्तते, रूपञ्च रूपत्वसमवायविशिष्टम्, अतः यत्र यत्र रूपं तत्र तत्र समवायेन समवायी भवेदेव, रूपस्यैव समवायित्वात् । तथा च सत्स्थलमिदम् । अत्र समवायेन समवाय्यभावः लक्षणघटकः भवति, तादृशाऽभावस्य प्रतियोगितावच्छेदकः सम्बन्धः धर्मश्च समवायः एव, साध्यतावच्छेदकः सम्बन्धो धर्मश्चाऽपि समवायः एवेति तादृशाऽभावीयप्रतियोगितायाः समवायनिष्ठा याऽवच्छेदकता तयैव निरूपितत्वेन समवायस्य च सम्बन्धविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां

●

या धर्मविधया अवच्छेदकता तद्विशिष्टवह्नित्वઇतरसंयोगनिष्ठप्रतियोगिताअवच्छेदकतानिરૂપિતત્વ જ વહ્નિઅભાવીયપ્રતિયોગિતામાં જશે, અનિરૂપિતત્વ નહીં. એટલે કે વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન ન હોય તેવું તો નથી જ. કારણ કે સાધ્યતાઅવચ્છેદક સંયોગસંબંધથી ભિન્ન એવું વહ્નિત્વ વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક છે જ. એ રીતે વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદકધર્મથી ભિન્ન ન હોય - એવું પણ નથી. કારણ કે વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંયોગસંબંધ સાધ્યતાઅવચ્છેદક વહ્નિત્વધર્મથી ભિન્ન જ છે. આમ, લક્ષણઘટક તરીકે વહ્નિઅભાવ જ લઈ નહીં શકાય, તો કયો અભાવ લઈને લક્ષણસમન્વય કરશો ? કોઈ પણ અભાવ લો, તેનો પ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મ કે સંબંધથી ભિન્ન હોવાનો, અને પ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક ધર્મ કે સંબંધથી ભિન્ન હોવાનો જ. કારણ કે સાધ્યતાઅવચ્છેદક ધર્મ વહ્નિત્વ હોય તો પ્રતિયોગિતાઅવચ્છેદક ધર્મ પણ વહ્નિત્વ હોવો જોઈએ - તે બરાબર. પણ, પ્રતિયોગિતાઅવચ્છેદક સંબંધ તો વહ્નિત્વથી ભિન્ન જ હોય ને ! આમ, દરેક સ્થલમાં કોઈ અભાવ નહીં લઈ શકાય. પરિણામે લક્ષણસમન્વય અસંભવિત થતા અસંભવદોષ દુર્વાર જ થશે.

साध्यतानिरूपितसंसर्गताविशिष्टसमवायभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात्, साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वस्याऽपि तादृशाऽभावीयप्रतियोगितायां सत्त्वात् । एवं यत्र यत्र साध्यतावच्छेदकः सम्बन्धः, साध्यतावच्छेदकः धर्मश्च अभिन्नौ एव स्यातां तत्र तत्र सद्धेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाऽभावमादाय लक्षणसमन्वयः स्यादेव । ततः कुतः असम्भवः दोषः ? ***इति चेद् ?***

मैवम्, अभिप्रायाऽपरिज्ञानात् । असम्भवोऽयं नाऽस्माभिः स्वबुद्ध्या परिकल्पितः, किन्तु ग्रन्थकृता एव उपदर्शितः । तत्सङ्गत्यर्थमनेकान्तः आश्रयणीयः, अनेकान्तेन सर्वमुपपद्यते । घट-पटौ घटत्वेन पटत्वेन च पृथग्, किन्तु द्रव्यत्वेनाऽभिन्नौ एव तौ, यतः घटमुद्दिश्य 'इदं द्रव्यम्' इतिप्रतीतेः घटस्य द्रव्यतोऽनतिरिक्तत्वेन, एवं पटस्याऽपि द्रव्यतोऽनतिरिक्तत्वेन घट-पटयोरैक्यमभ्युपेयमेव, यथा कम् = खम्, गम् = खम्, तर्हि कम् = गम् स्यादेवेति गणितज्ञानां सुप्रतीतम् । द्रव्यत्वेन यथा घट-पटयोरैक्यम्, तथा घटत्वेन पटत्वेन च तयोः भेदोऽपि भवेदेवेति न घट-पटयोः सर्वथा भेदः अभेदो वा कल्पयितुं शक्यते ।

प्रकृते साध्यतावच्छेदकसम्बन्धः यः समवायः ततः साध्यतावच्छेदकधर्मः यः समवायः सः भिन्नः एव, यद्यपि तौ द्वावपि साध्यताऽवच्छेदकत्वेन अभिन्नौ एव, तथापि धर्मत्वेन सम्बन्धत्वेन च तयोः भेदः कल्पनीयः एव, अन्यथा वह्नित्व-संयोगयोरपि साध्यतावच्छेदकत्वेन एकान्तैक्याऽऽपत्तेः । तथा च साध्यतावच्छेदकसम्बन्धतः साध्यतावच्छेदकधर्मः भिन्नः एव मन्तव्यः धर्मत्वेन सम्बन्धत्वेन च । अतः समवायस्यैकान्तेन एकत्वमपि नाऽभ्युपेयमिति अपि अनेन सिद्धं दण्डापूपन्यायेन । साध्यतानिरूपितसंसर्गताविशिष्टः यः समवायः तद्भिन्नः यः धर्मविधया साध्यतावच्छेदकः समवायः तन्निष्ठाऽवच्छेदकतानिरूपितत्वम् एव तादृशस्थलीयतादृशाऽभावीय-प्रतियोगितायां स्यादिति नैव तादृशाऽभावः ग्रहीतुं शक्यते इति सूक्ष्ममीक्षणीयम् । अनेकान्ताऽनभ्युपगमे तु तादृशाभावस्य ग्राह्यत्वाद् उक्तस्थले भवेदेव लक्षणसमन्वयः इति कुतः असम्भवः स्यात् ? तथा च ग्रन्थकृदुक्त्यसङ्गतिरपि दुर्वारा इति स्वीकरणीयः एवाऽनेकान्तवादः । येन विना लोकस्य व्यवहारः सर्वथा न सङ्गच्छते तस्मै भुवनैकगुरवे भगवते ***नमोऽनेकान्तवादाय ।*** एवमग्रेतनलक्षणेषु अपि असम्भवदोषसङ्गतिः समवगन्तव्या ।

– षष्ठभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया या अनवच्छिन्ना, साध्यता-

वच्छेदकभिन्नाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । परिष्कारशैल्या इदमेवेत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपित-प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र न घटाभावमादायाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वाभावादित्येवं प्रथमलक्षणवद् यत्र यत्र अव्याप्त्यभावः आसीत् तत्र तत्रैतल्लक्षणाऽनुसारेणाऽपि अव्याप्त्यभावः एव प्रतिपत्तव्यः, साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वस्यैतल्लक्षणेऽपि प्रवेशात् । प्रथमलक्षणस्य यत्र यत्र अव्याप्तिरासीत् तत्र तत्र एतल्लक्षणस्याऽव्याप्तिः भवति न वा ? तदेव चिन्तनीयम् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकीभूतस्य समवायस्य वह्नित्वसमवायस्य च साध्यतावच्छेदकत्वेन तदितरेण तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वेऽपि सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तद्भिन्नः यः समवायः वह्नित्वसमवायः वा तेन तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वाऽसत्त्वात्तादृशाभावस्याऽग्राह्यत्वात् ।

संयोगेन वह्नित्वसमवाय्यभावः ग्राह्यः अत्र, तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य संयोगस्य वह्नित्वसमवायस्य च साध्यतावच्छेदकत्वेन तदितरेण तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वस्य सत्त्वात्, सम्बन्धविधया यः प्रतियोगितावच्छेदकीभूतः संयोगः तस्यैव सम्बन्धविधया साध्यतावच्छेदकत्वेन, संयोगेतरेण तादृशप्रतियोगितायाः सम्बन्धविधया अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च । तदधिकरणं जलह्रदादि, न तु पर्वतादिकम्, तत्र तेन सम्बन्धेन तस्य वृत्तेः । तत्र धूमः अवृत्तिरिति लक्षणसमन्वयः, नाऽव्याप्तिः ।

परन्तु, 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन

वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेण अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः अवच्छेदकीभूतस्य संयोगस्य वृत्तिनियामकवह्निसंयोगस्य च साध्यतावच्छेदकत्वेन तदितरेण तादृशप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति स्यादेवाऽव्याप्तिः ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नं यत् तेन संसर्गविधयाऽनवच्छिन्नत्वस्य सत्त्वात्, तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य वृत्तिनियामकवह्निसंयोगस्य साध्यतावच्छेदकत्वेन वृत्तिनियामकवह्निसंयोगातिरिक्तेन केनचिदपि तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वाच्च साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितप्रतियोगिताकाऽभावविधया तादृशाऽभावग्रहणसम्भवात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादाय नाऽव्याप्तिसम्भवः । तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य वह्नित्वसमवायस्य, समवायस्य संयोगस्य च साध्यतावच्छेदकत्वेन तदितरेण तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण वह्नित्वसमवायेन समवायेन वा संसर्गविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि

समवायेन संयोग्यभावमादाय विभावनीयम् ।

यदि प्रकृतभङ्गके साध्यतावच्छेदकतायाः प्रतियोगिताऽवच्छेदकतायाश्च धर्मविधया प्रवेशः नास्तीति साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वमपि न निवेश्यम्, किन्तु 'साध्यतानिरूपितसंसर्गता-विशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्ति-त्वाभावः = सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेण सम्बन्धविधया अनवच्छिन्ना या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणम् एवाङ्गीक्रियते - तदा अव्याप्तिबाहुल्यम् ।

तथा हि - 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभाव-मादायाऽव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं महानसीयवह्न्यभावमादायाऽपि अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्ध-विधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेण चाऽनव-च्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽव-च्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्ध-विधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेण चाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकता-ऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

समवायेन वह्न्यभावमादाय नाऽव्याप्तिः समस्ति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण समवायेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽ-ग्राह्यत्वात् ।

'घटो द्रव्यत्ववान् पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः सम्बन्धविधया

य शो ल ता

तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपित-संसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं जलत्वविशिष्टद्रव्यत्वाभावमादायाऽपि अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया साध्यतावच्छेदकः यः समवायः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽन-वच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीया-ऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

किन्तु कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः सम्भवेत्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तदितरेण कालिकेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गता-विशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण समवायेन वह्नित्वसमवायेन वा संसर्गविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकता-ऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभाव-मादाय वृत्तिनियामकवह्निसंयोगेन च वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, पूर्वोक्तलक्षणस्याऽपि अत्राऽव्याप्तत्वात् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन समवायेन वा संयोग्यभा-वमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण वह्नित्वसमवायेन समवायेन वा संसर्गविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्या-ऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि संयोगेन समवाय्यभावमादाय नाऽव्याप्तिः सम्भवति ।

ननु एतद्भङ्गानुसारिलक्षणे साध्यनिष्ठत्वप्रवेशे न कोऽपि दोषः स्यात्, अत्र लक्षणमेवं बोध्यम् - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरू-

पिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपित-साध्यनिष्ठप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । साध्यनिष्ठत्वाऽप्रवेशेऽपि एतल्लक्षणस्य 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय वृत्तिनियामकवह्निसंयोगेन साध्यतायां च वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः भवति, नान्यत्र कुत्रचित् । साध्यनिष्ठत्वप्रवेशे तु उक्ताऽव्याप्तिरपि नैव भवेत् । तथा हि - तादृशाभावीयप्रतियोगितायां यद्यपि साध्यतानिरूपितसंसर्गतावि‌शिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वं वर्तते, साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वं चाऽपि वर्तते किन्तु साध्यनिष्ठत्वं नास्ति, तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगिनिष्ठत्वाद् वृत्तिनियामकवह्निसंयोगिनः साध्यत्वाऽभावाच्च । तथा च नैव सः अभावः ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिसम्भवः ? ***इति चेद् ?***

न, संयोगेन वृत्तिनियामकवह्निसंयोगेन वा वृत्तिनियामकवह्निसंयोगविशिष्टवह्नित्वसमवाय्यभावमादायाऽव्याप्त्यापत्तेः । अयमाशयः - पर्वते वृत्तिनियामकवह्निसंयोगेन वह्नित्वसमवायी वर्तते किन्तु वह्नित्वसमवायिनि वृत्तिनियामकवह्निसंयोगविशिष्टत्वं नास्ति, वृत्तिनियामकवह्निसंयोगस्य वह्नौ समवायेनाऽसत्त्वात्, पर्वते वह्नेः सत्त्वेन वृत्तिनियामकवह्निसंयोगः पर्वते, वह्नौ पर्वतस्याऽसत्त्वेन वृत्तिनियामकवह्निसंयोगो न वह्नौ, 'संयोगस्य पर्याप्त्या एव द्विष्ठत्वम्, समवायेन उभयत्र (आधाराधेययोः) भिन्न एव संयोगो वर्तते' इति मतेनेदम् । तथा च वृत्तिनियामकवह्निसंयोगविशिष्टवह्नित्वसमवाय्यभावः पर्वते प्राप्यते । एतादृशाऽभावीयप्रतियोगितावच्छेदकता वृत्ति-नियामकवह्निसंयोगविशिष्टवह्नित्वसमवाये यद्वा वृत्तिनियामकवह्निसंयोगे वह्नित्वसमवाये च वर्तते, यथा महानसीयवह्न्यभावीयप्रतियोगिताऽवच्छेदकता महानसीयवह्नित्वे = महानसवृत्तिताविशिष्टवह्नित्वे यद्वा महानसीयत्वे = महानसवृत्तित्वे वह्नित्वे च । तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः वृत्तिनियामकवह्निसंयोगः वा तेनैव सम्बन्धविधया अवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वं वर्तते । तादृशाऽभावीयप्रतियोगितावच्छेदकीभूतस्य 'संयोगः वृत्तिनियामकवह्निसंयोगः वा वह्नित्वसमवायश्च' - एतत्त्रितयस्याऽपि साध्यतावच्छेदकत्वेन एतत्त्रितयातिरिक्तेन केनचिदपि तादृशाऽभावीयप्रतियोगितायाः अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपि-

तत्वमपि स्यात् । एतदभावीयप्रतियोगिता च वृत्तिनियामकवह्निसंयोगविशिष्टवह्नित्वसमवाये, 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन वह्नित्वसमवायेऽपि, वह्नित्वसमवायश्च साध्यम्, अतः तादृशाऽभावीयप्रतियोगितायां साध्यनिष्ठत्वमपि अव्याहतम् इति साध्यतानिरूपितसंसर्गता-विशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वस्य साध्यतानिरूपितावच्छेदकताविशिष्टभिन्न-निष्ठावच्छेदकताऽनिरूपितत्वस्य साध्यनिष्ठत्वस्य च सत्त्वात् तादृशाऽभावः गृह्यते एवेति तदधिकरणे धूमस्य वृत्तित्वेन भवेदेवाऽव्याप्तिः ।

धर्मविधया सम्बन्धविधया च प्रतियोगिता-साध्यतावच्छेदकत्वयोः प्रवेशे नैषा आपत्तिः, धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण वृत्तिनियामकवह्निसंयोगेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायाः, तादृशाऽभावस्याऽग्राह्यत्वादिति वक्ष्यमाणषोडशभङ्गानुसारि-लक्षणाऽनुसारेण भावनीयम् ।

ननु वृत्तिनियामकवह्निसंयोगविशिष्टः वह्नित्वसमवायी किं कुत्रापि प्रसिद्धः ? येन तदभावः पर्वते गृह्यते ? न हि कोऽपि वह्नित्वसमवायी वह्निः वृत्तिनियामकवह्निसंयोगविशिष्टः, तथा च वृत्तिनियामकवह्निसंयोगविशिष्टवह्नित्वसमवायिनः एवाऽप्रसिद्ध्या न हि तदभावः ग्रहीतुं शक्यते, घटत्वेन पटाभावस्य = व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाऽभावस्य अस्वीकारात् । तथा च साध्यनिष्ठत्वप्रवेशे नास्त्येवाऽव्याप्ति***रिति चेद् ?***

न, "यदि पुनरानुभविको लोकानां स्वरसवाही 'घटत्वेन पटो नास्ती'त्यादिप्रत्ययो न तदा तादृशाऽभावनिवारणं गीर्वाणगुरूणामपि शक्यम् इति मन्तव्यम्" (व्य.प्र.दी. पृ.२५०) इति **व्यधिकरण-दीधितिकृदुक्तेः** प्रतियोग्यवृत्तिधर्मस्याऽपि प्रतियोगिताऽवच्छेदकत्वस्याङ्गीकरणीयत्वात्तादृशाऽभावे बाधकाऽभावात् ।

यदि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाऽभावो नैवाऽभ्युपेयते तदापि वृत्तिनियामकवह्नि-संयोगि-वह्नित्वसमवाय्युभयाभावमादायाऽव्याप्तिः स्यात् । एतादृशाऽभावीयप्रतियोगिता वृत्तिनिया-मकवह्निसंयोगिनि वह्नित्वसमवायिनि च वर्तते । तादृशाभावीयप्रतियोगितावच्छेदकत्वमुभयत्वे यद्वा वृत्तिनियामकवह्निसंयोगे वह्नित्वसमवाये च भवति । एतादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्न-निष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वम् अस्ति एव । तादृशाऽभावीयप्रतियोगितायाः वृत्तिनिया-

मकवह्निसंयोगः वह्नित्वसमवायः च - एतद्द्वितयेनैवाऽवच्छिन्नत्वेन एतद्द्वितयस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वमपि वर्तते । तादृशाऽभावीयप्रतियोगितायाः वह्नित्वसमवायिनिष्ठत्वेन वह्नित्वसमवायिनः साध्यत्वेन च साध्यनिष्ठत्वमपि तादृशाऽभावीयप्रतियोगितायां वर्तते एवेति तादृशाऽभावोऽपि गृह्यते एव । तदधिकरणं पर्वतः, तत्र वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोगिनः असत्त्वेन वह्नित्वसमवायिनः सत्त्वेऽपि 'एकसत्त्वेऽपि द्वयं नास्ति' इतिन्यायात् तादृशोभयाभावः प्राप्यते एव, तत्र धूमः वृत्तिरिति स्यादेवाऽव्याप्तिः । ततः कुतः साध्यनिष्ठत्वप्रवेशेन कोऽपि लाभः सम्भवेत् ? एतदव्याप्तिनिराकरणम् उभयविधया उभयाऽवच्छेदकत्वयोः प्रवेशेन भवति इति स्पष्टमेव ।

न च साध्यनिष्ठत्वम् = साध्येतराऽवृत्तित्वमिति विवक्षणे न दोषः, तादृशोभयाभावीयप्रतियोगितायाः वह्नित्वसमवायिवद् वृत्तिनियामकवह्निसंयोगिन्यपि सत्त्वेन वृत्तिनियामकवह्निसंयोगिनः साध्यत्वाऽभावेन च तादृशाऽभावीयप्रतियोगितायाः साध्येतरवृत्तिनियामकवह्निसंयोगिनि वृत्तित्वात्तादृशाऽभावस्याऽग्राह्यत्वा***दिति वाच्यम्;***

प्रतियोगितावि‌शेषणविधया (१) साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वस्य, (२) साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वस्य, (३) साध्येतरनिरूपितवृत्तित्वाऽभावस्य च - एतत्त्रितयस्य प्रवेशाऽपेक्षया (१) साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वस्य, (२) साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्य च - एतद्द्वितयस्य प्रवेशे लाघवात्, साध्येतरनिरूपितवृत्तित्वाभावस्य साध्येतराऽनन्तपदार्थघटितत्वेन अत्यन्तगुरुभूतत्वात्, तदपेक्षया अवश्यंप्रवेशनीये साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वे अवच्छेदकताद्वितयविशेषणविधया 'धर्मविधया' इत्यस्य प्रवेशस्याऽत्यन्तं लघुत्वादतः एवोचितत्वात्, प्रमेयसाध्यकस्थले प्रमेयेतराऽप्रसिद्धेश्च । लाघवार्थं हि भवता साध्यनिष्ठत्वघटितलक्षणमङ्गीकृतम्, किन्तु तल्लक्षणसङ्गत्यर्थं महद्गौरवमङ्गीकरणीयमभवदिति 'विनायकं प्रकुर्वाणो रचयामास वानरम्' इतिन्यायेन महदसमञ्जसं जातम् ।

न च साध्येतराऽवृत्तित्वप्रवेशे साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वं नैव प्रवेशनीयम्, साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयावच्छेदकताऽ-

निरूपितसाध्येतराऽवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षण-मङ्गीकार्यम्, कुत्रचिदपि अव्याप्तेरभावात्, साध्येतरवृत्तित्वप्रवेशेनैव सर्वोपपत्तेः । तथा च एतल्लक्षणमेव लघुभूतमित्येतदेवाङ्गीकरणीयम्, धर्मविधया सम्बन्धविधया च साध्यता-प्रतियोगि-त्वावच्छेदकत्वयोः प्रवेशः नैव कार्यः ***इति वाच्यम्,***

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादाय अव्याप्त्यापत्तेः । महानसीय-वह्निश्च शुद्धवह्नितः अभिन्नः एव, 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायात् । महानसीयवह्न्य-भावीयप्रतियोगिता च महानसीयवह्नौ एव वर्तते, न तु तद्भिन्ने कुत्रचिदपि इति तादृशाऽभावीय-प्रतियोगितायां साध्येतराऽवृत्तित्वं समस्ति एव, महानसीयवह्नेः साध्येतरत्वाङ्गीकारे तादृशन्यायाऽ-सङ्गत्या महासाहसापत्तेः । तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यता-निरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वमस्ति एव । तथा च साध्यता-निरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयावच्छेदकताऽनिरूपितसाध्येतराऽवृत्तिप्रतियोगितानिरू-पकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इतिलक्षणघटकतया तादृशमहानसीयवह्न्यभावः ग्रहीतुं शक्यते एव, तदधिकरणे धूमस्य वृत्तित्वेन लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वनिवेशे तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नेन महानसीयत्वेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वस्य = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वस्य विरहात्तादृशाऽभावः नैव ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिः ?

तथा च साध्येतराऽवृत्तित्वस्य प्रतियोगिताविशेषणविधया प्रवेशेऽपि साध्यतानिरूपिताऽव-च्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वं प्रवेशनीयमेव । तत्प्रवेशश्चौव्ये साध्येतराऽवृत्ति-त्वप्रवेशाऽपेक्षया अवच्छेदकताविशेषणविधया यत्किञ्चित्सम्बन्धाऽवच्छिन्नत्वप्रवेशः एव लघुभूतः, साध्येतरावृत्तित्वस्य अनन्तपदार्थघटितत्वेन गुरुभूतत्वात्, तदपेक्षया यत्किञ्चित्सम्बन्धावच्छिन्नत्वस्यैव लघुभूतत्वात् । अतः प्रकृतलक्षणेऽपि न तत्प्रवेशः उचितः इति विभावनीयम् एतत्तत्त्वम् ।

– सप्तमभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तदितरेणाऽनवच्छिन्ना, साध्यतावच्छेदकभिन्नेन धर्मविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । परिष्कार-

शैल्या इदमित्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपित-साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपित-प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभाव इति ।

एतल्लक्षणाङ्गीकारेऽपि असम्भवः एव स्यात् । एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्याऽपि ग्रहणं नैव सम्भवति, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वह्नित्वेनैवाऽवच्छिन्नत्वेन वह्नित्वस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकभिन्नेन धर्मविधयाऽन-वच्छिन्नत्वस्य = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्ना-वच्छेदकताऽनिरूपितत्वस्य सत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यता-वच्छेदकः संयोगः तदितरेण वह्नित्वेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरू-पितसंसर्गताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्याऽग्राह्यत्वात् । एवं न कोऽप्यभावः लक्षणघटकतया प्राप्यते इति एवं सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः ।

– अष्टमभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया अनवच्छिन्ना, साध्यतावच्छेदक-भिन्नेन धर्मविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । परिष्कारशैल्या इदमेव इत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंस-र्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽ-वच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताक-घटाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीय-प्रतियोगितायाः साध्यतावच्छेदकभिन्नेन घटत्वेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्व-विरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया

यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नेन उभयत्वेन घटत्वेन वा अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्नेन महानसीयवह्नित्वेन महानसीयत्वेन वा अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि न अव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः वह्नित्वेनैव धर्मविधयाऽवच्छिन्नत्वेन वह्नित्वस्य च साध्यतावच्छेदकत्वेन साध्यतावच्छेदकभिन्नेन धर्मविधया अनवच्छिन्नत्वस्य = साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्य तादृशाऽभावीयप्रतियोगितायां सत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तद्भिन्नेन समवायेन सम्बन्धविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु प्रकृते संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाव एवादातुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वह्नित्वेनैवाऽवच्छिन्नत्वेन वह्नित्वस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च । तादृशाऽभावाधिकरणे च धूमस्याऽवृत्तित्वाद् भवति हि लक्षणसमन्वयः इति नाऽत्र अव्याप्तिः असम्भवो वा ।

एवञ्च 'घटो द्रव्यत्वविशिष्टः, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया साध्यतावच्छेदकभिन्नेन जलत्वविशिष्टद्रव्यत्वत्वेन अवच्छिन्नतया तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया साध्यतावच्छेदकभिन्नेन जलत्व-द्रव्यत्वोभयत्वेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्याऽग्राह्यत्वात् । य शो ल ता

एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया साध्यतावच्छेदकीभूतद्रव्यत्वत्वेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तदितरेण कालिकेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वह्नित्वसमवायेनैवाऽवच्छिन्नत्वेन तदितरेण अनवच्छिन्नत्वेन, वह्नित्वसमवायस्य साध्यतावच्छेदकत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः

साध्यतावच्छेदकः संयोगः तदितरेण समवायेन वह्नित्वसमवायेन वा सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु "पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्" - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वृत्तिनियामकवह्निसंयोगेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन वृत्तिनियामकवह्निसंयोगस्य च 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन साध्यतावच्छेदकत्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वस्याऽपि तादृशाऽभावीयप्रतियोगितायां सत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् ।

य शो ल ता

एवम् उक्तस्थले एव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वृत्तिनियामकवह्निसंयोगेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन, तादृशवृत्तिनियामकवह्निसंयोगस्य च साध्यताऽवच्छेदकत्वेन साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्याऽपि तादृशाऽभावीयप्रतियोगितायां सत्त्वाच्च तादृशाऽभावस्याऽग्राह्यत्वादिति ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादायाऽव्याप्तिः न स्यात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया संयोगेनैवाऽवच्छिन्नत्वेन, संयोगेतरेणाऽनवच्छिन्नत्वेन, संयोगस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण वह्नित्वसमवायेन समवायेन वा सम्बन्धविधयाऽवच्छिन्नत्वेन तादृशाऽभावीय-

प्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति । एवं 'पर्वतः समवायिविशिष्टः धूमाद्' - इत्यत्रापि अव्याप्त्यभावः एवेति स्वयमूह्यम् ।

साध्यनिष्ठत्वप्रवेशे पूर्वोक्तरीत्या अव्याप्त्यादिकमवसेयम् ।

– नवमभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेनाऽनवच्छिन्ना, साध्यतावच्छेदकभिन्नेनाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । अत्र साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वं प्रवेश्यतां मा वा, साध्यनिष्ठत्वं प्रवेश्यतां मा वा असम्भवः दोषः स्यादेव । परिष्कारशैल्या इदं लक्षणम् - 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवमभिधीयते ।

एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि ग्रहीतुं नैव शक्यते, तादृशाऽभावीयप्रतियोगितायाः संयोग-वह्नित्वाभ्यामेवावच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन, संयोग-वह्नित्वयोश्च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टवह्नित्वतः भिन्नेन संयोगेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽपि अग्राह्यत्वात् । एवं च न कोऽपि अभावः कुत्रापि लक्षणघटकतया प्राप्यते, सर्वेषामभावानां साध्यतावच्छेदकधर्मभिन्नेन साध्यतावच्छेदकसम्बन्धेनाऽवच्छिन्नप्रतियोगिताकत्वादिति भवेदेवाऽसम्भवः । 'घटः समवायिविशिष्टः, रूपाद्' इत्यत्राऽनेकान्ताऽऽश्रयणेनैवाऽसम्भवः उपपादनीयः इति पूर्वमुक्तमत्रानुसन्धेयम् ।

या शो ल ता

– दशमभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेनाऽनवच्छिन्ना, साध्यतावच्छेदकभिन्नेन सम्बन्धविधयाऽनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः। परिष्कारशैल्या इदमेव - 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठा-

ऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्थमभिधीयते ।

अत्राऽपि असम्भवः एव दोषः । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र लक्षणघटकतया संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि ग्रहीतुं न शक्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया संयोगेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन, संयोगस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायां धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तद्भिन्नेन संयोगेनाऽवच्छिन्नत्वात्तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं न कोऽप्यभावः कुत्रापि लक्षणघटकतया धर्तुं शक्यते, सर्वेषामभावानां धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया यः साध्यतावच्छेदकः तेन अवच्छिन्नप्रतियोगिताकत्वाऽवश्यम्भावादिति । अनेकान्तः एव अत्रापि कान्तः इति पूर्वोक्तमत्रापि अनुसन्धेयम् ।

य
शो
ल
ता

– एकादशभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन धर्मविधया अनवच्छिन्ना, साध्यतावच्छेदकभिन्नेन अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या इदमेव इत्थमभिधीयते - साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान्, धूमाद्' इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं वह्नित्वं धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः संयोग-वह्नित्वाभ्यामेवाऽवच्छिन्नत्वेन संयोग-वह्नित्वयोश्च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वस्याऽपि सत्त्वाच्चेति नैतल्ल-

क्षणाऽनुसारेण असम्भवः ।

साध्यतावच्छेदकभिन्नाऽनवच्छिन्नत्वस्य प्रथमलक्षणवदत्रापि प्रवेशात् प्रथमलक्षणानुसारेण यत्र यत्र अव्याप्त्यभावः तत्र तत्र एतल्लक्षणाऽनुसारेणाऽपि अव्याप्त्यभावः स्यादेव इति प्रथमलक्षणस्य यत्र यत्राऽव्याप्तिः आसीत् तत्र तत्र एतल्लक्षणस्याऽव्याप्तिरस्ति न वा ? इति एव चिन्तनीयम् ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादाय एतल्लक्षणाऽनुसारेण स्यादेवाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेण अनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्य सत्त्वात्, तादृशाभावीयप्रतियोगितायाः वह्नित्वसमवायेन समवायेन वा अवच्छिन्नत्वेन तस्य च साध्यताऽवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । एतदभावीयप्रतियोगितायाः साध्यनिष्ठत्वेन साध्यनिष्ठत्वप्रवेशेऽपि न निस्तारः ।

पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद् - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः संयोग-वृत्तिनियामकवह्निसंयोगाभ्यामेवाऽवच्छिन्नत्वेन, तदितरेण अनवच्छिन्नत्वेन, तादृशसंयोग-वृत्तिनियामकवह्निसंयोगयोश्च साध्यताऽवच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण वृत्तिनियामकवह्निसंयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवम् उक्तस्थले एव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः नैव स्यात्, तादृशाऽभावीयप्रतियोगितायाः वृत्तिनियामकवह्निसंयोगेनैवाऽवच्छिन्नत्वेन, तदितरेण अनवच्छिन्नत्वेन वृत्तिनियामकवह्निसंयोगस्य साध्यताऽवच्छेदकत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यताव-

च्छेदकः वह्नित्वसमवायः तदितरेण वृत्तिनियामकवह्निसंयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः वह्नित्वसमवाय-संयोगाभ्यां समवाय-संयोगाभ्यां वाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन तयोश्च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण संयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि नाऽव्याप्तिः ।

य शो ल ता

एतद्भङ्गके धर्मविधया साध्यता-प्रतियोगिताऽवच्छेदकत्वयोरेव प्रवेशनिर्धाराद् यदि 'धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन धर्मविधया अनवच्छिन्ना या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः = साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवमेव लक्षणमभ्युपेयते तदाऽव्याप्तिबाहुल्यम् ।

तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र घटाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तदितरेण घटत्वेनाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तदितरेण वह्नि-घटोभयत्वेन घटत्वेन वा अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया

यः साध्यतावच्छेदकः वह्नित्वधर्मः तद्भिन्नेन महानसीयवह्नित्वेन महानसीयत्वेन वा धर्मविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु समवायेन वह्न्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वह्नित्वेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन वह्नित्वस्य च धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवञ्च 'घटो द्रव्यत्वविशिष्टः, पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तदितरेण जलत्वविशिष्टद्रव्यत्वत्वेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तदितरेण जलत्व-द्रव्यत्वोभयत्वेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु कालिकेन द्रव्यत्वाभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया द्रव्यत्वत्वेनैवाऽवच्छिन्नत्वेन, तदितरेण अनवच्छिन्नत्वेन तादृशद्रव्यत्वत्वस्य च धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

अग्रेतनस्थलेषु मूललक्षणवदेवाऽस्याऽपि गतिः इति स्वयमूह्यम् ।

– द्वादशभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन धर्मविधया अनवच्छिन्ना साध्यतावच्छेदकभिन्नेन सम्बन्धविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः ।

परिष्कारशैल्या इदमेवेत्थमभिधीयते - साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकता-विशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपिताऽवच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र घटाभावम्, वह्नि-घटोभयाभावम्, महानसीयवह्न्यभावं वाऽऽदाय नाऽव्याप्तिः, पूर्वोक्तलक्षणवद् अत्रापि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्य प्रवेशात्तेनैव उक्ताऽभावानां वारणादिति ।

पर्वतो वह्निमान् धूमाद् - इत्यत्र समवायसम्बन्धेन वह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वह्नित्वेनैवाऽवच्छिन्नत्वेन, वह्नित्वेतरेणाऽनवच्छिन्नत्वेन, वह्नित्वस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नेन समवायेन संसर्गविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

य शो ल ता

एवञ्च 'पर्वतो वह्निमान् धूमाद्' - इत्यत्रेव 'घटो द्रव्यत्ववान्, पृथ्वीत्वादि'त्यत्रापि जलत्व-विशिष्टद्रव्यत्वाभावम्, जलत्व-द्रव्यत्वोभयाभावं वाऽऽदाय नाऽव्याप्तिः, पूर्वोक्तलक्षणवद् अत्रापि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वप्रवेशात्तेनैवोक्ताऽभाववारणात् ।

कालिकेन द्रव्यत्वाभावमादाय अपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया द्रव्यत्वत्वेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन, द्रव्यत्वत्वस्य च धर्मविधया साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः साध्यतावच्छेदकभिन्नेन कालिकेन संसर्गविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन च वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकीभूतस्य समवायस्य वह्नित्वसमवायस्य वा साध्यताऽवच्छेदकत्वेन तदितरेण सम्बन्धविधया तस्याः अनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितावच्छेदकतात्वविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च तादृशाऽभावस्य ग्राह्यत्वात् । अत्र साध्यनिष्ठत्वप्रवेशेऽपि उक्ताऽभावीयप्रतियोगितायाः तादृशत्वेन न निस्तारः ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय, वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावं वादाय नाऽव्याप्तिः, पूर्वोक्तलक्षणवदत्रापि साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वप्रवेशात्तेनैवाऽव्याप्तिवारणात् । एवमेतत्परिष्कारेणैव उक्तस्थले वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादायाऽपि नाऽव्याप्तिरिति ।

य शो ल ता

– त्रयोदशभङ्गकाऽनुसारिलक्षणम् -

धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेनाऽनवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कारशैल्या इदमेवेत्थमभिधीयते - साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपित-साध्यतानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टभिन्न(= साध्यतानिरूपितसंसर्गताविशिष्टभिन्न)निष्ठावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणस्य कुत्रचिदपि समन्वयाऽभावादसम्भवदोषदुष्टमिदम् । 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि एतल्लक्षणानुसारेण धर्तुं न शक्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तद्भिन्नेन वह्नित्वेन अवच्छिन्नतया तादृशाभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्न-

निष्ठावच्छेदकताऽनिरूपितत्वविरहात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तद्भिन्नेन संयोगेन अवच्छिन्नतया तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वस्याप्यसत्त्वाच्च तादृशाऽभावस्याऽग्राह्यत्वात् । एवं न कोऽप्यभावोऽत्र लक्षणघटकतया धर्तुं शक्यते, एवमन्यत्राऽपि इति स्यादेवाऽसम्भवः, पूर्वोक्तरीत्याऽनेकान्ताऽश्रयणेन दोषाभावादिति ।

– चतुर्दशभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया अनवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । इदमेव परिष्कारशैल्या इत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

अत्राऽपि असम्भवः एव दोषः । पर्वतो वह्निमान्, धूमाद् - इत्यत्र एतल्लक्षणानुसारेण संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि धर्तुं न शक्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तदितरेण संयोगेन अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवं सर्वत्रापि कस्यचिदपि अभावस्याऽग्राह्यत्वात्, लक्षणसमन्वयकारकाणां सर्वेषामभावानां धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया अवच्छिन्नत्वध्रौव्याच्च भवेदेवाऽसम्भवः ।

– पञ्चदशभङ्गकानुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन अनवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन धर्मविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । परिष्कारशैल्या इदमेवेत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चि-

त्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः ।

एतल्लक्षणम् असम्भवदोषदुष्टम् । 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि नैव धर्तुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यदवच्छेदकं वह्नित्वं धर्मविधया तदवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठ-यत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तद्भिन्नेन वह्नित्वेनाऽवच्छिन्नतया तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठावच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । एवमन्यत्र सर्वत्राऽपि लक्षणघटकाऽभावाप्राप्तेः भवेदेवाऽसम्भवः ।

इत्थम् एतत्पर्यन्तानि सर्वाण्यपि लक्षणानि असम्भवादिदोषदुष्टानि इति षोडशभङ्गकाऽनुसारि धर्म-संसर्गविधया साध्यता-प्रतियोगिताऽवच्छेदकत्वयोः प्रवेशमादृत्यैव लक्षणमङ्गीकर्तव्यम् । तद्यथा -

– षोडशभङ्गकाऽनुसारिलक्षणम् -

सम्बन्धविधया यः साध्यतावच्छेदकः तद्भिन्नेन सम्बन्धविधया अनवच्छिन्ना, धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन धर्मविधया अनवच्छिन्ना च या प्रतियोगिता तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । परिष्कृतशैल्येदमेवेत्थमभिधीयते - साध्यतानिरूपितसंसर्गताविशिष्ट-

●

❋ संबंधविधया प्रतियोगिताअवच्छेदकत्वअप्रवेशे असंभवतादवस्थ्यम् ❋

જો આવો ખુલાસો કરો કે →

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મથી ભિન્ન ન હોય તથા

(૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન ન હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ - તો જે વહ્નિઅભાવ લક્ષણઘટક તરીકે લેશો તે નં-૧માંથી પસાર થઈ જશે. કારણ કે વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક વહ્નિત્વધર્મ સાધ્યતાઅવચ્છેદક વહ્નિત્વધર્મથી ભિન્ન નથી. પણ, નં-૨ માંથી પસાર નહીં થાય. કારણ કે વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક વહ્નિત્વ સાધ્યતાઅવચ્છેદક સંયોગસંબંધથી ભિન્ન છે જ. માટે પુનઃ અસંભવ દોષ !

भिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता-
विशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावा-
धिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणानुसारेण न कुत्रचिदप्यव्याप्तिः । तथा हि - पर्वतो वह्निमान् धूमाद् - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदक-

●

❀ ઉભયવિધયા ઉભયનો પ્રવેશ અનિવાર્ય જ ❀

આના માટે આવો ખુલાસો કરવો પડશે કે →

જે અભાવીયપ્રતિયોગિતામાં

(૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્‌વિશિષ્ટઈતરનિષ્ઠા યા સંસર્ગવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્‌અનિરૂપિતત્વ અને

(૨) સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્‌વિશિષ્ટઈતરનિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્‌અનિરૂપિતત્વ હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ. સરળ ભાષામાં,

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મથી ભિન્ન ન હોય અને (૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન ન હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ ! આ એકદમ પાકું લક્ષણ !

❀ તે લક્ષણ પ્રમાણે સર્વત્ર સમન્વય ❀

જુઓ, હવે ક્યાંય દોષ નહીં આવે. સૌથી પહેલા **पर्वतो वह्निमान् धूमात्**માં લક્ષણ-સમન્વય કરીએ.

લક્ષણઘટક અભાવ = વહ્નિત્વઅવચ્છિન્ન-સંયોગસંબંધઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિ-અભાવ. આ વહ્નિઅભાવીયપ્રતિયોગિતામાં (૧) સાધ્યતાનિરૂપિતા યા સંસર્ગવિધયા-(સાધ્યતા)અવચ્છેદકતા તદ્‌વિશિષ્ટસંયોગસંબંધભિન્નવહ્નિત્વ-સમવાય આદિ નિષ્ઠા યા સંસર્ગ-વિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્‌અનિરૂપિતત્વ જ આવશે. કારણ કે વહ્નિત્વ વહ્નિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદક છે. પણ, ધર્મવિધયા, સંબંધવિધયા નહીં. તેથી સંબંધવિધયા જે પ્રતિયોગિતાઅવચ્છેદકતા સંયોગમાં જાય છે તદ્‌નિરૂપિતત્વ વહ્નિઅભાવીયપ્રતિયોગિતામાં

ताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्व- य
धर्मः तद्भिन्नेन घटत्वेन धर्मविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपित- शो
यत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽ- ल
निरूपितत्वविरहात्तादृशाभावस्याऽग्राह्यत्वात् ।

●

જાય. કિંતુ સંસર્ગવિધયા વહ્નિત્વનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાનિરૂપિતત્વ ન જ જાય. જે પ્રતિયોગિતાઅવચ્છેદક સંબંધ હોય તેમાં જ સંસર્ગવિધયા અવચ્છેદકતા જાય. અને તન્નિ-રૂપિતત્વ તે પ્રતિયોગિતામાં જાય. વહ્નિત્વ પ્રસ્તુતમાં પ્રતિયોગિતાઅવચ્છેદક સંબંધ છે જ નહીં. માટે, સાધ્યતાનિરૂપિતા યા સંબંધવિધયા અવચ્છેદકતા તદ્વિશિષ્ટસંયોગઈતરનિષ્ઠા યા સંબંધવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તન્નિરૂપિતત્વઅભાવ વહ્નિઅભાવીય-પ્રતિયોગિતામાં રહેશે. કારણ કે સંયોગઈતર કોઈ વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ નથી.

જે રીતે વહ્નિઅભાવીયપ્રતિયોગિતા પહેલા પરિષ્કારમાંથી પસાર થઈ ગઈ તે જ રીતે (૨) સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટવહ્નિત્વઈતરસંયોગ-ઘટત્વઆદિનિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્અનિરૂપિતત્વ વહ્નિઅભાવીય-પ્રતિયોગિતામાં રહેશે જ. કારણ કે જે અભાવનો જે પ્રતિયોગિતાઅવચ્છેદક ધર્મ હોય તેમાં વિ
જ રહેલી ધર્મવિધયા અવચ્છેદકતાથી નિરૂપિત તે અભાવીયપ્રતિયોગિતા કહેવાય. દા.ત. ન
ઘટાભાવનો ઘટત્વધર્મ પ્રતિયોગિતાઅવચ્છેદક ધર્મ છે. માટે ઘટત્વમાં જ રહેલી ધર્મવિધયા મા
પ્રતિયોગિતાઅવચ્છેદકતાથી નિરૂપિત ઘટાભાવીયપ્રતિયોગિતા કહેવાય. ઘટત્વઅન્યમાં (= ઘટત્વ સિવાયનામાં) રહેલી ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતાથી તો અનિરૂપિત જ ઘટાભાવીયપ્રતિયોગિતા કહેવાય. પ્રસ્તુતમાં વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ વહ્નિત્વ છે. માટે, વહ્નિત્વમાં રહેલી ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતાથી નિરૂપિત વહ્નિઅભાવીય-પ્રતિયોગિતા બને. વહ્નિત્વઈતરનિષ્ઠમાં રહેલી ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતાથી અનિરૂપિત જ વહ્નિઅભાવીયપ્રતિયોગિતા કહેવાય. આમ, સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટવહ્નિત્વઈતરનિષ્ઠા યા ધર્મવિધયા (પ્રતિયોગિતા)અવચ્છેદ-કતા તદ્અનિરૂપિતત્વ વહ્નિઅભાવીયપ્રતિયોગિતામાં રહી જશે. આમ, વહ્નિઅભાવ લક્ષણ-ઘટક બની જશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. માટે, લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ નહીં આવે.

ટૂંકમાં, વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક વહ્નિત્વધર્મ સાધ્યતાઅવચ્છેદક વહ્નિત્વ-

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तद्भिन्नेन महानसीयवह्नित्वेन महानसीयत्वेन वा धर्मविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः तद्भिन्नेन वह्नि-घटोभयत्वेन घटत्वेन वा धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं समवायेन वह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं वह्नित्वं धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तद्भिन्नेन समवायेन सम्बन्धविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वधर्मः धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽ-

●

ધર્મથી ભિન્ન નથી. તથા વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદક સંયોગસંબંધ સાધ્યતાઅવચ્છેદક સંયોગસંબંધથી ભિન્ન નથી. માટે, વહ્નિઅભાવ લઈ શકાશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. માટે લક્ષણસમન્વય થઈ જશે. અસંભવ દોષ લાખો જોજન દૂર !

नवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण समवायेन सम्बन्धविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

अत्र संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः एव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं वह्नित्वं धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च। तादृशाऽभावाधिकरणं जलह्रदादिकम्, धूमस्तत्राऽवृत्तिरिति लक्षणसमन्वयान्नाऽसम्भवः अव्याप्तिः वा ।

एवञ्च 'घटो द्रव्यत्वविशिष्टः, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तद्भिन्नेन सम्बन्धविधया अनवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं तद्भिन्नेन जलत्वविशिष्टद्रव्यत्वत्वेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तेनैव सम्बन्धविधया अवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः द्रव्यत्वत्वधर्मः तद्भिन्नेन जलत्व-द्रव्यत्वोभयत्वेन धर्मविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धा-

वच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत् साध्यतावच्छेदकं द्रव्यत्वत्वं धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः तदितरेण कालिकेन सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

अत्र समवायसम्बन्धावच्छिन्न-द्रव्यत्वत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः समवायः सम्बन्धविधया तेनैव अवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यत्साध्यतावच्छेदकं द्रव्यत्वत्वं धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च । तादृशाऽभावाधिकरणं गुणादिकं तत्र पृथ्वीत्वमवृत्ति एवेति लक्षणसमन्वयान्नाऽव्याप्तिः ।

य शो ल ता

एवञ्च 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय नाऽव्याप्तिः । तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण समवायेन वह्नित्वसमवायेन वा सम्बन्धविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः नैव स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्ध-

विधया यः साध्यतावच्छेदकः संयोगः तेनैव सम्बन्धविधया अवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण वृत्तिनियामकवह्निसंयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात् तादृशाऽभावस्य अग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः वृत्तिनियामकवह्निसंयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण वृत्तिनियामकवह्निसंयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव संयोगेन साध्यतायां वह्नित्वसमवायेन समवायेन वा संयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः तदितरेण वह्नित्वसमवायेन समवायेन वा सम्बन्धविधयाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितत्वविरहात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः वह्नित्वसमवायः तदितरेण संयोगेन धर्मविधया अवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वविरहाच्च तादृशाऽभावस्याऽग्राह्यत्वात् । एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादायाऽपि नाऽव्याप्तिरिति बोध्यम् ।

एवञ्चाऽत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वसमवायाऽवच्छिन्नप्रतियोगिताकवह्नित्वसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया यः साध्यतावच्छेदकः संयोगः सम्बन्धविधया तेनैवाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठ-

संसर्गीयाऽवच्छेदकताऽनिरूपितत्वसत्त्वात्, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया यः साध्यता-
य वच्छेदकः वह्नित्वसमवायः धर्मविधया तेनैवाऽवच्छिन्नत्वेन तदितरेणाऽनवच्छिन्नत्वेन च तादृशाऽ-
शो भावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठ-
ल यत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वाच्च । तादृशाऽभावाधिकरणं जलह्रदा-
ता दिकमेव, पर्वतादौ संयोगेन वह्नित्वसमवायिनः वह्नेः सत्त्वात् । तत्र च धूमः अवृत्तिरिति
लक्षणसमन्वयान्नाऽव्याप्तिगन्धलेशोऽपि ।

●

❀ उभयविधया उभयप्रवेशघटित लक्षण निर्दुष्ट ❀

આ લક્ષણ અત્યારે ફાઈનલ કર્યું છે. હવે આ લક્ષણની બરાબર વિભાવના કરજો. આ લક્ષણ પ્રમાણે **पर्वतो वह्निमान् धूमात्**માં (૧) મહાનસીયવહ્નિઅભાવ, (૨) વહ્નિ-જલઉભયાભાવ, (૩) સમવાયથી વહ્નિઅભાવ, (૪) સંયોગ-સમવાયઉભયથી વહ્નિઅભાવ - આ ચારમાંથી કોઈ પણ અભાવને લઈને અવ્યાપ્તિ નહીં આવે. તથા **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલે જ્યારે સંયોગ સાધ્યતાઅવચ્છેદક સંબંધ હશે ત્યારે (૧) સમવાયથી વહ્નિત્વસમવાયિઅભાવ, (૨) સંયોગથી વહ્નિસંયોગિઅભાવ તથા (૩) સમવાયથી સંયોગિ-અભાવ - આમાંથી કોઈ પણ અભાવને લઈને અવ્યાપ્તિ નહીં આવે, (૪) જ્યારે વહ્નિ-સંયોગસંબંધથી સાધ્ય હશે (ઉક્ત સ્થલમાં જ) ત્યારે વહ્નિસંયોગ સંબંધથી વહ્નિસંયોગિઅભાવને
વિ લઈને પણ અવ્યાપ્તિ નહીં આવે. તથા (૧) **पर्वतः समवायिमान्, धूमात्** - આ સ્થલે પણ
ન સમવાયથી સંયોગિઅભાવને લઈને અવ્યાપ્તિ નહીં આવે.

મા આ નવમાંથી એકે રીતે હવે અવ્યાપ્તિ નહીં આવે. આ બધું સ્વયં વિચારવું. ગ્રંથના અતિગૌરવના ભયથી અમે તેની છણાવટ કરતા નથી.

આના દ્વારા આપણે જોયું કે સાધ્યતાઅવચ્છેદકતાનો પણ ધર્મવિધયા અને સંબંધવિધયા તથા પ્રતિયોગિતાઅવચ્છેદકતાનો પણ ધર્મવિધયા અને સંબંધવિધયા પ્રવેશ અનિવાર્ય છે. ઉભયત્ર ઉભયનો પ્રવેશ કરીને જ લક્ષણ બનશે. આથી, પૂર્વે તમે શંકા કરેલી કે 'કોઈ એક જગ્યાએ જ ધર્મવિધયા અને સંબંધવિધયા પ્રવેશ કરવો, બંને જગ્યાએ નહીં.' આ શંકાનું પણ સમાધાન થઈ ગયું. એક જ જગ્યાએ પ્રવેશ કરવામાં અસંભવ દોષ દેખાડેલ જ છે.

આ રીતે આપણો ભાવાર્થ સંપૂર્ણ થાય છે. ખૂબ જ શાંત ચિત્તે આ પદાર્થ વાંચશો. સમજાઈ જાય પછી સંક્ષેપમાં અલગથી લખી લેજો, જેથી બરાબર રૂઢ થઈ જાય. ક્યાંય પણ શંકા પડે તો પુનઃ પુનઃ એ જ પદાર્થ વાંચજો, ક્યાંક ને ક્યાંક સમાધાન મળી જશે. પદાર્થ

वस्तुतः साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वरूपस्यैव वाच्यतया

●

एवञ्च साध्यतावच्छेदकधर्मावच्छिन्नत्वप्रवेशे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वह्नित्वसमवायेन संयोग्यभावमादायाऽव्याप्तिवारणाय साध्यतावच्छेदकत्वस्य प्रतियोगिताऽवच्छेदकत्वस्य च धर्मविधया सम्बन्धविधया वा प्रवेशे आदृतेऽपि तद्वारणसम्भवादुभयविधया प्रवेशः निरर्थकः एव इति पूर्वोक्ताऽऽशङ्काऽपि (दृश्यतां पृ. ४५५) ***अपास्ता***, साध्यतावच्छेदकधर्माऽवच्छिन्नत्वस्य साध्यतावच्छेदकधर्मभिन्नधर्माऽनवच्छिन्नत्वरूपस्याऽवश्यं वाच्यतया तत्रैकविधया प्रवेशे असम्भवादिदोषापातात् । ततः अत्र तु उभयविधयैव उभयस्य प्रवेशः कार्यः इति षोडशभङ्गकवर्तिलक्षणमेव सर्वाङ्गसम्पूर्णमिति स्थितम् ।

एतत्सर्वं मनसिकृत्याह - **वस्तुतः**, 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र साध्यतावच्छेदकधर्मावच्छिन्नत्वस्यैव प्रतियोगितावि‌शेषणविधया प्रवेशे महानसीयवह्न्यभावमादायाऽव्याप्तिः भवति, तादृशाऽभावीयप्रतियोगितायाः महानसीयत्व-वह्नित्वोभयाऽवच्छिन्नतया साध्यतावच्छेदकधर्माऽवच्छिन्नत्वाऽनपायादिति एतद्वारणाय **साध्यतावच्छेदकधर्माऽवच्छिन्नत्वस्य साध्यतावच्छेदकाऽतिरिक्तधर्माऽनवच्छिन्नत्वरूपस्यैव वाच्यतया,** (इत्येतस्याऽग्रेऽन्वयः) तथा च महानसीयवह्न्यभावीयप्रतियोगितायाः वह्नित्वाऽतिरिक्तमहानसीयत्वाऽवच्छिन्नतया न तमादायाऽव्याप्तिः सम्भवति ।

'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यतायां

●

એકદમ સ્પષ્ટ છે. થોડો અઘરો છે, છતાં બેસી જશે. આ જ તો મનોએકાગ્ર રૂપ ઉત્તમ ધ્યાન છે. હિંમત ન હારવી તથા આને નિરર્થક ન માનવું. હવે શબ્દાર્થ જોઈ લઈએ :-

✲ ભાવાર્થ પછી શબ્દાર્થ ✲

शब्दार्थ :- (**वस्तुतः** થી લઈ **शङ्का निरस्ता** સુધીનું આપણે ભાવાર્થમાં જોઈ લીધું છે. હવે, તે દરેકનો શબ્દાર્થ જોવાનો છે.) પૂર્વ વિકલ્પમાં **एतेन**... કહી જે શંકા બતાવી છે તે વ્યાજબી છે. માટે, '**वस्तुतः**' કહી નવો વિકલ્પ બતાવતા કહે છે કે - વાસ્તવમાં સાધ્યાભાવવદ્અવૃત્તિત્વલક્ષણમાં સાધ્યાભાવીયપ્રતિયોગિતાના વિશેષણ તરીકે જે સાધ્યતાઅવચ્છેદકધર્મઅવચ્છિન્નત્વનો પ્રવેશ કરવાનો છે તે સાધ્યતાઅવચ્છેદકધર્મઅવચ્છિન્નત્વ = સાધ્યતાઅવચ્છેદકધર્મભિન્નધર્મઅનવચ્છિન્નત્વ - આ પ્રમાણે કહેવું પડશે. આ સાધ્યતાઅવચ્છેદકધર્મભિન્નધર્મઅનવચ્છિન્નત્વમાં (એટલે કે તાદશધર્મઅનવચ્છિન્નત્વ તરીકે)

गू ढा *तत्र साध्यतानिरूपितधर्मविधयावच्छेदकतावदितरनिष्ठावच्छेदकत्वा-*
ऽनिरूपितत्वमात्रप्रवेशे

●

वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय अव्याप्तिः भवति उक्तपरिष्कारास्वीकारेऽपि, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया वृत्तिनियामकवह्निसंयोगेनैवाऽवच्छिन्नत्वेन, तदितरेणाऽनवच्छिन्नत्वेन, वृत्तिनियामकवह्निसंयोगस्य च साध्यतावच्छेदकत्वेन तादृशाऽभावीयप्रतियोगितायां साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वसत्त्वात् ।

य शो ल ता

यदि च एतदव्याप्तिवारणाय साध्यतावच्छेदकातिरिक्तधर्माऽनवच्छिन्नत्वस्य स्थाने **तत्र** लक्षणे **साध्यतानिरूपितधर्मविधयाऽवच्छेदकतावदितरनिष्ठावच्छेदकताऽनिरूपितत्वमात्रप्रवेशे** = साध्यतानिरूपिता या धर्मविधया अवच्छेदकता तद्वद्भिन्ननिष्ठावच्छेदकताऽनिरूपितत्वस्यैव प्रतियोगितावि-शेषणविधया प्रवेशे इत्यर्थः, 'धर्मविधया' इत्यस्य विभक्त्यन्तत्वेऽपि तेन सह समासः ग्रन्थकृता कृतः इति धर्मविधया इति पदं यत्किञ्चित्सम्बन्धावच्छिन्नपरमन्यथा तदनुपपत्तेः इति । तथा

●

જો ફક્ત [1]साध्यतानिरूपित धर्मविधया अवच्छेदकताविशिष्टेतर(= भिन्न)निष्ठअवच्छेदकताअनिरूपितत्व આટલું જ કહેશો તો साध्यताअवच्छेदकधर्मथी(= तादृशधर्म)अतिरिक्त એવા સંબંધને લઈને અસંભવ દોષ આવશે. માટે, [2]धर्मविधया अवच्छेदकताअनिरूपितत्वनो પ્રવેશ કરવો જોઈએ.... **त्वाऽनिरूपितत्वं....त्वाऽनिरूपितत्वं च प्रवेशनीयम्** - આ રીતે અન્વય છે. તથા साध्यताअवच्छेदकसंबंधअवच्छिन्नत्व = साध्यताअवच्छेदकसंबंधेतरसंबंधअनवच्छिन्नत्व - આ પ્રમાણે જ કહેવાનું છે. હવે અહીં જો ફક્ત [3]साध्यतानिरूपित संसर्गविधया अवच्छेदकतावद्भिन्ननिष्ठ(= तादृशसंसर्गअतिरिक्तनिष्ठ)अवच्छेदकताअनिरूपितत्वनो જ પ્રવેશ કરશો તો साध्यताअवच्छेदकसंबंधभिन्न ધર્મને લઈને અસંભવદોષ આવી જશે. માટે, [4]संसर्गविधया अवच्छेदकताअनिरूपितत्वनो પ્રવેશ જરૂરી છે.

वि न भा

❋ नाना लक्षण - नाना आपत्ति ❋

શબ્દાર્થમાં વચ્ચે જે નંબર મૂક્યા છે તે તે જગ્યાએ ફલિત જે લક્ષણ થાય છે તે નંબર પ્રમાણે જોઈએ :-

(१) નવ્ય ન્યાયની પરિભાષા મુજબ જે अभावीयप्रतियोगितामां

(१) साध्यतानिरूपिता या धर्मविधया अवच्छेदकता तद्विशिष्टभिन्ननिष्ठा या अवच्छेदकता तद्अनिरूपितत्व तथा

च 'साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठाऽवच्छेदकताऽनिरूपित- प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणाऽभ्युपगमे तादृशाऽभावीय- प्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताविशिष्टवह्नित्वसम- वायेतरवृत्तिनियामकवह्निसंयोगनिष्ठाऽवच्छेदकतानिरूपितत्वस्यैव सत्त्वेन तादृशाऽभावस्याऽ- ग्राह्यत्वादुक्ताऽभाववारणेऽपि सर्वत्र लक्षणघटकाभावमात्रस्य तादृशसाध्यतानिरूपितयत्किञ्चित्सम्ब-

य शो ल ता

●

(२) साध्यतानिरूपिता या संसर्गविधया अवच्छेदकता तद्विशिष्टभिन्ननिष्ठा या अवच्छेदकता तद्अनिरूपितत्व रहेतुं होय ते अभावना अधिकरणमां अवृत्तित्व.

सरळ भाषामां →

(१) जे अभावीयप्रतियोगिताअवच्छेदक साध्यताअवच्छेदकसंबंधथी भिन्न न होय अने (२) जे अभावीयप्रतियोगिताअवच्छेदक साध्यताअवच्छेदकधर्मथी भिन्न न होय ते अभावना अधिकरणमां अवृत्तित्व.

आ लक्षण मुजब ज्यां नं-१ लखेल छे त्यां असंभव दोष आपवामां आवेल छे.

(२) नव्य न्यायनी परिभाषामां →

जे अभावीयप्रतियोगितामां

(१) साध्यतानिरूपिता या संबंधविधया अवच्छेदकता तद्विशिष्टभिन्ननिष्ठा या संबंधविधया अवच्छेदकता तद्अनिरूपितत्व तथा

(२) साध्यतानिरूपिता या धर्मविधया अवच्छेदकता तद्विशिष्टभिन्ननिष्ठअवच्छेद- कताअनिरूपितत्व होय ते अभावना अधिकरणमां अवृत्तित्व.

वि न भा

आ लक्षणना आधारे नं-१मां जे असंभव आपेल तेने नं-२मां दूर थशे. तथा नं-उमां पुनः आ लक्षणना आधारे ज असंभव दोष आपेल छे. माटे नं-उमां पण आ ज लक्षण समजवुं. सरळ भाषामां →

(१) जे अभावीयप्रतियोगिताअवच्छेदक संबंध साध्यताअवच्छेदक संबंधथी भिन्न न होय अने (२) जे अभावीयप्रतियोगिताअवच्छेदक साध्यताअवच्छेदक धर्मथी भिन्न न होय ते अभावना अधिकरणमां अवृत्तित्व.

❖ तदितरअनवच्छिन्नत्वमां उभयनो प्रवेश ❖

(४) नव्य न्यायनी परिभाषामां → (प्रस्तुतमां आ अंतिम लक्षण छे.)

जे अभावीयप्रतियोगितामां

(१) साध्यतानिरूपिता या संबंधविधया (साध्यता)अवच्छेदकता तद्विशिष्टभिन्न-

गू *तादृशातिरिक्तसंसर्गमादायाऽसम्भवस्स्यादिति धर्म्मविधयावच्छेदकत्वा-*
ढा *निरूपितत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यापि साध्यतावच्छेदक-*

●

न्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्नः यः साध्यतावच्छेदकसंसर्गः तन्निष्ठाऽवच्छेदकतानिरूपित-प्रतियोगिताकत्वेन **तादृशाऽतिरिक्तसंसर्गमादाय** = साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽव-च्छेदकताविशिष्टाऽतिरिक्तः यः संसर्गः तमादाय सर्वत्र लक्षणघटकाऽभावदौर्लभ्यभावा**दसम्भवः स्यादिति धर्मविधया अवच्छेदकत्वानिरूपितत्वम्**, अस्य '**प्रवेशनीयम्**' इति अग्रेतनपदेन सह सम्बन्धः । तथा च साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टभिन्ननिष्ठयत्कि-ञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकताऽनिरूपितत्वं प्रतियोगितावि‌शेषणविधया प्रवेशनीयम् । ततः
य लक्षणघटकीभूतवह्न्यभावादिनिरूपितप्रतियोगित्वानां धर्मविधया यः साध्यतावच्छेदकः तद्भिन्नेन
शो साध्यतावच्छेदकसंसर्गेणाऽवच्छिन्नत्वेऽपि तेन संसर्गविधयैवाऽवच्छिन्नतया धर्मविधया तेनाऽनवच्छिन्न-
ल तया च तादृशाऽभावीयप्रतियोगितासु साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता-
ता विशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपितत्वसत्त्वान्नाऽसम्भवः ।

एवं साध्यतावच्छेदकत्व-प्रतियोगितावच्छेदकत्वयोः उभयोरपि धर्मविधया प्रवेशध्रौव्यमुपदर्श्य सम्बन्धविधयाऽपि तयोः द्वयोः प्रवेशः अङ्गीकर्तव्यः एवेत्याह - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र प्रतियोगितावि‌शेषणविधया साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रवेशेऽपि संयोग-समवा-योभयसम्बन्धेन वह्न्यभावमादायाऽव्याप्तिः प्रसज्येत एव, तादृशाऽभावीयप्रतियोगितायाः संयोग-समवायोभयेनाऽवच्छिन्नतया साध्यतावच्छेदकसम्बन्धाऽवच्छिन्नत्वाऽनपायात् । एतदव्याप्तिवारणाय **साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यापि**, अपिना साध्यतावच्छेदकधर्माऽवच्छिन्नत्वस्य समुच्चयः, तथा च यथा साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्माऽनवच्छिन्नत्वरूपत्व-

●

નિષ્ઠા યા સંબંધવિધયા (પ્રતિયોગિતા)અવચ્છેદકતા તદ્અનિરૂપિતત્વ હોય અને (૨) સાધ્યતાનિરૂપિતા યા ધર્મવિધયા (સાધ્યતા)અવચ્છેદકતા તદ્વિશિષ્ટભિન્નનિષ્ઠા યા ધર્મવિધયા
વિ (પ્રતિયોગિતા)અવચ્છેદકતા તદ્અનિરૂપિતત્વ હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.
ન સરળ ભાષામાં →
भा (૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ સાધ્યતાઅવચ્છેદક સંબંધથી ભિન્ન ન હોય અને

(૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ સાધ્યતાઅવચ્છેદક ધર્મથી ભિન્ન ન

सम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपस्यैव वाच्यतया तादृशसंसर्गातिरिक्तनिष्ठावच्छेदकत्वानिरूपितत्वमात्रप्रवेशे तादृशसंसर्गातिरिक्तधर्म्ममादायासम्भवस्स्यादिति संसर्गविधयाऽवच्छेदकत्वानिरूपितत्वं च प्रवेशनीयम् ।

एतेन *संयोगिनस्समवायेनाभाववारणाय धर्म्मविधया संसर्गविधया*

मवश्यं वाच्यं तथा साध्यतावच्छेदकसम्बन्धाऽवच्छिन्नत्वस्यापि **साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धाऽनवच्छिन्नत्वरूपस्यैव वाच्यतया**, तदर्थविधया **तादृशसंसर्गातिरिक्तनिष्ठाऽवच्छेदकत्वाऽनिरूपितत्वमात्रप्रवेशे** = साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठाऽवच्छेदकत्वाऽनिरूपितत्वमेव प्रतियोगिताविशेषणविधया यदि प्रवेश्यते तदा लक्षणघटकीभूतानां सर्वेषामभावानां तादृशसंसर्गताविशिष्टभिन्नः यः धर्मः तेनाऽवच्छिन्नत्वेन **तादृशसंसर्गातिरिक्तधर्ममादाय** = साध्यतानिरूपितसंसर्गताविशिष्टभिन्नः यः धर्मः तन्निष्ठाऽवच्छेदकतानिरूपितत्वस्य तादृशाऽभावीयप्रतियोगितासु सत्त्वेन तमादाय सर्वत्र लक्षणाऽसमन्वयाद् **असम्भवः स्यादेव इति** = अस्माद्धेतोः **संसर्गविधया अवच्छेदकत्वाऽनिरूपितत्वं च प्रवेशनीयम् ।** तथा च साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टभिन्ननिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताऽनिरूपित-साध्यतानिरूपितसंसर्गताविशिष्टभिन्ननिष्ठसंसर्गीयाऽवच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणमभ्युपेयम् इति धर्मसंसर्गोभयविधया साध्यत्व-प्रतियोगित्वाऽवच्छेदकत्वयोः प्रवेशः अवश्यं कर्तव्यः इति अवश्यमभ्युपेयमेवेति ।

एतदसम्भवसम्भवः अनेकान्ताश्रयणे एवेति न पूर्वोक्तं विस्मर्तव्यम् ।

'**वस्तुतः**' इत्युक्त्वा द्वितीयकल्पोपदर्शनबीजमाह - **एतेने**त्यादिना । भावार्थः प्राग्भावितः एवेति । शब्दार्थस्त्वेवम् - **एतेन** = साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वरूपतायाः साध्यतावच्छेदकसम्बन्धाऽवच्छिन्नत्वस्य साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपतायाः अवश्यं वाच्यतया साध्यतावच्छेदकातिरिक्तधर्माऽनवच्छिन्नत्वम्, साध्यताव-

હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

આ લક્ષણ મુજબ ક્યાંય અવ્યાપ્તિ-અતિવ્યાપ્તિ-અસંભવ નહીં આવે.

एतेन... પૂર્વે આપણે આ લક્ષણ બનાવ્યું હતું →

જે અભાવીયપ્રતિયોગિતામાં

गू *वाऽवच्छेदकत्वस्य निरूपितत्वम्प्रवेश्यं न तूभयमिति* ***शङ्का निरस्ता।***

●

च्छेदकसम्बन्धातिरिक्तसम्बन्धाऽनवच्छिन्नत्वम् - इत्यत्र सम्बन्धविधया धर्मविधया च साध्यत्वस्य प्रतियोगित्वस्य च अवच्छेदकतायाः प्रवेशस्य अवश्यं कर्तव्यत्वेन - 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र **संयोगिनः समवायेन,** उपलक्षणाद् वह्नित्वसमवायेन च **अभाववारणाय धर्मविधया संसर्गविधया वाऽवच्छेदकत्वस्य निरूपितत्वं प्रवेश्यं न तु उभयम्** = 'साध्यतावच्छेदक-धर्मावच्छिन्नत्वस्य स्थाने धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तन्निष्ठाऽवच्छेदकता-निरूपितत्वमेव प्रवेश्यं यद्वा साध्यतावच्छेदकसम्बन्धाऽवच्छिन्नत्वस्य स्थाने सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तन्निष्ठावच्छेदकताऽनिरूपितत्वमेव प्रवेश्यं न तु उभयम्, तथा

●

(૧) साध्यतानिरूपितसंसर्गतावन्निष्ठा या संसर्गविधया अवच्छेदकता तन्निरूपकत्व અને (૨) साध्यतानिरूपितयत्किंचित्संबंधअवच्छिन्न[साध्यता]अवच्छेदकतावन्निष्ठा या धर्मविधया अवच्छेदकता तन्निरूपकत्व होय ते अभावना अधिકरणमां अवृत्तित्व.

सरળ ભાષામાં -

(૧) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક સંબંધ साध्यताअवच्छेदक संबंध होय અને

(૨) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદક ધર્મ साध्यताअवच्छेदक धर्म होय તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

★ नूतन लक्षणमां उभयविधया उभयनो प्रवेश सिद्ध ★

वि

पूर्वोक्त ते लक्षणने छोडी हमણાં જ બતાવ્યું તે નવું લક્ષણ સ્વીકાર્યું તેનાથી **'पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલમાં સમવાયથી संयोगिअभाव લઈને જે અવ્યાપ્તિ આવે છે તેને દૂર કરવા માટે प्रतियोगिताअवच्छेदकतानो धर्मविधया અને संबंधविधया उभयविधया પ્રવેશ કરાવવાની આવશ્યકતા નથી. કોઈ એક જ રૂપે પ્રવેશ કરાવો તો પણ संयोगिअभावने લઈને આવતી અવ્યાપ્તિ દૂર થઈ જ જાય છે' - આ શંકાનો નિરાસ થઈ ગયો. કારણ કે જે પૂર્વોક્ત લક્ષણ બતાવ્યું તેમાં કોઈ એક જ જગ્યાએ ધર્મવિધયા કે સંબંધવિધયા જણાવો તો પણ संयोगिअभावनी आपत्ति દૂર થઈ જાય. આ વાત સાચી છે. પણ હવે એ લક્ષણ છોડી દીધું છે. કારણ કે महानसीयवह्निअभावने અને संयोग-समवायउभयथी वह्निअभावने લઈને તેમાં અવ્યાપ્તિ આવે. તે લક્ષણ છોડી જે નવું લક્ષણ બનાવ્યું તેમાં તો જો उभयविधया પ્રવેશ ન કરો તો असंभव દોષ આવે - તે પૂર્વે દેખાડ્યું જ છે. આમ, પ્રસ્તુત લક્ષણમાં તો उभयविधया उभय अवच्छेदकतानो प्रवेश अनिवार्य सिद्ध थाय જ છે.

चोक्तस्थले उक्ताऽभावमादायाऽव्याप्तिवारणाय साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकता-निरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धा-वच्छिन्नाऽवच्छेदकतानिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः, साध्यता-निरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्ना-वच्छेदकताविशिष्टनिष्ठावच्छेदकताऽनिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः वा लक्षणतया अङ्गीकरणीयः, न तु साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठसंसर्गीयाऽवच्छेदकता-निरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धा-वच्छिन्नाऽवच्छेदकतानिरूपितप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणम् अभ्युपेयम्, तथा च नैव प्रवेशः लक्षणे उभयविधया उभयविधाऽवच्छेदकत्वयोः इत्या**शङ्का निरस्ता**, 'साध्यतावच्छेदकधर्मावच्छिन्नत्वादेः साध्यतावच्छेदकधर्मातिरिक्तधर्माऽनवच्छिन्नत्वादि-रूपतायाः अवश्यं वाच्यतया तत्र उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशश्चौव्यादि'ति पूर्वोक्त-हेतोरेवेति ।

ननु एकतरप्रवेशमादृत्योक्तरीत्या लक्षणाङ्गीकारे 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा संयोग्यभावमादाय नाऽव्याप्तिः सम्भवति, 'पर्वतः समवायिविशिष्टः धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादाय नाऽव्याप्तिः सम्भवति, तथापि तादृशलक्षणद्वयं न सर्वथा निर्दुष्टम्, उक्ताऽऽपत्तिवारणेऽपि अन्यथा (= अन्यरीत्या) अव्याप्तिसद्भावात् । तद्यथा - (१) यदि साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठावच्छेदकतानिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकताविशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्ना-वच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपेयते तदा 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽव्याप्त्यसम्भवेऽपि समवायेन संयोगि-समवाय्युभयाभावमादायाऽव्याप्तिः स्यादेव, तादृशाभावीयप्रतियोगितायाः साध्यता-निरूपितसंसर्गताविशिष्टेन संयोगेनाऽवच्छिन्नतया तत्र साध्यतानिरूपितसंसर्गताविशिष्टनिष्ठा-वच्छेदकतानिरूपितत्वसत्त्वात्, संयोगि-समवाय्युभयाभावीयप्रतियोगितायाः उभयत्ववत् संयोग-समवायोभयेनाऽपि अवच्छिन्नतया (पूर्वोक्तरीत्या प्रतियोगितानतिरिक्तवृत्तित्वात् संयोग-समवायोभयस्य प्रतियोगितावच्छेदकत्वं विभावनीयम्) तादृशाभावीयप्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः समवायः तेन धर्मविधयाऽवच्छिन्नतया तत्र साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकता-

विशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वसत्त्वाच्च तादृशाभावस्य ग्राह्यत्वात् । पर्वते च समवायसम्बन्धेन संयोगि-समवायिनोः उभयोरपि असत्त्वात्तादृशाभावाधिकरणे पर्वते धूमहेतोः वृत्तित्वाच्च भवेदेवाऽव्याप्तिः । अत्र साध्यनिष्ठत्वप्रवेशेऽपि न निस्तारः, तादृशाभावस्य साध्यनिष्ठप्रतियोगिताकत्वात्, साध्येतराऽवृत्तित्वाऽपेक्षया तु संसर्गीयत्वनिवेशः एव लघुः । तन्निवेशे (= साध्यतानिरूपितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपित-साध्यतानिरूपित-यत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्रिशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपित-प्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणाङ्गीकारे, अत्र पूर्वोक्त-लक्षणापेक्षया संसर्गीयत्वनिवेश एवाधिकः) नाऽव्याप्तिः, यतः तादृशाभावीयप्रतियोगितायाः संसर्गविधया यः साध्यतावच्छेदकः संयोगः तेन सम्बन्धविधया अनवच्छिन्नत्वेन तत्र साध्यता-निरूपितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपितत्वविरहात् कथं तादृशोऽभावः धर्तुं शक्यते? कथं वाऽव्याप्तिः ? एवं पर्वतो वह्नित्वसमवायिविशिष्टः धूमाद् - इत्यत्रापि भावनीयम् ।

(२) यदि साध्यतानिरूपितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपित-साध्यतानिरूपित-यत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्रिशिष्टनिष्ठावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपेयते तदापि 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र संयोग-समवायोभयेन संयोग्यभावमादायाऽव्याप्तिः स्यादेव, सम्बन्धविधया यः साध्यता-वच्छेदकः संयोगः तेन सम्बन्धविधया तादृशाभावीयप्रतियोगितायाः अवच्छिन्नतया तत्र साध्यता-निरूपितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयाऽवच्छेदकतानिरूपितत्वसत्त्वात्, धर्मविधया यः तादृशाभावीय-प्रतियोगितावच्छेदकः संयोगः तस्य साध्यतावच्छेदकत्वेन तादृशाभावीयप्रतियोगितायां साध्यता-निरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्रिशिष्टनिष्ठावच्छेदकतानिरूपितत्वस्यापि सत्त्वाच्च तादृशाभावस्य ग्राह्यत्वात् । यदि धर्मविधया प्रतियोगितावच्छेदकत्वं निवेश्यते अर्थात् साध्यतानिरू-पितसंसर्गतात्रिशिष्टनिष्ठसंसर्गीयावच्छेदकतानिरूपित-साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्ना-वच्छेदकतात्रिशिष्टनिष्ठयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावा-धिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपेयते तदा नोक्ताऽव्याप्तिः, तादृशाभावीय-प्रतियोगितायाः धर्मविधया यः साध्यतावच्छेदकः समवायः तेन धर्मविधयाऽनवच्छिन्नत्वेन तादृशा-भावीयप्रतियोगितायां साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्रिशिष्टनिष्ठयत्किञ्चि-त्सम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वविरहात् तादृशाभावस्याऽग्राह्यत्वात् ।

इत्थञ्चोभयविधया उभयावच्छेदकत्वयोः एव प्रवेशः अङ्गीकार्यः इति साध्यतावच्छेदकधर्मावच्छिन्नत्वप्रवेशेऽपि सिध्यति एव । तथा च **वस्तुतः** इत्युक्त्या अन्यत्कल्पे उभयविधया उभयप्रवेशसार्थक्यप्रदर्शनम् अनुचितम्, यतः तदुक्त्या साध्यतावच्छेदकधर्मावच्छिन्नत्वादिपरिष्कारे उभयावच्छेदकत्वयोः उभयविधया प्रवेश अनावश्यकः इति सिध्यति । **एतेने**त्याद्युक्त्या ग्रन्थकृताऽपि उभयावच्छेदकत्वयोः उभयविधया प्रवेश अनावश्यकः साध्यतावच्छेदकधर्मावच्छिन्नत्वादिपरिष्कारघटितलक्षणे इति साधितमेव, एतच्चाऽसङ्गतम्, उक्तरीत्या एकस्यापि अप्रवेशेऽव्याप्तिसद्भावाद् एतत्परिष्कारघटितलक्षणे ***इति चेद् ?***

मैवम्; अभिप्रायाऽपरिज्ञानात् । अयमभिप्रायः - प्रथमलक्षणे भवता याऽव्याप्तिः दर्शिता तदापादनाय समवायेन उभयाभावः किमर्थं गृहीतः ? संयोगेनैव गृह्यताम्, साध्यतावच्छेदकसम्बन्धेनैव अभावं गृहीत्वा यदि अव्याप्तिः सम्भवेत्, तर्हि कः प्राज्ञः अन्यसम्बन्धेनाऽभावं गृह्णीयात् ?

न च तेन सम्बन्धेनाऽभावो गृह्यताम्, अव्याप्तिस्तु भवत्येव ***इति वाच्यम्;***

तादृशाऽव्याप्तिस्तु उभयविधया उभयावच्छेदकत्वयोः प्रवेशेऽपि वज्रलेपायिता एव इति सम्यग् निरीक्ष्यताम् ।

एवं द्वितीयलक्षणे याऽव्याप्तिः उपदर्शिता तत्रापि संयोग-समवायोभयसम्बन्धेन संयोग्यभावः किमर्थं गृहीतः, समवाय्यभावः एव = साध्यतानिष्ठप्रतियोगिताकाभावः एव गृह्यताम्, तमादायाऽपि अव्याप्तिसम्भवात् । किन्त्वेतदभावग्रहणे उभयविधया उभयावच्छेदकत्वप्रवेशघटितलक्षणमपि अव्याप्तिग्रस्तं स्यादेव ।

अतः ग्रन्थकृतामयमेवाऽभिप्रायः - समवायेन संयोग्यभावमादाय अव्याप्तिवारणायोभयविधयोभयावच्छेदकत्वयोः प्रवेशः आवश्यकः नास्ति, यदि समवाय-संयोगोभयसम्बन्धेनाऽभावमादायाऽव्याप्तिः दीयते यद्वा समवायि-संयोग्युभयाभावमादाय तदा तादृशरीत्याऽव्याप्तिस्तु उभयविधया उभयावच्छेदकत्वयोः प्रवेशेऽपि स्यादेवेति मूललक्षणे एव परिष्कर्तव्यम्, तादृशपरिष्कारः अर्थात् साध्यतावच्छेदकधर्मेतरधर्मानवच्छिन्नत्वम्, अत्र (तादृशपरिष्कारे) चानायासेन उभयविधया उभयावच्छेदकत्वयोः प्रवेशसार्थक्यसम्भवे किं तादृशपरिष्कारे भवता प्रदर्शितरीत्या यथाकथं तत्सार्थक्योपपादनेन ? तादृशरीत्याऽव्याप्तेस्तु उभयविधयोभयावच्छेदकत्वप्रवेशेऽपि सम्भवेन अन्ततस्तत्परिष्कारस्य त्याज्यत्वादेवेति निपुणं निभालयतु ।

उभयविधया उभयविधाऽवच्छेदकत्वयोः प्रवेशम् असहमानः पुनः शङ्कते पूर्वपक्षः -

य शो ल ता

अथेत्यादिना ।

अयमाशयः - ननु साध्यतावच्छेदकधर्मातिरिक्तधर्माऽनवच्छिन्नत्वस्य साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धाऽनवच्छिन्नत्वस्य च प्रवेशेऽपि वक्ष्यमाणरीत्या नास्ति निस्तारः इति यः परिष्कारः करिष्यते तत्र नैव धर्मविधया सम्बन्धविधया च साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशः कर्तव्यः । तथा हि - 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र महानसीयवह्न्यभावमादायाऽव्याप्तिवारणाय साध्यतावच्छेदकधर्मभिन्नधर्माऽनवच्छिन्नत्वं निवेशितम्, किन्तु 'घटः प्रमेयवद्वान् सत्त्वाद्' - इत्येतत्स्थले उक्तपरिष्काराऽनुसारेणाऽव्याप्तिः स्यात् । सत्ताधिकरणतया त्रयः पदार्थाः प्राप्यन्ते - द्रव्यम्, गुणः, कर्म च । द्रव्ये द्रव्यत्वं समवायेन वर्तते गुणे गुणत्वम्, क्रियायां कर्मत्वञ्च । द्रव्यत्वञ्च द्रव्यत्वत्वलक्षणप्रमेयविशिष्टम्, गुणत्वं गुणत्वत्वलक्षणप्रमेयविशिष्टम्, कर्मत्वञ्च कर्मत्वत्वलक्षणप्रमेयविशिष्टमिति यत्र यत्र सत्त्वं तत्र तत्र प्रमेयविशिष्टं समवायेन स्यादेवेति व्याप्तिः निराबाधा, सत्ताधिकरणीभूतानां द्रव्य-गुण-क्रियाणां द्रव्यत्वत्वादिप्रमेयविशिष्टद्रव्यत्वादिभिः समवायेन विशिष्टत्वात् । ततश्च सत्स्थलमिदम् । अत्र साध्यतावच्छेदकसम्बन्धेतरसम्बन्धाऽनवच्छिन्न-साध्यतावच्छेदकधर्मेतरधर्माऽनवच्छिन्नप्रतियोगिताकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येतल्लक्षणमेवाऽप्रसिद्धम्, यतः लक्षणघटकतया ग्राह्ये प्रमेयविशिष्टाभावे साध्यतावच्छेदकसम्बन्धसमवायेतरसम्बन्धाऽनवच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धत्वेऽपि साध्यतावच्छेदकधर्मप्रमेयेतरस्याऽप्रसिद्ध्या साध्यतावच्छेदकधर्मेतराऽनवच्छिन्नप्रतियोगिताकत्वाऽप्रसिद्धिः । एवं कस्मिंश्चिदपि अभावे साध्यतावच्छेदकेतरधर्माऽनवच्छिन्नप्रतियोगिताकत्वं नैव प्रसिद्ध्यति, प्रकृते साध्यतावच्छेदकेतरस्यैवाऽप्रसिद्धेः ।

इत्थञ्चैतत्स्थले साध्यतावच्छेदकेतरधर्माऽप्रसिद्ध्या लक्षणाऽप्रसिद्धिः स्यादेव, घटकाऽप्रसिद्धौ घटिताप्रसिद्धेः न्याय्यत्वात् । तथा चैतल्लक्षणमपि नाऽभ्युपेयम् । एतदव्याप्तिनिराकरणाय

पूर्वपक्ष :- (अथ.) તમે આ બધો નિરર્થક પ્રયાસ કરો છો. આગળ આ પ્રકરણ પછીના તરતના પ્રકરણમાં જ ચર્ચા કરવાના છે તે મુજબ મહાનસીયવહ્નિઅભાવને લઈને જે અવ્યાપ્તિ આવે છે તે દૂર કરવા માટે ઉપર્યુક્ત ખુલાસો ચાલે તેમ નથી. એક નવો પરિષ્કાર કરવો જ પડે તેમ છે.

❀ वक्ष्यमाण परिष्कारनी विचारणा ❀

આગળ જે વાત આવશે તે સંક્ષેપમાં →

पर्वतो वह्निमान् धूमात् । અહીં અભાવ લઈશું - મહાનસીયવહ્નિઅભાવ, પૂર્વવત્

ये ये परिष्काराः करिष्यन्ते ते ते कुत्रचिदपि स्थले अव्याप्तिग्रस्तानि भवन्त्येवेति उत्तरपक्षसम्मतः परिष्कारः प्रदर्शयिष्यते । अत्र तावत् तत्परिष्कारस्य आवश्यकताऽनुसारेण लेशतः अर्थः दर्श्यते, विस्तारार्थश्च प्रतिपदव्यावृत्तिप्रदर्शनपरः स्वस्थाने एव भावयिष्यते इति चेतसि सम्यग्निधाय पठनीयमग्रे इति विनिवेद्यते ।

अथ परिष्कारः - अत्र तावद् युष्माभिः 'धर्मविधया यः साध्यतावच्छेदकः धर्मविधया तेनाऽवच्छिन्ना, सम्बन्धविधया यः साध्यतावच्छेदकः सम्बन्धविधया तेनाऽवच्छिन्ना च या प्रतियोगिता तन्निरूपकाभावः एव ग्राह्यः' - इति अङ्गीक्रियते, अस्माभिश्च 'साध्यतावच्छेदकाः ये ये ते एव प्रतियोगिताऽवच्छेदकाः भवन्तु' - इति स्वीक्रियते इति मूलभेदः । अधुना अस्मन्मतानुसारेण परिष्कारः प्रदर्श्यते, तेनैव च निखिलाऽव्याप्तिवारणं भविष्यति । तथा हि -

पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्न्यभावः गृह्यते । अत्र साध्यतावच्छेदकं वह्नित्वम्, संयोगश्च, साध्यतावच्छेदकता एतद्द्वितयस्मिन् वर्तते । यद् वर्तते तत् प्रतियोगि, यत्र वर्तते तदनुयोगि, यथा भूतले घटः वर्तते इति घटः प्रतियोगी भूतलञ्चाऽनुयोगि । एतदनुसारेण साध्यतावच्छेदकतायां प्रतियोगिता भवति, वह्नित्वे संयोगे च अनुयोगिता । प्रतियोगिता अनुयोगिता च परस्परं निरूप्य-निरूपकभावाऽपन्ना भवतीति साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपिताऽनुयोगिताविशिष्टं वह्नित्वं भवति संयोगश्च, साध्यतावच्छेदकतानिष्ठप्रतियोगितानिरूपकाऽनुयोगिताविशिष्टमपि वह्नित्वं भवति संयोगश्च । साध्यतावच्छेदकतानिष्ठप्रतियोगिता च साध्यतावच्छेदकतात्वाऽवच्छिन्ना । वह्नित्व-संयोगोभयगताऽनुयोगितावच्छेदकं वह्नित्व-संयोगोभयगतद्वित्वं भवति, साध्यतावच्छेदकतानिरूपकाऽनुयोगितायाः अधिकरणानि यदि त्रीणि भवन्ति तर्हि तादृशाऽनुयोगितावच्छेदकरूपं त्रित्वं स्यात् । तथा च साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकाऽनुयोगिताऽवच्छेदकरूपं प्रकृते वह्नित्व-संयोगगतद्वित्वम् इति कथयितुं शक्यते ।

●

અવ્યાપ્તિ દૂર કરવા માટે પરિષ્કાર કરીએ - સાધ્યતાઅવચ્છેદકધર્મઅવચ્છિન્નપ્રતિયોગિતાક-સાધ્યાભાવવદ્અવૃત્તિત્વ. પુનઃ મહાનસીયત્વ-વહ્નિત્વ ઉભયને લઈને અવ્યાપ્તિ. તેનું નિરાકરણ હમણાં આપણે જે રીતે કર્યું તે રીતે શક્ય નથી. તે માટેના કારણો, અવ્યાપ્તિ વગેરે, આગળના પ્રકરણમાં આવશે જ. માટે, અહીં દેખાડતા નથી. ટૂંકમાં, મહાનસીયત્વ અને વહ્નિત્વને લઈને આવતી અવ્યાપ્તિ દૂર કરવા માટે જે - જે પણ પરિષ્કારો કરવામાં આવ્યા તે અન્યત્ર અવ્યાપ્તિ વગેરે દોષગ્રસ્ત બની જાય છે. માટે, મહાનસીયત્વ-વહ્નિત્વને

यद्यपि तादृशप्रतियोगितानिरूपकाऽनुयोगिता केवलवह्नित्वेऽपि भवेत् संयोगेऽपि च, यतः साध्यतावच्छेदकता स्वरूपेण केवलसंयोगेऽपि केवलवह्नित्वेऽपि च वर्तते, ततः तादृशप्रतियोगितानिरूपकाऽनुयोगिताऽवच्छेदकरूपं संयोगगतैकत्वं वह्नित्वगतैकत्वं वा भवेत् ***तथापि*** सा साध्यतावच्छेदकता पर्याप्त्या उभयस्मिन्नेव वर्तते । पर्याप्त्या = पर्याप्तिसम्बन्धेन तादृशसाध्यतावच्छेदकता स्वीयसर्वाधिकरणेषु एव स्यात्, न तु यस्मिन् कस्मिंश्चिदिति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता उभयस्मिन्नेव भवति इति तादृशाऽनुयोगितावच्छेदकं रूपं द्वित्वमेव भवेत्, न तु संयोगगतं वह्नित्वगतं वैकत्वम् । तथा च प्रकृते साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्व-संयोगगतद्वित्वमिति स्थितम् ।

प्रकृते वह्न्यभावः गृहीतः, तस्य प्रतियोगितावच्छेदकः धर्मः वह्नित्वम्, प्रतियोगितावच्छेदकः सम्बन्धः संयोगश्चेति प्रतियोगिताऽवच्छेदकताऽपि उभयस्मिन् वर्तते - वह्नित्वे संयोगे च । ततः प्रतियोगितावच्छेदकतायां प्रतियोगिता भवेद्, वह्नित्वे संयोगे च अनुयोगिता भवेत् । प्रतियोगिता प्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्ना भवति । प्रतियोगितावच्छेदकतायाः अनुयोगिता पर्याप्त्या ग्राह्येति प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता वह्नित्व-संयोगोभयस्मिन् भवति । अतः प्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्व-संयोगगतद्वित्वम् । ततश्च वह्नित्व-संयोगगतद्वित्वलक्षणरूपे (रूपं = स्वरूपं = धर्मः) साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वं तादृशवह्न्यभावीयप्रतियोगिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वं च स्तः इति निश्चीयते । इदमेवेत्थमपि अभिधीयते यदुत - साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवह्नित्व-संयोगगतद्वित्वे तादृशवह्न्यभावीयप्रतियोगिता-

●

લઈને આવતી અવ્યાપ્તિનો પ્રશ્ન લટકતો છે. તેના માટે ઉત્તરપક્ષ જે ખુલાસો કરશે તે આપણે હવે જોઈએ. સ્થળ લઈએ - **पर्वतो वह्निमान् धूमात्** ।

- સાધ્યતાઅવચ્છેદક ધર્મ → વહ્નિત્વ. - સાધ્યતાઅવચ્છેદક સંબંધ → સંયોગ.

વહ્નિત્વ અને સંયોગ - આ બંનેમાં સાધ્યતાઅવચ્છેદકતા રહે. જે રહે તે પ્રતિયોગી. જે રાખે તે અનુયોગી. આ સિદ્ધાંતના આધારે સાધ્યતાઅવચ્છેદકતામાં પ્રતિયોગિતા રહે. તથા સાધ્યતાઅવચ્છેદક ધર્મ-સંબંધમાં અનુયોગિતા રહે. સાધ્યતાઅવચ્છેદકતામાં જે પ્રતિયોગિતા તે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન છે. મતલબ કે 'બધી સાધ્યતાઅવચ્છેદકતા

वच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वं वर्तते इति तादृशवह्न्यभावीयप्रतियोगिता स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वे वर्तते, यदपेक्षया यस्मिन् यद्रूपं भवति तद्रूपेण (= तादृशरूपलक्षणसम्बन्धेन) तत् तत्र वृत्ति स्यादिति सिद्धान्तात् ।

तथा च यत् प्रतियोगित्वं स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति तत्प्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येव लक्षणमङ्गीकार्यम् । तथा चाऽस्मन्मतेन इदं लक्षणं फलितम् । भवद्भिश्च धर्मविधया संसर्गविधया च साध्यताप्रतियोगितावच्छेदकत्वयोः प्रवेशः आद्रियते इति भवन्मतानुसारेण - स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतानिष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदक-

य शो ल ता

●

લઈ લેવાની. કોઈ એકાદ નહીં' - આવું જણાવવા માટે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન કહ્યું. જો તે ન લખવામાં આવે તો સાધ્યતાઅવચ્છેદકતા માત્ર વહ્નિત્વમાં રહેલી પણ લઈ શકાય. તેની અપેક્ષાએ અનુયોગી કેવલ વહ્નિત્વ જ બને. જ્યારે આપણે અનુયોગી તરીકે વહ્નિત્વ-સંયોગ ઉભય લેવાના છે. તો જ આગળનો લક્ષણસમન્વય થાય. આ દરેક પદની સાર્થકતા જ્યારે આ લક્ષણનો અવસર આવશે ત્યારે જ વિસ્તારથી બતાવશું. અત્યારે માત્ર તે તે પદનો અર્થ અને કેવી રીતે લક્ષણસમન્વય થાય છે તે જ જોઈએ. આગળ પણ 'પર્યાપ્તિ' કેમ મૂક્યું ? ઇત્યાદિ જિજ્ઞાસા જાગશે. તેનું શમન જ્યારે લક્ષણનું સ્વસ્થાન આવશે ત્યારે કરશું. ટૂંકમાં, સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન-(સાધ્યતાઅવચ્છેદકતા નિષ્ઠ)પ્રતિયોગિતાનિરૂપક અનુયોગિતા વહ્નિત્વ-સંયોગઉભયમાં રહેનારી કહેવાય. આ અનુયોગિતાનું અધિકરણ કેવલ વહ્નિત્વ અને સંયોગ છૂટા - છૂટા પણ બની શકે. માટે, પર્યાપ્તિઅનુયોગિતા લઈએ. મતલબ કે સાધ્યતાઅવચ્છેદકતાની પર્યાપ્તિનું અધિકરણ લેવાનું. સાધ્યતાઅવચ્છેદકતાની પર્યાપ્તિના અનુયોગી વહ્નિત્વ-સંયોગ ઉભય જ બનશે.

वि ना भा

रूपवृत्ति च यत् प्रतियोगित्वं तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाऽभावः - इत्येवं गुरुतरलक्षणमङ्गीकरणीयं स्यात् । सामान्यशैल्या उक्तलक्षणमेवमभिधीयते - स्वनिरूपिता या संसर्गविधया अवच्छेदकता तन्निष्ठं यत् प्रतियोगितावच्छेदकतात्वं तदवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठसाध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति यत् प्रतियोगित्वम्, स्वनिरूपिता या धर्मविधया अवच्छेदकता तन्निष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठसाध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति च यत् प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

उभयविधया उभयविधाऽवच्छेदकत्वयोः प्रवेशादरे कियद्गुरुतरं लक्षणमङ्गीकर्तव्यमिति स्पष्टमेव । किञ्च अस्मदभ्युपगतलक्षणे नास्ति कुत्रचिदपि कञ्चिदपि अभावमादाय अव्याप्तिगन्धोऽपि, तर्हि किमर्थमेतद्गुरुतरलक्षणमङ्गीकरणीयमिति ? अत्र तावदस्मदभ्युपगतलक्षणाऽनुसारेण सर्वत्र लक्षणसमन्वयः प्रदर्श्यते -

अस्मदभ्युपगतं लक्षणम् - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाऽधिकरणनिरूपितवृत्तित्वाभावः ।

●

❀ पर्याप्तिघटित परिष्कारनी समजण ❀

साध्यताअवच्छेदकतानी पर्याप्ति = साध्यताअवच्छेदकतानिरूपितपर्याप्ति. तथा साध्यताअवच्छेदकतानिष्ठप्रतियोगितानिरूपक अनुयोगिता छे. माटे कही शकाय के साध्यताअवच्छेदकतात्वअवच्छिन्न(साध्यताअवच्छेदकतानिष्ठ)प्रतियोगितानिरूपकपर्याप्तिअनुयोगिता. टूंकमां, कहेवानुं तात्पर्य एटलुं ज छे के साध्यताअवच्छेदकता प्रतियोगी कहेवाय. साध्यताअवच्छेदक अनुयोगी. साध्यताअवच्छेदकमां जे अनुयोगिता छे ते फक्त साध्यताअवच्छेदकतानी नहीं, किंतु साथे-साथे साध्यताअवच्छेदकतापर्याप्तिनी लेवानी. जयारे साध्यताअवच्छेदकतानी अनुयोगिता साध्यताअवच्छेदकमां होय त्यारे साध्यताअवच्छेदकतानिष्ठप्रतियोगितानिरूपक अनुयोगिता कहेवाय. अहीं साध्यताअवच्छेदकतापर्याप्तिनी अनुयोगिता छे. माटे साध्यताअवच्छेदकतानिष्ठप्रतियोगितानिरूपकपर्याप्तिअनुयोगिता

एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताक-घटाभावः नैव ग्रहीतुं शक्यते, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः घटत्वे संयोगे च वृत्तित्वेन तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकं रूपं घटत्व-संयोगगतद्वित्वं स्यात्, साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपं तु वह्नित्व-संयोगगतद्वित्वम् इति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवह्नित्व-संयोगगतद्वित्वे तादृशाऽभावीयप्रतियोगिताऽवच्छेदक-तात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वविरहात् स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशाऽभावीयप्रतियोगिता साध्यतावच्छेदकतात्वा-वच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपे नैव स्यादिति कुतः तमादायाऽव्याप्तिसम्भवः ? तादृशाभावस्यैवाग्राह्यत्वादिति ।

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितावच्छेद-कतायाः महानसीयवह्नित्वे संयोगे च यद्वा महानसीयत्वे, वह्नित्वे संयोगे च वर्तमानतया तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं महानसीयवह्नित्व-संयोगगतद्वित्वं महानसीयत्व-वह्नित्व-संयोगगतबहुत्वं वा स्यात्, साध्यतावच्छेदकता-

य शो ल ता

●

मळे. अथवा तो **पर्याप्तिसम्बन्धेन अनुयोगिता** = पर्याप्तिअनुयोगिता. साध्यताअवच्छेदकतात्व-अवच्छिन्न(साध्यताअवच्छेदकतानिष्ठ)प्रतियोगितानिरूपकअनुयोगिता फक्त वह्नित्वमां पण मळे. ज्यारे साध्यताअवच्छेदकतात्वअवच्छिन्न(साध्यताअवच्छेदकतानिष्ठ)प्रतियोगिता-निरूपकपर्याप्तिअनुयोगिता वह्नित्व-संयोगउभयमां ज मळे.

वह्नित्व-संयोगउभयमां उभयत्व = द्वित्व धर्म आवे. वह्नित्व-संयोगउभयमां तादृश पर्याप्तिअनुयोगिता छे तेनुं अवच्छेदक द्वित्व थाय. एटले के साध्यताअवच्छेदकतात्व-अवच्छिन्नप्रतियोगिताकपर्याप्तिअनुयोगिताअवच्छेदक द्वित्व थाय. आ द्वित्वमां प्रतियोगिता वृत्ति होवी जोईए.

वि न भा

✲ लक्षणघटक संबंधनी समजण ✲

प्रतियोगिताने तादृश द्वित्वमां रहेवानो संबंध → स्वावच्छेदकतात्वअवच्छिन्न-प्रतियोगिताकपर्याप्तिअनुयोगिताअवच्छेदकत्व. ते आ रीते → हाल, संयोगसंबंध-वह्नित्वधर्मअवच्छिन्नप्रतियोगिताक वह्निअभावने लईने लक्षणसमन्वय करवानो छे. पूर्वे

त्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं तु वह्नित्व-संयोगगतद्वित्वम् इति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्व-संयोगगतद्वित्वे तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वविरहात् स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशाऽभावीयप्रतियोगिता साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वे वृत्तिः नैव स्यादिति तादृशाऽभावो ग्रहीतुं नैव शक्यते ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः संयोगे वह्नि-घटोभयत्वे च यद्वा वह्नित्वे घटत्वे च वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वह्नि-घटोभयत्वगतद्वित्वं संयोग-वह्नित्व-घटत्वगतबहुत्वं वा भवेत्, साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपं तु वह्नित्व-संयोगगतद्वित्वम् अस्ति इति साध्यतावच्छेदकतात्वावच्छिन्नप्रति-

●

જોઈ ગયા તે साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक द्वित्वमां उक्तवह्निअभावीयप्रतियोगिताने राखवानी छे. स्वथी लईએ वह्निअभावीयप्रतियोगिता. कारण के स्वपदथी आधेय लेवाय. वह्निअभावीयप्रतियोगिताअवच्छेदक - वह्नित्व अने संयोग. आ उभयमां प्रतियोगिताअवच्छेदकता रहे. प्रतियोगिताअवच्छेदकतानिष्ठप्रतियोगिता. तथा प्रतियोगिताअवच्छेदकवह्नित्व-संयोग-उभयनिष्ठअनुयोगिता. पूर्ववत् प्रतियोगितानिरूपकअनुयोगिता कोઈ એકादमां रहेली नथी लेवानी. पण उभयमां पर्याप्त એવી अनुयोगिता लेवानी छे. એटले के प्रतियोगिताअवच्छेदकतानी पर्याप्तिअनुयोगिता लेवानी छे. (कोઈक જગ્યાએ पर्याप्त-अनुयोगिता आवो पण पाठ छे. ते पण संगत छे.) पर्याप्तिअनुयोगिता = पर्याप्तिसंबंधथी अनुयोगिता. **पर्याप्त्या अनुयोगिता** = पर्याप्तिअनुयोगिता. आम, प्रतियोगिताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिता वह्नित्व-संयोगउभयमां ज रहेशे. आ उभयमां रूप = धर्म द्वित्व आवे. माटे, अनुयोगिताअवच्छेदक धर्म द्वित्व. पूर्वे जोઈ गया ते मुજब साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक रूप जे वह्नित्व-संयोगगत द्वित्व छे तेमां ज प्रतियोगिताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकता छे. कारण के हमणां ज जोयुं ते मुજब तादृशअनुयोगिताअवच्छेदक वह्नित्व-संयोगउभयगत द्वित्व ज छे.

योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकीभूतवह्नित्व-संयोगगतद्वित्वे तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वविरहात् तादृशाऽभावीयप्रतियोगिता स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तितया नैव प्राप्यते इति तादृशप्रतियोगितानिरूपकोऽभावोऽपि नैव ग्रहीतुं शक्यते इति कुतः अव्याप्तिः तमादाय ?

माटे, वह्निअभावीयप्रतियोगिता स्वावच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वसंबंधथी साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक वह्नित्व-संयोगगतद्वित्वमां (रूपमां) वृत्ति थई जशे. माटे, वह्निअभावीय प्रतियोगिता लई शकाशे. आ वह्निअभावीयप्रतियोगितानिरूपक वह्निअभावनुं अधिकरण जलह्रद. धूम तेमां अवृत्ति. लक्षणसमन्वय थई जशे.

❀ नूतन परिष्कार प्रमाणे महानसीयवह्निअभाव अग्राह्य ❀

अहीं महानसीयवह्निअभावीयप्रतियोगिता नहीं लई शकाय. कारण के जो स्वावच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्वसंबंधथी महानसीयवह्निअभावीयप्रतियोगिता साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक वह्नित्व-संयोगगतद्वित्वमां रहे तो ज महानसीयवह्निअभावीयप्रतियोगिता लई शकाय. हवे जोईए के आ संबंधथी महानसीयवह्निअभावीयप्रतियोगिता वह्नित्व-संयोगगतद्वित्वमां रहे छे के नहीं ?

महानसीयवह्निअभावना प्रतियोगिताअवच्छेदक बे रीते मळे.

(१) महानसीयत्व + वह्नित्व - प्रतियोगिताअवच्छेदक धर्म. संयोग - प्रतियोगिताअवच्छेदक संबंध. तथा (२) महानसीयवह्नित्व - प्रतियोगिताअवच्छेदक धर्म. संयोग - प्रतियोगिताअवच्छेदक संबंध. बंनेमांथी कोई ने पण लईने लक्षणसमन्वय थई शके तेम नथी. सौ प्रथम पहेली रीते जोईए तो महानसीयवह्निअभावीयप्रतियोगिताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदक महानसीयत्व-वह्नित्व अने संयोगगत त्रित्व बनशे. वह्नित्व-संयोगगत द्वित्व नहीं. बीजी रीत मुजब अनुयोगिताअवच्छेदक महानसीयवह्नित्व-संयोगगतद्वित्व बने. पण, वह्नित्व-संयोगगत द्वित्व तो नहीं ज बने. आम, महानसीयवह्निअभावीयप्रतियोगिताअवच्छेदकतात्व-अवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकता वह्नित्व-संयोगगतद्वित्वमां नहीं ज जाय. तेथी स्वावच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिता-

एवं समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽपि नाऽव्याप्तिः । यतः तादृशाऽभावीयप्रतियोगितावच्छेदकता समवाये वह्नित्वे च वर्तते इति तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं समवाय-वह्नित्वगतद्वित्वम्, न तु संयोग-वह्नित्वगतद्वित्वम्, एतच्च द्वित्वद्वयं नैकम् इति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वगतद्वित्वरूपे तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वविरहात् तादृशाऽभावीयप्रतियोगिता स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकीभूतवह्नित्व-संयोगगतद्वित्वे नैव वर्तते इति न हि तादृशोऽभावः ग्रहीतुं शक्यते ।

य शो ल ता

अत्र संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽपि अव्याप्तिः नास्ति, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकता संयोगे, समवाये वह्नित्वे चेति तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-समवाय-वह्नित्वगतबहुत्वमेव, न तु वह्नित्व-संयोगगतद्वित्वम् । तथा च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्य-

●

અવચ્છેદકતાસંબંધથી મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક વહ્નિત્વ-સંયોગગતદ્વિત્વમાં રહેશે નહીં. માટે, મહાનસીયવહ્નિઅભાવીયપ્રતિયોગિતા લઈ નહીં શકાય. પણ, પૂર્વોક્ત સંયોગ-સંબંધઅવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવની જ પ્રતિયોગિતા લેવી પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. માટે, લક્ષણસમન્વય થઈ જશે, અવ્યાપ્તિ નહીં આવે.

વિ ન

❁ ઉભયસંબંધથી અભાવ પણ અગ્રાહ્ય ❁

આ રીતે સંયોગ-સમવાયઉભયસંબંધથી વહ્નિઅભાવને લઈને પણ અવ્યાપ્તિ નહીં આવે. કારણ કે સંયોગ-સમવાયઉભયસંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક સંયોગ-સમવાય-વહ્નિત્વગત ત્રિત્વ જ બનશે. પણ, સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદક જે વહ્નિત્વ-સંયોગગતદ્વિત્વ તે નહીં બને. તેથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદક વહ્નિત્વ-સંયોગગત દ્વિત્વમાં સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી સંયોગ

મા

नुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपे तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वविरहात्तादृशाऽभावीयप्रतियोगितायाः स्वावच्छेद-कतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकता-त्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं नैव सम्भवति, तथा च तादृशा-ऽभावः नैव ग्रहीतुं शक्यते ।

तथा चाऽत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः वह्नित्वे संयोगे च वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितावच्छे-दकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वस्य साध्यतावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वे सत्त्वेन तादृशाऽभावीयप्रतियो-गितायाः स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यता-वच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपे वृत्ति-त्वात्तादृशाऽभावस्य ग्राह्यत्वात् । तादृशाऽभावाधिकरणं जलह्रदः, धूमस्तत्राऽवृत्तिरिति भवत्येव लक्षणसमन्वयः ।

●

-समवायઉભયસંબંધઅવચ્છિન્નપ્રતિયોગિતાક-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાકવહ્નિઅભા-વીયપ્રતિયોગિતા નહીં રહે. માટે, તે અભાવીયપ્રતિયોગિતા લઈ નહીં શકાય. સંયોગ-સંબંધઅવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાકવહ્નિઅભાવીયપ્રતિયોગિતા જ લેવી પડશે. પહેલાં જણાવ્યા મુજબ તે પ્રતિયોગિતા પૂર્વોક્ત સંબંધથી ઉક્તઅનુયોગિતાઅવચ્છેદક વહ્નિત્વ-સંયોગગતદ્વિત્વમાં વૃત્તિ છે. આ પ્રતિયોગિતાનિરૂપકવહ્નિઅભાવઅધિકરણઅવૃત્તિત્વ ધૂમમાં રહેશે. માટે કોઈ અવ્યાપ્તિ નહીં આવે. આ રીતે ફલિત થયેલું લક્ષણ →

स्वावच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकत्व-संबंधથી साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअव-च्छेदकરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

❁ ધર્મવિધયા - સંબંધવિધયા પ્રવેશ ❁

તમે હમણાં જણાવ્યું તે મુજબ સાધ્યતાઅવચ્છેદકતાનો પણ ધર્મવિધયા અને સંબંધ-વિધયા અને પ્રતિયોગિતાઅવચ્છેદકતાનો પણ ધર્મવિધયા અને સંબંધવિધયા પ્રવેશ કરવો જોઈએ. એટલે તમારા મત મુજબ લક્ષણ આ રીતે બનવું જોઈએ કે → ધર્મવિધયા સ્વાવ-ચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા-

અવચ્છેદકત્વસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સંબંધ-વિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપક-પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકત્વસંબંધથી સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતા-અવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિ-યોગિતાનિરૂપક જે અભાવ તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

ધર્મવિધયા અને સંબંધવિધયા જ પ્રતિયોગિતાઅવચ્છેદકતાનો અને સાધ્યતા-અવચ્છેદકતાનો પ્રવેશ કરવો જોઈએ - આ તમારા સિદ્ધાંત મુજબ તો તમારે ઉપર્યુક્ત લક્ષણ જ કહેવું જોઈએ અને એ લક્ષણ નિરર્થક ગૌરવયુક્ત છે. કારણ કે આ રીતે બે - બે વાર પ્રવેશ કરવાની જરૂરત જ નથી. અમે જે ઉપર એક જ વાર પ્રવેશ કરીને લક્ષણ બનાવ્યું છે તેના દ્વારા જ અત્યાર સુધી તમે આપેલ તમામે તમામ આપત્તિનું નિવારણ થઈ જશે. તો પછી ધર્મવિધયા અને સંબંધવિધયા ઉભયવિધયા જ પ્રતિયોગિતાઅવચ્છેદકતાનો અને સાધ્યતાઅવચ્છેદકતાનો પ્રવેશ કરવાનો - આ નિયમના આધારે... પર્યાપ્તિઅનુયોગિતા-અવચ્છેદક વગેરેનો બે બે વાર પ્રવેશ કરવાની જરૂરત ખરી ? આટલું ઉમેરવું એના કરતા એ સિદ્ધાંતને તિલાંજલિ આપવી જ વ્યાજબી છે.

વિ

ન

મા

✲ ઉભયવિધયા અપ્રવેશે પણ આપત્તિઅભાવ ✲

તમે કુલ **पर्वतो वह्निमान् धूमात्** સ્થલમાં (૧) મહાનસીયવહ્નિઅભાવ, (૨) વહ્નિ -જલોભયાભાવ, (૩) સમવાયથી વહ્નિઅભાવ, (૪) સંયોગ-સમવાયઉભયથી વહ્નિઅભાવ - આ ચાર પ્રકારના અભાવને લઈને અવ્યાપ્તિ આપી હતી. તથા **पर्वतो वह्नित्वसमवायिमान् धूमात्** આ સ્થલે સંયોગને સાધ્યતાઅવચ્છેદક સંબંધ તરીકે લઈ (૫) સમવાયથી વહ્નિત્વ-સમવાયિઅભાવ, (૬) સંયોગથી વહ્નિસંયોગિઅભાવ, (૭) સમવાયથી સંયોગિઅભાવ લઈને અવ્યાપ્તિ આપી હતી તથા વહ્નિસંયોગને સાધ્યતાઅવચ્છેદક સંબંધ તરીકે લઈ (૮) વહ્નિસંયોગથી વહ્નિસંયોગિઅભાવ લઈને અવ્યાપ્તિ આપેલ.

અમારા લક્ષણમાં = જેમાં સાધ્યતાઅવચ્છેદકતાનો અને પ્રતિયોગિતાઅવચ્છેદકતાનો એક જ વાર પ્રવેશ છે, ધર્મવિધયા અને સંબંધવિધયા એમ બે - બે વાર નહીં, તે લક્ષણમાં આ આઠ આપત્તિમાંથી એક પણ આપત્તિ નહીં આવે. જુઓ →

	प्रतियोगिताअवच्छेदकता		साध्यताअवच्छेदकता	
	धर्मविधया	संबंधविधया	धर्मविधया	संबंधविधया
१.	પ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ
२.	અપ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ
૩.	પ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ
४.	અપ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ
५.	અપ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ
६.	અપ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ
७.	પ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ
८.	પ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ
९.	પ્રવિષ્ટ	અપ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ
१०.	અપ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ
११.	અપ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ
१२.	અપ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ
१३.	પ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ
१४.	પ્રવિષ્ટ	પ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ
१५.	પ્રવિષ્ટ	અપ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ
१६.	અપ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ	પ્રવિષ્ટ

આમાંથી માત્ર પ્રથમ ભાંગો જ સંભવે. બાકીના એકે ભાંગા નહીં ચાલે. દરેકમાં ક્યાંક અવ્યાપ્તિ આદિ દોષ આવશે જ. બૌદ્ધિક વ્યાયામ માટે થોડું જોઈ લઈએ.

૨ જા ભાંગા પ્રમાણેનું લક્ષણ એટલે કે પૂર્વપક્ષે જે સ્વીકાર્યું હતું તે જ લક્ષણ. તેનું ખંડન આપણે સંયોગિત્વરૂપે સમવાયિને સાધ્ય બનાવી કરી દીધું.

यद्वा स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं पूर्वपक्षोपदर्शितमेव लक्षणम् ।

एतल्लक्षणानुसारेणाऽपि 'पर्वतः संयोगविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय पूर्ववदेवाऽव्याप्तिः भावनीया ।

– द्वितीयभङ्गानुसारिलक्षणम् -

सम्बन्धविधया स्वनिरूपिता या अवच्छेदकता तन्निष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः । इति सामान्यशैल्या लक्षणम् ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

यद्वा धर्मविधया साध्यता-प्रतियोगिताऽवच्छेदकत्वयोरप्रवेशेऽपि तत्स्थाने सामान्येन साध्यताऽवच्छेदकत्व-प्रतियोगितावच्छेदकत्वप्रवेशाऽऽग्रहे एवं लक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्याऽपि एवमेव लक्षणम्, नवरं 'सम्बन्धविधया या स्वनिरूपिताऽवच्छेदकता' - इत्येतत्स्थाने 'स्वनिरूपितसंसर्गीयाऽवच्छेदकता' इत्येवं प्रवेशनीयम् ।

एतल्लक्षणद्वितयमपि असम्भवदोषदुष्टम्। प्रथमलक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि धर्तुं न शक्यते,

तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया संयोगेनैवाऽवच्छिन्नत्वेन तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपं संयोगगतैकत्वम् । साध्यतावच्छेदकता तु संयोगे वह्नित्वे चोभयस्मिन् वर्तते इति साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपसंयोगवह्नित्वगतद्वित्वमेव स्यात् । तथा च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपसंयोग-वह्नित्वगत-द्वित्ववृत्तित्वविरहात् तादृशाऽभावो नैव ग्रहीतुं शक्यते ।

एवमेव सर्वत्र साध्यतावच्छेदकतायाः धर्मविधया सम्बन्धविधया वाऽप्रवेशाद् उभयनिष्ठा एव साध्यतावच्छेदकता गृह्यते, साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता चापि उभयनिष्ठसाध्यतावच्छेदकतानिष्ठा एव गृह्यते, प्रतियोगिताऽवच्छेदकतायाश्च सम्बन्धविधया एव प्रवेशात् सम्बन्धनिष्ठा एव सा गृह्यते, तथा च साध्यतावच्छेदकतायाः यानि अधिकरणानि ततः सम्बन्धविधया प्रतियोगितावच्छेदकतायाः अधिकरणानि न्यूनानि एव स्युरिति न कोऽप्यभावः लक्षणघटकतया धर्तुं शक्यते । तथा च भवेदेवाऽसम्भवः । 'घटः समवायिविशिष्टः, रूपाद्' - इत्यत्र समवायस्यैव साध्यतावच्छेदकसम्बन्धत्वेन साध्यतावच्छेदकधर्मत्वेन च समवायेन समवाय्यभावमादाय लक्षणसमन्वयसम्भवेऽपि पूर्वोक्तयुक्त्या अनेकान्ताऽऽश्रयणेन धर्मत्वेन सम्बन्धत्वेन समवायभेदमभ्युपगम्य अत्राऽपि लक्षणाऽसमन्वयोपपत्तेः स्यादेवाऽसम्भवः इति सिंहावलोकनन्यायेन पूर्वोक्तमनुसन्धेयमत्र ।

द्वितीयलक्षणाऽनुसारेणाऽपि 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावः धर्तुं नैव शक्यते । तादृशाऽभावीयप्रतियोगिताऽवच्छेदकतायाः पर्याप्त्या संयोगे वह्नित्वे चोभयस्मिन् वर्तमानतया तादृशाऽभावीयप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वह्नित्वगतद्वित्वम्, साध्यतावच्छेदकतायाः अपि पर्याप्त्या संयोगे वह्नित्वे च वर्तमानतया साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपमपि संयोग-वह्नित्वगतद्वित्वमेवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वगतद्वित्व-

रूपवृत्तिता यद्यपि वर्तते तथापि पूर्वोक्तयुक्त्या तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतायाः पर्याप्त्याऽपि केवलसंयोगे एव वर्तमानत्वेन तादृशसाध्यतावच्छेदकतायाश्च पर्याप्त्या संयोग-वह्नित्वोभयस्मिन् वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते ।

एवम् अन्यत्र सर्वत्रापि लक्षणघटकाऽभावीयप्रतियोगितायां स्वनिरूपिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसम्भवेऽपि स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशरूपवृत्तित्वस्याऽसम्भवान्न हि कोऽप्यभावः ग्रहीतुं शक्यते, येन लक्षणसमन्वयः सम्भवेदिति असम्भवः दुर्वारः । य शो ल ता

– तृतीयभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - धर्मविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽव-

●

❀ ત્રીજો ભાંગો અસંભવગ્રસ્ત ❀

ત્રીજા ભાંગા પ્રમાણેનું લક્ષણ બનશે :-

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ. પ્રસ્તુતમાં અસંભવ દોષ આવશે. **पर्वतो वह्निमान् धूमात्** આ સ્થલમાં સંયોગસંબંધઅવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાકઅભાવ લક્ષણઘટક બનવો જોઈએ. જ્યારે વિ ના ભ્રા

च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरण-निरूपितवृत्तित्वाभावः इति ।

यद्वा धर्मविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन च साध्यताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकरूपवृत्ति यत् प्रतियोगित्वं तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

अत्र परिष्कारशैल्या एवमेव लक्षणम् । नवरं 'धर्मविधया या स्वनिरूपिता अवच्छेदकता' - इत्येतत्स्थाने 'स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकता' - इत्येवं बोध्यम् ।

एतल्लक्षणद्वितयस्याऽपि असम्भवदोषदुष्टत्वम् । प्रथमलक्षणाऽनुसारेण 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकः वह्न्यभावोऽपि ग्रहीतुं न शक्यते, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता सा पर्याप्त्या वह्नित्वे एव अस्ति, साध्यतावच्छेदकता तु पर्याप्त्या वह्नित्वे संयोगे चोभयस्मिन् वर्तते । ततः कुतः तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठप्रतियोगि-तावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदक-तात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वं सम्भवेदिति सर्वत्रैवमेव लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः ।

एवं द्वितीयलक्षणाऽनुसारेणाऽपि तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदक-तायाः च पर्याप्त्या संयोग-वह्नित्वयोः वृत्तित्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वगतद्वित्वरूपवृत्तित्वसम्भवेऽपि पूर्वोक्त-

●

પ્રસ્તુતમાં ધર્મવિધયા પ્રતિયોગિતાઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્ન-પ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા વહ્નિત્વગતએકત્વમાં જશે. અને સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગગતદ્વિત્વમાં. આ રીતે પ્રતિયોગિતાઅવચ્છેદકતા માત્ર ધર્મનિષ્ઠા જ પકડાય. અને સાધ્યતાઅવચ્છેદકતા ધર્મ-સંબંધ ઉભયનિષ્ઠા પકડાઈ જાય. માટે, સર્વત્ર લક્ષણઅસમન્વય થવાને કારણે અસંભવ !

युक्त्या तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्याऽपि केवल-वह्नित्वे एव वर्तमानतया तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तादृशसंयोग-वह्नित्वगतद्वित्वरूपवृत्तित्वस्याऽसम्भवात्तादृशाऽभावः नैव ग्रहीतुं शक्यते । एवं सर्वत्र लक्षणसमन्वयकारकाऽभावानामग्राह्यत्वसिद्ध्या सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः ।

– चतुर्थभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिताऽवच्छेदकता तन्निष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या स्वनिरूपिताऽवच्छेदकता तन्निष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन च साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणमपि असम्भवदोषग्रस्तम् । एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि लक्षणघटकतया नैव गृह्यते । यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकता पर्याप्त्या केवलसंयोगे एव वर्तते इति तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेद-

●

❁ ચોથા ભાંગામાં પણ અસંભવ ❁

ભાંગો - ૪

સંબંધવિધયા સ્વાવચ્છેદકતા.... ઇત્યાદિ પૂર્વવત્ લક્ષણ. **દોષ** - અસંભવ. કારણ કે પ્રતિયોગિતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા જ પકડાશે. સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ -સંયોગઉભયનિષ્ઠા પકડાઈ જાય.

कतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वम् । तादृशाऽभावीयप्रतियोगितायाः धर्मविधया अवच्छेदकता पर्याप्त्या केवलवह्नित्वे एव वर्तते इति तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपं वह्नित्वगतैकत्वम् । साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपं तु संयोग-वह्नित्वगतद्वित्वम् ।

तथा च साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वगतद्वित्वे तादृशाऽभावीयप्रतियोगिता स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनाऽपि न वर्तते, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनाऽपि न वर्तते इति कुतः सः अभावः धर्तुं शक्यते ? एवं सर्वत्रापि लक्षणसमन्वयकारकाऽभावानां ग्रहणाऽसम्भवेन सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः इति ।

य शो ल ता

– पञ्चमभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियो-

●

✲ ભાંગો પાંચ, અસંભવને નહીં આંચ ✲

ભાંગો - ૫ લક્ષણ →

વિ

સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા સંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

ન

દોષ :- અસંભવ ! કારણ કે પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા પકડાઈ જાય અને સાધ્યતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા મળે.

भ्रा

गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

यद्वा धर्मविधया साध्यतावच्छेदकत्व-प्रतियोगितावच्छेदकत्वयोरप्रवेशेऽपि तत्स्थाने सामान्येनाऽपि साध्यता-प्रतियोगितावच्छेदकत्वप्रवेशाऽऽग्रहे एवं लक्षणम् -

स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे च वृत्ति यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणद्वितयमपि असम्भवदोषदुष्टम् । प्रथमलक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि धर्तुं नैव शक्यते । तादृशाऽभावीयप्रतियोगिताऽवच्छेदकता पर्याप्त्या वह्नित्वे संयोगे चोभयस्मिन् वर्तते, अतः तादृशाऽभावीयप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वह्नित्व-संयोगगतद्वित्वं स्यात् । सम्बन्धविधया या साध्यतावच्छेदकता सा तु केवलसंयोगे एव पर्याप्त्याऽपि वर्तते इति सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठसाध्यताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपञ्च संयोगगतैकत्वमेवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं कुतः सम्भवेद् ? येन तादृशाऽभावमादाय लक्षणसमन्वयः स्यात् । एवं सर्वत्रापि एतद्रीत्या एव लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः ।

द्वितीयलक्षणाऽनुसारेणाऽपि न हि तादृशाऽभावः ग्रहीतुं शक्यते । तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वह्नित्वगतद्वित्वम्, साध्यतावच्छेदकतायाः अपि पर्याप्त्या संयोगे वह्नित्वे च वर्तमानत्वेन साध्यताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपसंयोग-वह्नित्वगतद्वित्वमेव स्यात् । ततश्च तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदक-

रूपवह्नित्व-संयोगगतद्वित्ववृत्तित्वं यद्यपि सम्भवति तथापि पूर्वोक्तयुक्त्या साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतायाः पर्याप्त्याऽपि केवलसंयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते । तथा च कुतः तमादाय लक्षणसमन्वयः सम्भवेत् ? एवम् अन्यत्राऽपि सर्वत्र लक्षणसमन्वयकारकलक्षणघटकाऽभावाप्राप्तेः सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः इति ।

य
शो
ल
ता

– षष्ठभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठप्रतियोगिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभाव इति ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टनिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकताविशिष्टनिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणं नाऽसम्भवदोषदुष्टम् इति क्रमशः सर्वेषु स्थलेषु प्रागुक्तेषु एतल्लक्षणाऽव्याप्तिः भवति न वा तच्चिन्त्यते ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकः

●

❋ છઠ્ઠો ભાંગો, અસંભવ આવ્યો ❋

વિ
ન
મ્રા

ભાંગો - ૬ લક્ષણ →

સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

દોષ :- અસંભવ ! કારણ કે પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા આવી જાય. અને સાધ્યતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા જ પકડાય.

वह्न्यभावः ग्रहीतुं शक्यते यः लक्षणसमन्वयकारकः, यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधयाऽवच्छेदकता केवलसंयोगे एव वर्तते इति तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं संयोगगतैकत्वमेव स्यात्, साध्यतानिरूपितसंसर्गीयाऽवच्छेदकताऽपि पर्याप्त्या केवलसंयोगे एवेति साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपमपि संयोगगतैकत्वमेव स्यात् । तथा च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं समस्ति इति तादृशाऽभावः ग्रहीतुं शक्यते एवेति न पूर्वोक्तलक्षणवदसम्भवः ।

किन्तु 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र एतल्लक्षणाऽनुसारेण संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावमादाय अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः संयोगे एव वृत्तित्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसम्भवात्तादृशाऽभावस्य ग्राह्यत्वादिति । या शो ला ता

एवं संयोगेन महानसीयवह्न्यभावमादायाऽपि अव्याप्तिः स्यात्, तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः अपि संयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसम्भवात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि अव्याप्तिः, एतदभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः अपि संयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठप्रतियोगिताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतानिष्ठसाध्यताऽवच्छेदकतात्वा-

ऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपसंयोगगतैकत्ववृत्तित्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवं 'घटः द्रव्यत्वविशिष्टः, पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावम्, जलत्व-द्रव्यत्वोभयाभावञ्चादायाऽव्याप्तिः भवति, कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय न भवति इति स्वयमूह्यम् ।

अत्रेदमवधेयम् - साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतानिष्ठसाध्यतावच्छेदकतात्वाऽवच्छिन्न.... इत्यादिस्थाने साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्न.... इत्येवमपि संक्षेपेण वक्तुं पार्यते, तत्र 'यत्किञ्चित्सम्बन्धाऽवच्छिन्ना च साऽवच्छेदकता च = यत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकता तस्या भावः = तत्त्वम्' इत्येवं विग्रहः कर्तव्यः । इतः परम् एवमेव निर्देशः करिष्यते इति । तदनुसारेण प्रकृतलक्षणम् एवं सामान्यशैल्या - सम्बन्धविधया स्वनिरूपिता या अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । परिष्कारशैल्या तु - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण 'पर्वतः वह्नित्वसमवायिविशिष्टः धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादायाऽव्याप्तिः न सम्भवति । यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया अवच्छेदकता समवाये वह्नित्वसमवाये वा वर्तते इति तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं समवायगतैकत्वं वह्नित्वसमवायगतैकत्वं वा, साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतायाः संयोगे वर्तमानत्वेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्त्राऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वमिति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावो

नैव ग्रहीतुं शक्यते ।

'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः भवति, संसर्गविधया या साध्यतावच्छेदकता तस्याः, संसर्गविधया या प्रतियोगिताऽवच्छेदकता तस्याश्च पर्याप्त्या संयोगे एव वृत्तित्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवमुक्तस्थले एव वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि अव्याप्तिः भवेदेव । तत्स्वयमूह्यम् ।

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽव्याप्तिः न सम्भवेत्, यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः समवाये वृत्तित्वेन तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं समवायगतैकत्वं स्यात्, साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं संयोगगतैकत्वं वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । य शो ला ता

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव वह्नित्वसमवायेन संयोग्यभावमादायाऽपि नोक्तरीत्याऽव्याप्तिः ।

एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादायाऽपि नाऽव्याप्तिः इति स्वयमूह्यम् ।

एतद्भङ्गानुसारेणैव अन्यल्लक्षणमपि सम्भवति, यदि धर्मविधया साध्यता-प्रतियोगितावच्छेदकत्वयोरप्रवेशेऽपि तत्स्थाने सामान्येन साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशः अङ्गीक्रियते तदा ।

तथा हि - सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन सम्बन्धविधया या

साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति, स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति स्वाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

यत्र पूर्विललक्षणाऽव्याप्तिः नासीत् तत्र तत्र एतल्लक्षणस्याऽपि अव्याप्तिः न स्यादेव, तल्लक्षणस्यैतल्लक्षणेऽन्तर्भावात्, यत्र तल्लक्षणाऽव्याप्तिः आसीत् तत्र तत्र एतल्लक्षणाऽव्याप्तिः भवति न वा ? इत्येव चिन्तनीयम् । तद्यथा -

य शो ल ता

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धाऽवच्छिन्नप्रतियोगिताकघटाभावः नैव ग्रहीतुं शक्यते, यतः ***यद्यपि*** पूर्वोक्तयुक्त्या तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या घटत्वे संयोगे च वर्तते इति तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं घटत्व-संयोगगतद्वित्वम् । साध्यतावच्छेदकता तु पर्याप्त्या वह्नित्वे संयोगे च वर्तते इति साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपं वह्नित्व-संयोगगतद्वित्वम् । तथा च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्तीयाऽनुयोगिता (= पर्याप्त्यनुयोगिता)वच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसत्त्वेऽपि स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिः ?

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः । तादृशाऽभावीयप्रतियोगितायां ***यद्यपि***

पूर्वोक्तयुक्त्या स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः पर्याप्त्या महानसीयत्व-वह्नित्व-संयोगेषु वर्तमानत्वेन साध्यतावच्छेदकतायाश्च वह्नित्व-संयोगयोरेव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावः नैव ग्राह्यः इति कुतः तमादायाऽव्याप्तिसम्भवः ?

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायां पूर्वोक्तयुक्त्या ***यद्यपि*** स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपसंयोगगतैकत्ववृत्तित्वम् अस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः पर्याप्त्या वह्निघटोभयत्व-संयोगयोः वह्नित्व-घटत्व-संयोगेषु वा वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावः नैव ग्राह्यः इति न तमादायाऽव्याप्तिः ।

एवं 'घटः द्रव्यत्वविशिष्टः पृथ्वीत्वाद्' - इत्यत्रापि जलत्वविशिष्टद्रव्यत्वाभावमादाय, जलत्व-द्रव्यत्वोभयाभावमादाय वा नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः पर्याप्त्या जलत्वविशिष्टद्रव्यत्वत्व-समवाययोः जलत्व-द्रव्यत्वोभयत्व-समवाययोः वा वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्व-समवायगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि नाऽव्याप्तिः सम्भवति, यतः तादृशाऽभावीयप्रतियोगितायां

यद्यपि पूर्वोक्तयुक्त्या स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोग-वृत्तिनियामकवह्निसंयोगयोः वर्तते, साध्यतावच्छेदकता च संयोग-वह्नित्वसमवाययोः वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वसमवायगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते ।

एवं 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि अव्याप्तिः न स्यादेव, तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामकवह्निसंयोगगतैकत्वरूपवृत्तित्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः पर्याप्त्या वृत्तिनियामकवह्निसंयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवाय-वृत्तिनियामकवह्निसंयोगगतद्वित्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन साध्यतायां समवायेन संयोग्यभावमादाय, वह्नित्वसमवायेन संयोग्यभावमादाय... इत्यादिरीत्या याः याः अव्याप्तयः ताः ताः दूरतोऽपास्ताः इति तु स्पष्टमेव ।

एवं 'पर्वतः संयोगाश्रयत्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽपि नाऽव्याप्तिः सम्भवति । तथा हि - एतत्पूर्वमुक्तमेव स्थलम् । अत्र साध्यतावच्छेदकता साक्षात् संयोगे परम्परया संयोगत्व-समवाययोः, तादृशाऽभावीयप्रतियोगितावच्छेदकता च साक्षात् समवाय-संयोगयोः, परम्परया च संयोगत्व-समवाययोः इति अत्र साक्षात्परम्परासाधारणावच्छेदकत्वग्रहणे ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायां पूर्वोक्तयुक्त्या स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगत्व-समवाय-संयोगगतबहुत्वरूपवृत्तित्वमस्ति, ***तथापि*** तादृशाऽभावीय-

प्रतियोगितायाः सम्बन्धविधया अवच्छेदकतायाः पर्याप्त्या समवाये वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितानिरूपकसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकं रूपं समवायगतैकत्वं स्यात्, सम्बन्धविधया साध्यतावच्छेदकता तु पर्याप्त्या संयोगे वर्तते इति तादृशसाध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वमेव स्यादिति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वमेवेति कुतः तमादायाऽव्याप्तिः ?

इत्थञ्च 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणाङ्गीकारे नास्ति पूर्वोपदर्शितेषु स्थलेषु कुत्रचिदपि अव्याप्तिः । किन्तु नैतल्लक्षणं सर्वथा निर्दुष्टम्, अव्याप्तिसद्भावात् ।

तथा हि - 'पर्वतः संयोगाश्रयत्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यात् । अत्र - साध्यम् - संयोगाश्रयत्वविशिष्टः समवायी ।

- साध्यतावच्छेदकधर्मः - संयोगः ।
- साध्यतावच्छेदकसम्बन्धः - संयोगः ।
- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।
- साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

- प्रतियोगितावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगः ।
- प्रतियोगितावच्छेदकः सम्बन्धः - संयोगः ।
- प्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।
- प्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - समवायः, अनुयोगितासम्बन्धः वा ।

वस्तुतः 'संयोगाश्रयत्वविशिष्टसमवायिविशिष्टः' - इत्येवं साध्यप्रवेशोऽपि नाऽऽवश्यकः किन्तु 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्येवमेव स्थलं सम्यक् । तथा चाऽत्रापि

- साध्यम् - संयोगी ।
- साध्यतावच्छेदकः धर्मः - संयोगः ।
- साध्यतावच्छेदकः सम्बन्धः - संयोगः ।
- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।
- साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

अत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावः धर्तुं शक्यते । यत्र यत्र धूमः स्यात् तत्र तत्र वह्निः स्यादेव, वह्निश्च परमाण्वादिसंयोगस्याश्रयः भवेदेवेति यत्र यत्र धूमः तत्र तत्र संयोगी इति कथयितुं शक्यते । किन्तु वृत्तिनियामकः यः वह्निसंयोगः तस्य अनुयोगितासम्बन्धेन यदधिकरणं महानसादिकमेव, तच्च संयोगेन पर्वते नास्त्येवेति पर्वते संयोगेन वृत्तिनियामकवह्नि-संयोग्यभावः अस्ति ।

य शो ल ता

एतदभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोग-वृत्तिनियामकवह्निसंयोगयोः वर्तते इति तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वृत्तिनियामकवह्निसंयोगगतद्वित्वम् । साध्यतावच्छेदकता पर्याप्त्या संयोगे वर्तते, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन वृत्तिनियामकवह्निसंयोगस्याऽपि साध्यतावच्छेदकत्वसिद्ध्या संयोग-वृत्तिनियामकवह्निसंयोगयोरपि भवेदिति यथा साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वं भवेत् तथैव साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वृत्तिनियामकवह्निसंयोगगतद्वित्वमपि स्यादेवेति तादृशा-ऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्व-सम्बन्धेन साध्यताऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोगगतद्वित्वरूपवृत्तित्वं वर्तते एव ।

एवं तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता सा संयोगे पर्याप्त्या वर्तते, साध्यतायाः या सम्बन्धविधया अवच्छेदकता साऽपि संयोगे एव वर्तते इति तादृशाऽभावीय-प्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वं साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-

योगितावच्छेदकरूपमपि संयोगगतैकत्वमिति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमपि भवेदेवेति ।

इत्थञ्च तादृशाऽभावीयप्रतियोगितायां (१) स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपसंयोगगतैकत्ववृत्तित्वम्, (२) स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोगगतद्वित्वरूपवृत्तित्वञ्च स्तः एवेति तादृशाऽभावः ग्रहीतुं शक्यते ।

तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति लक्षणाऽसमन्वयाद् भवेदेव अव्याप्तिः ।

तन्निवारणाय उभयविधया उभयविधावच्छेदकत्वयोः प्रवेशः कर्तव्यः । तथा च (१) स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति (२) स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इत्येतत् षोडशभङ्गानुसारिलक्षणम् । य शो ल ता

एतल्लक्षणाऽनुसारेण नोक्ताऽव्याप्तिः । तादृशवृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां ***यद्यपि*** पूर्वोक्तयुक्त्या स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते ***तथापि*** धर्मविधया तादृशाऽभावीयप्रतियोगितावच्छेदकता साक्षाद् वृत्तिनियामकवह्निसंयोगे 'विशिष्टं शुद्धान्नातिरिच्यते' - इतिन्यायेन शुद्धसंयोगे च, परम्परया केवलवृत्तिनियामकवह्निसंयोगत्वे एव, वृत्तिनियामकवह्निसंयोगस्य शुद्धसंयोगतोऽनतिरेकेऽपि वृत्तिनियामकवह्निसंयोगत्वस्य संयोगत्वतः अतिरिक्तत्वात् । धर्मविधया साध्यतावच्छेदकता साक्षात् संयोगे, 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन वृत्तिनियामकवह्निसंयोगे च, किन्तु

परम्परया साध्यतावच्छेदकता तु संयोगत्वे एव । एवं साक्षात्परम्परासाधारणसाध्यतावच्छेदकत्वादिग्रहणे तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं संयोग-वृत्तिनियामकवह्निसंयोग-वृत्तिनियामकवह्निसंयोगत्वगतबहुत्वम्, तादृशासाध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं तु संयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्वगतबहुत्वम् । एवं च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकतादृशबहुत्वरूपवृत्तित्वविरहान्न हि तादृशोऽभावः ग्रहीतुं शक्यते इति उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशे कुतः तादृशाऽभावीयप्रतियोगितामादायाऽव्याप्तिसम्भवः ?

अत्रत्यं तत्त्वमनुपदमेव स्पष्टीभविष्यति इति ध्येयम् ।

इत्थञ्च एतद्भङ्गानुसारिलक्षणद्वितयमपि दुष्टमेवेति न तदुपादानं शक्यमिति स्थितम् ।

– सप्तमभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति, स्वनिरूपिता या धर्मविधया अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

●

⁂ સાતમો ભાંગો, અસંભવ તદવસ્થ ⁂

ભાંગો - ૭ લક્ષણ →

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સંબંધવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપક-

परिष्कारशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपवृत्ति, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण न कुत्रापि लक्षणसमन्वयः सम्भवति, पर्वतो वह्निमान् धूमाद् - इत्यत्र संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि ग्रहीतुं नैव शक्यते, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च वर्तते, ततः तादृशाऽभावीय-प्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोग-वह्नित्व-गतद्वित्वम् । सम्बन्धविधया च साध्यतावच्छेदकता केवलसंयोगे एवेति साध्यतानिरूपितसंसर्गीयाऽ-वच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं संयोगगतैकत्वमेवेति तादृशाऽ-भावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं नैवाऽस्ति ।

एवं तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता सा पर्याप्त्या वह्नित्वे एव वर्तते इति तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वह्नित्वगतैकत्वम् । साध्यतावच्छेदकता तु पर्याप्त्या संयोगे वह्नित्वे च वर्तते इति साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकं रूपञ्च संयोग-वह्नित्वगतद्वित्वमिति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपित-यत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-

●

પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

દોષ :- અસંભવ ! કારણ કે પ્રથમ જે નિરૂપકત્વકોટિ છે. તેમાં માત્ર વહ્નિત્વનિષ્ઠા પ્રતિયોગિતાઅવચ્છેદકતા જ ગ્રાહ્ય બને. અને સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા આવી જશે. તથા બીજી જે નિરૂપકત્વકોટિ છે તેમાં માત્ર સંયોગનિષ્ઠા જ પ્રતિયોગિતા-અવચ્છેદકતા આવશે. જ્યારે સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા આવી જશે.

सम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोग-वह्नित्वगतद्वित्वरूपवृत्तित्वमपि नास्ति ।

इत्थञ्च तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वविरहाच्च तादृशाऽभावः कथं ग्रहीतुं शक्यते ?

एवं सर्वत्र लक्षणसमन्वयकारकाऽभावानामप्राप्तेः न हि कुत्रचिदपि लक्षणसमन्वयः सम्भवेदिति स्यादेवाऽसम्भवः इति ।

– अष्टमभङ्गकाऽनुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिताऽवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपिता या सम्बन्धविधया अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति धर्मविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगि-

य शो ल ता

●

▒ ભાંગો આઠ, અસંભવ નહીં, કિંતુ અવ્યાપ્તિ ▒

ભાંગો - ૮ લક્ષણ →

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ. આ સિવાય પણ એક લક્ષણ આ ભાંગામાં બનશે જે આગળ બતાવ્યું છે.

વિ ન ભા

तावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणमपि असम्भवदोषदुष्टम् । एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वाऽवच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि धर्तुं नैव शक्यते, यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्या संयोगे एव वर्तमानत्वेन सम्बन्धविधया या साध्यताऽवच्छेदकता तस्याः अपि संयोगे एव वर्तमानत्वेन च यद्यपि तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते तथापि तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता सा पर्याप्त्या वह्नित्वे एव वर्तते, साध्यतावच्छेदकता च पर्याप्त्या संयोगे वह्नित्वे चोभयस्मिन् वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वह्नित्वगतद्वित्वरूपवृत्तित्वं नैव वर्तते इति तादृशाऽभावो नैव धर्तुं शक्यते । ततः कुतः तमादाय लक्षणसमन्वयः सम्भवेत् ? एवं सर्वत्र लक्षणसमन्वयकारकाऽभावदुर्लभत्वप्राप्त्या स्यादेवाऽसम्भवः इति ।

- नवमभङ्गानुसारिलक्षणम् -

●

दोष :- अव्याप्ति. स्थल → **पर्वतः समवायिमान् धूमात्** । अभाव → समवायथी समवायिअभाव अथवा तो **पर्वतो वह्निमान् धूमात्** स्थलमां ज समवायथी वह्निअभाव लईने अव्याप्ति आवे. कारण के तादृशअभावीयप्रतियोगिताअवच्छेदकता धर्मविधया मात्र वह्नित्वमां ज वृत्ति छे. साध्यताअवच्छेदकता पण धर्मविधया मात्र वह्नित्वमां ज वृत्ति छे.

❀ भांगो नव, असंभव पुनः राजा ❀

भांगो - ९ लक्षण →

य शो ल ता वि न भा

सामान्यशैल्या - स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः ।

य शो ल ता

एतद्भङ्गानुसारेण एवमपि लक्षणं सम्भवति -

स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्याऽपि इदमित्थमेवाऽभिधीयते, नवरं 'धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्व....' इत्येतत्स्थाने साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतात्व... इत्येवं ज्ञेयम् ।

●

ધર્મવિધયા સ્વઅવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

વિ ન ભા

દોષ :- અસંભવ ! કારણ કે **पर्वतो वह्निमान् धूमात्** માં જે લક્ષણઘટક સંયોગસંબંધ-અવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ તેને પણ લઈ નહીં શકાય. તે આ રીતે → પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા ગૃહીત થાય છે અને સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા ગૃહીત થાય છે. તથા દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા ગૃહીત થાય છે.

एतल्लक्षणद्वितयमपि असम्भवदोषदुष्टम् । तथा हि - प्रथमलक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र लक्षणसमन्वयकारकः संयोगसम्बन्धाऽवच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिता-निरूपकाऽभावः नैव ग्रहीतुं शक्यते, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च वर्तते, धर्मविधया साध्यतावच्छेदकता च केवलं वह्नित्वे एवेति तादृशाऽभावीयप्रति-योगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यता-निरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वं नास्त्येवेति कुतः तद्ग्रहणं सम्भवतीति सर्वत्र आवश्यका-ऽभावाऽप्राप्तेर्लक्षणसमन्वयाऽसम्भवाद् भवेदेवाऽसम्भवः ।

द्वितीयलक्षणाऽनुसारेणाऽपि तादृशाऽभावो नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतायाश्च पर्याप्त्या वह्नित्वे संयोगे चैव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगग-तद्वित्वरूपवृत्तित्वसत्त्वेऽपि उक्तयुक्त्या तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाव-च्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वविरहा-त्तादृशाऽभावस्याऽग्राह्यत्वादिति कुतः तमादायाऽसम्भवसम्भवनिवारणम् ? एवं सर्वत्र लक्षणसम-न्वयाऽसम्भवाद् भवेदेवाऽसम्भवः ।

– दशमभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिताऽवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-

●

જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા જ ગૃહીત થાય છે.

⊠ ભાંગો દસ, અસંભવ યથાવત્ ⊠

ભાંગો - ૧૦ લક્ષણ →

સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા-સંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતા-

पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपिता या धर्मविधया अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

य शो ल ता

एतल्लक्षणमप्यसम्भवदोषदुष्टम् । एतल्लक्षणानुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि नैव ग्रहीतुं शक्यते, यतः संसर्गविधया तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोगे वर्तते, साध्यतावच्छेदकता च पर्याप्त्या संयोगे वह्नित्वे चोभयस्मिन् वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वं नास्ति ।

एवं तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च वर्तते, या धर्मविधया साध्यतावच्छेदकता सा तु वह्नित्वे एवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्ना-

નિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સંબંધવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

વિ ન મ્રા

દોષ :- અસંભવ ! કારણ કે પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા ગૃહીત થઈ જાય છે. જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા ગૃહીત થાય છે. દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા પકડાય છે. જ્યારે સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા આવી જાય છે.

ऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वमपि नास्ति ।

एवं तादृशाऽभावो नैव धर्तुं शक्यते, ततः कुतः तमादाय लक्षणसमन्वयसम्भवः ? एवं सर्वत्र लक्षणसमन्वयकारकाऽभावानामप्राप्तेः सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः इति ।

– एकादशभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - स्वनिरूपिता या धर्मविधया अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपिता या धर्मविधया अवच्छेदकता तन्निष्ठावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगितानिरूपकवह्न्यभावः ग्रहीतुं शक्यते, धर्मविधया या तादृशाऽभावीयप्रतियोगितावच्छेदकता तस्याः, धर्मविधया या साध्यतावच्छेदकता तस्याश्च वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाव-

●

❖ ભાંગો - ૧૧, અવ્યાપ્તિ ❖

ભાંગો - ૧૧ લક્ષણ →

સંબંધવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપકઅભાવઅધિકરણઅવૃત્તિત્વ.

દોષ :- અવ્યાપ્તિ. સ્થલ - **पर्वतो वह्निमान् धूमात्** ।

અભાવ → સંયોગથી વહ્નિ-જલઉભયાભાવ.

च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वसत्त्वादिति न तदप्राप्तिप्रयुक्ताऽसम्भवः ।

एवं 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावमादाय नाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः पर्याप्त्या घटत्वे वर्तमानत्वेन, साध्यतायाः या धर्मविधयाऽवच्छेदकता तस्याः पर्याप्त्या वह्नित्वे वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्या महानसीयवह्नित्वे महानसीयत्वे वह्नित्वे चोभयस्मिन् वा वर्तमानत्वेन धर्मविधया या साध्यतावच्छेदकता तस्याश्च पर्याप्त्या वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्या वह्नि-घटोभयत्वे वह्नित्वे घटत्वे चोभयस्मिन् वा वर्तमानत्वेन धर्मविधया या साध्यतावच्छेदकता तस्याः पर्याप्त्या केवलवह्नित्वे एव वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरू-

●

પ્રસ્તુતમાં પ્રતિયોગિતાઅવચ્છેદક સંબંધ માત્ર સંયોગ છે અને સાધ્યતાઅવચ્છેદક સંબંધ પણ માત્ર સંયોગ છે. તેથી, સંયોગગતએકત્વમાં સંબંધવિધયા બંને પ્રકારની અવચ્છેદકતામાં રહેલ અવચ્છેદકતાત્વથી અવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતા-અવચ્છેદકતા જશે. માટે, સંયોગથી વહ્નિ-જલઉભયાભાવ લઈ શકાશે. તેના અધિકરણ પર્વતમાં ધૂમ વૃત્તિ. માટે, અવ્યાપ્તિ દુર્વાર !

આ ભાંગાનું વૈકલ્પિક લક્ષણ આગળ બતાવ્યું છે.

पकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वादिति ।

किन्तु समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याश्च पर्याप्त्या वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

एवञ्च 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः जलत्वविशिष्टद्रव्यत्वत्वे पर्याप्त्या वर्तमानत्वेन साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः द्रव्यत्वत्वे एव वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् । य शो ल ता

एवं जलत्व-द्रव्यत्वोभयाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः जलत्व-द्रव्यत्वोभयत्वे पर्याप्त्या वर्तमानत्वेन साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः द्रव्यत्वत्वे एव वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याश्च पर्याप्त्या द्रव्यत्वत्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन

साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

एवञ्च 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय स्यादेव अव्याप्तिः, तादृशाऽभावीयप्रतियोगिताया या धर्मविधया अवच्छेदकता तस्याः, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याश्च पर्याप्त्या वह्नित्वसमवाये एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वसत्त्वात्तादृशाऽभावस्य ग्राह्यत्वात् ।

किन्तु 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वह्नित्वसमवायिनः साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय, वृत्तिनियामकवह्निसंयोगेन च साध्यतायां वृत्तिनियामकवह्निसंयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितानिरूपिता या धर्मविधया अवच्छेदकता तस्याः वृत्तिनियामकवह्निसंयोगे वर्तमानत्वेन, धर्मविधया या साध्यतावच्छेदकता तस्याः वह्नित्वसमवाये वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं समवायेन वह्नित्वसमवायेन वा संयोग्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः संयोगे वर्तमानत्वेन, धर्मविधया या साध्यतावच्छेदकता तस्याः वह्नित्वसमवाये एव वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावो नैव धर्तुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः संयोगे वर्तमानत्वेन,

धर्मविधया या साध्यतावच्छेदकता तस्याः समवाये वर्तमानत्वेन च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

किन्तु 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय अव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः, धर्मविधया या साध्यतावच्छेदकता तस्याश्च संयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसत्त्वात् तादृशाऽभावस्य ग्राह्यत्वात् ।

एतद्भङ्गानुसारेण अन्यदपि लक्षणं सम्भवति । तथा हि -

परिष्कारशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति । य शो ल ता

स्पष्टमेवेदं लक्षणमिति सामान्यशैल्या नोपदर्शितम् । एतल्लक्षणे पूर्वोक्तलक्षणाऽन्तर्भावाद् यत्र यत्र तल्लक्षणाऽव्याप्तिः नासीत् तत्र तत्र एतल्लक्षणस्याऽप्यव्याप्तिः नैव स्यात् । यत्र यत्र च तल्लक्षणस्याऽव्याप्तिरासीत् तत्र तत्र एतल्लक्षणस्य अव्याप्तिरस्ति न वा इत्येव चिन्तनीयम् ।

'पर्वतो वह्निमान् धूमाद्' - इत्यत्रैतल्लक्षणानुसारेण समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावमादाय नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायां ***यद्यपि*** पूर्वोक्तयुक्त्या स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वमस्ति, ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छे-

दकता पर्याप्त्या वह्नित्वे समवाये च वर्तते, साध्यतावच्छेदकता तु पर्याप्त्या वह्नित्वे संयोगे चेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसंयोगगतद्वित्वरूपवृत्तित्वं नास्त्येवेति कुतः तद्ग्रहणं सम्भवतीति नैव स्यात्तमादायाऽव्याप्तिरिति ।

एवं 'घटः द्रव्यत्वविशिष्टः, पृथ्वीत्वाद्' - इत्यत्रापि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायां ***यद्यपि*** पूर्वोक्तयुक्त्या स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या द्रव्यत्वत्वे कालिके च वर्तते, साध्यतावच्छेदकता तु द्रव्यत्वत्वे समवाये च वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्व-समवायगतद्वित्वरूपवृत्तित्वं तु नास्त्येवेति तद्ग्रहणमेवाऽसम्भवि, ततः कुतः तमादायाऽव्याप्तिसम्भवः ?

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादायाऽपि नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायां यद्यपि पूर्वोक्तयुक्त्या स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वमस्ति तथापि तादृशाऽभावीयप्रतियोगिताऽवच्छेदकता पर्याप्त्या समवाये वह्नित्वसमवाये च यद्वा केवलवह्नित्वसमवाये वर्तते, साध्यतावच्छेदकता तु पर्याप्त्या वह्नित्वसमवाये संयोगे चेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवाय-संयोगगतद्वित्वरूपवृत्तित्वं नास्त्येवेति कुतः तमादायाऽव्याप्तिसम्भवः ?

किन्तु 'पर्वतः संयोगिविशिष्टः धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाव्याप्तिः स्यादेव, यतः तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता सा पर्याप्त्या संयोगे

य शो ल ता

वर्तते, साध्यतायाः अपि धर्मविधया या अवच्छेदकता सा पर्याप्त्या संयोगे एव वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमस्ति एव ।

एवं तादृशाऽभावीयप्रतियोगितायाः साक्षात्परम्परासाधारणाऽवच्छेदकता पर्याप्त्या संयोग-समवाय-संयोगत्वेषु वर्तते, साध्यतायाः अपि साक्षात्परम्परासाधारणाऽवच्छेदकता पर्याप्त्या संयोग-समवाय-संयोगत्वेषु एव वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-समवाय-संयोगत्वगतबहुत्वरूपवृत्तित्वमस्त्येव ।

इत्थञ्च तादृशोऽभावः ग्रहीतुं शक्यते एवेति तदधिकरणे धूमस्य वृत्तित्वेन लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिरिति नैतल्लक्षणं ग्रहीतुं शक्यते ।

अत्रत्यमपि तत्त्वमग्रे स्फुटीभविष्यतीति ध्येयम् ।

– द्वादशभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिताऽवच्छेदकता तन्निष्ठाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति, स्वनिरूपिता या धर्मविधयाऽवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

●

✱ ભાંગા - ૧૨માં પણ અસંભવ ✱

ભાંગો - ૧૨ લક્ષણ →

સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति, स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणमप्यसम्भवदोषदुष्टम् । एतल्लक्षणानुसारेण 'पर्वतो वह्निमान्, धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि ग्रहीतुं नैव शक्यते, यतः तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्या अधिकरणं वह्नित्वम्, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः अपि पर्याप्त्या अधिकरणं तदेवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वमस्ति एव ।

किन्तु तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः, या साध्यतावच्छेदकता तस्याः पर्याप्त्याधिकरणं वह्नित्वं संयोगश्च । तथा च तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्व-संयोगगतद्वित्वरूपवृत्तित्वं नास्त्येवेति कुतः तमादाय लक्षणसमन्वयः सम्भवेत् ? एवं सर्वत्र लक्षणसमन्वयकारकाऽभावाप्राप्तेः लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः इति ।

●

दोष :- असंभव ! કારણ કે **पर्वतो वह्निमान् धूमात्** સ્થલમાં પણ જે સંયોગસંબંધ-અવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ તે લક્ષણઘટક નહીં બની શકે. તે આ રીતે → પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા સંયોગ-વહ્નિત્વઉભયનિષ્ઠા આવે છે. જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા જ ગૃહીત થાય છે. દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા સંયોગ-વહ્નિત્વઉભયનિષ્ઠા આવે છે. જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા જ ગૃહીત થાય છે.

– त्रयोदशभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरण-निरूपितवृत्तित्वाभावः इति ।

परिष्कारशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताव-च्छेदकरूपवृत्ति, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति।

एतल्लक्षणमपि असम्भवदोषदुष्टम् । 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावोऽपि धर्तुं नैव शक्यते, यतः तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च वर्तते, सम्बन्धविधया या साध्यतावच्छेदकता सा केवलं संयोगे एव वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपक-

य शो ल ता

●

❋ ભાંગો તેર, અસંભવ જ ❋

ભાંગો - ૧૩ લક્ષણ →

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતા-નિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠ-સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ-વૃત્તિપ્રતિયોગિતાનિરૂપક અને સંબંધવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વ-અવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદક-તાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતા-નિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

વિ ન ભા

દોષ :- અસંભવ. કારણ કે પ્રથમ નિરૂપકત્વકોટિમાંથી અભાવ પસાર થઈ જાય.

पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं नास्त्येव । एवं तादृशाऽभावीयप्रतियोगिताऽवच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च, धर्मविधया या साध्यतावच्छेदकता सा तु केवलं वह्नित्वे एवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वमपि नास्त्येवेति कुतः तमादाय लक्षणसमन्वयः सम्भवेत् ? एवं सर्वत्र लक्षणसमन्वयाऽसम्भवाद् भवेदेवाऽसम्भवः ।

य शो ल ता

– चतुर्दशभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - स्वनिरूपिता या सम्बन्धविधया अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभाव इति ।

●

પણ દ્વિતીય નિરૂપકત્વકોટિમાંથી પસાર ન થઈ શકે. તે આ રીતે → પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા જે વહ્નિત્વનિષ્ઠા છે તે જ પકડાય છે. અને સાધ્યતાઅવચ્છેદકતા પણ વહ્નિત્વનિષ્ઠા જ ગૃહીત થાય છે. માટે, વહ્નિત્વગતૈકત્વ ઉભયવિધઅવચ્છેદકતાનિષ્ઠઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાવિશિષ્ટ બને છે. માટે, વહ્નિઅભાવ ઉક્તસંબંધથી તાદશઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયાગિતાનો નિરૂપક બની જાય. કિંતુ દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા જ ગૃહીત થાય છે. જ્યારે સાધ્યતાઅવચ્છેદકતા સંયોગ-વહ્નિત્વઉભયનિષ્ઠા પકડાય છે. માટે દ્વિતીય નિરૂપકત્વ વહ્નિઅભાવમાં લઈ નહીં શકાય. અને તેથી વહ્નિઅભાવ લક્ષણઘટક ન બનતા અસંભવ દોષ દુર્વાર બનશે. કારણ કે દરેક સ્થળમાં આ રીતે લક્ષણ સમન્વય નહીં થાય.

વિ ન ભા

❋ ચૌદમા ભાંગા પ્રમાણે પણ અસંભવ ❋

ભાંગો - ૧૪ લક્ષણ →

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતા-

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाऽभावः इति ।

एतल्लक्षणमपि असम्भवदोषदुष्टम् । एतल्लक्षणाऽनुसारेण 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगितानिरूपकाभावोऽपि नैव धर्तुं शक्यते, यतः तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः, या सम्बन्धविधया अवच्छेदकता तस्याश्च पर्याप्त्या संयोगे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते तथापि तादृशाऽभावीयप्रतियोगिताऽवच्छेदकता पर्याप्त्या संयोगे वह्नित्वे च

●

निरूपकपर्याप्तिअनुयोगिताअवच्छेदकतासंबंधथी साध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकरूपवृत्तिप्रतियोगितानिरूपक अने संबंधविधया स्वावच्छेदकतानिष्ठप्रतियोगिताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकतासंबंधथी संबंधविधया साध्यताअवच्छेदकतानिष्ठसाध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकरूपवृत्तिप्रतियोगितानिरूपक એવા અભાવના અધિકરણમાં અવૃત્તિત્વ.

दोष :- અસંભવ ! કારણ કે વહ્નિઅભાવ દ્વિતીય નિરૂપકત્વકોટિમાંથી પસાર થઈ જાય છે. પણ, પ્રથમ નિરૂપકત્વકોટિમાંથી પસાર નહીં થઈ શકે. તે આ રીતે → પ્રતિયોગિતાઅવચ્છેદક સંબંધ સંયોગ છે અને સાધ્યતાઅવચ્છેદક સંબંધ પણ સંયોગ જ છે. તેથી સંયોગગતએકત્વમાં ઉભયવિધઅવચ્છેદકતાનિષ્ઠઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા જશે. માટે, ઉક્ત સંબંધથી તાદૃશઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જ વહ્નિઅભાવ થશે. પરિણામે, વહ્નિઅભાવ દ્વિતીય નિરૂપકત્વકોટિમાંથી પસાર થઈ ગયો.

કિંતુ પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા જ આવે

वर्तते धर्मविधया या साध्यतावच्छेदकता सा तु केवलवह्नित्वे एवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वं नास्त्येवेति कुतः तद्ग्रहणं सम्भवति । एवं सर्वत्र लक्षणसमन्वयोपयोग्यभावाऽप्राप्तेः सर्वत्र लक्षणाऽसमन्वयाद् भवेदेवाऽसम्भवः इति ।

य

– पञ्चदशभङ्गानुसारिलक्षणम् -

शो

सामान्यशैल्या - स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपिता धर्मविधया या अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

ल

ता

परिष्कारशैल्या - स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-

●

છે. જ્યારે સાધ્યતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા આવી જાય છે. માટે, પ્રથમ નિરૂપકત્વ વહ્નિઅભાવમાં નહીં જાય. પરિણામે સંયોગસંબંધઅવચ્છિન્ન-વહ્નિત્વઅવચ્છિન્નપ્રતિયોગિતાક વહ્નિઅભાવ પણ લક્ષણઘટક ન બનતા સર્વત્ર આ રીતે લક્ષણસમન્વય ન થતા અસંભવ દોષ આવશે.

ભાંગો પંદર, અસંભવ અંદર

વિ

ભાંગો - ૧૫ લક્ષણ →

न

धर्मविधया स्वावच्छेदकतानिष्ठप्रतियोगिताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकतासंबंधथी धर्मविधया साध्यताअवच्छेदकतानिष्ठसाध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकરૂપवृत्तिप्रतियोगितानिरूपक अने स्वावच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकतासंबंधथी संबंधविधया साध्यताअवच्छेदकतानिष्ठसाध्यताअवच्छेदकतात्वअवच्छिन्नप्रतियोगितानिरूपकपर्याप्तिअनुयोगिताअवच्छेदकરૂપवृत्तिप्रतियोगितानिरूपक जे अभाव तेना अधिकरणमां अवृत्तित्व.

भा

त्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

एतल्लक्षणमपि असम्भवदोषदुष्टम् । एतल्लक्षणाऽनुसारेणाऽपि 'पर्वतो वह्निमान् धूमाद्' इत्यत्र संयोगसम्बन्धावच्छिन्न-वह्नित्वावच्छिन्नप्रतियोगितानिरूपकवह्न्यभावः नैव धर्तुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः, धर्मविधया या साध्यतावच्छेदकता तस्याश्च वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवह्नित्वगतैकत्ववृत्तित्वं वर्तते, किन्तु तादृशाऽभावीयप्रतियोगितावच्छेदकता पर्याप्त्या वह्नित्वे संयोगे च वर्तते, सम्बन्धविधया या साध्यतावच्छेदकता सा तु संयोगे एवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन-साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं नास्त्येवेति कुतः तादृशाऽभावग्रहणं सम्भवेदिति लक्षणसमन्वयकारकाऽभावाऽप्राप्तेः सर्वत्र लक्षणसमन्वयाऽसम्भवाद् भवेदेवाऽसम्भवः ।

इत्थञ्च एतत्पर्यन्तानि सर्वाण्यपि लक्षणानि दुष्टानि । पञ्चदशभङ्गकाऽनुसारिलक्षणेषु द्वादशभङ्गकाऽनुसारिलक्षणानि असम्भवदोषदुष्टानि, तदतिरिक्तभङ्गत्रितयाऽनुसारिलक्षणपञ्चकमपि अव्याप्तिदोषदुष्टमिति न किञ्चिदपि लक्षणं ग्राह्यं वर्तते । किन्तु अधुना प्रदर्श्यमानं षोडशभङ्गानुसारिलक्षणमेव अङ्गीकर्तव्यम् । तथाहि -

●

દોષ :- અસંભવ ! ભાંગા - ૧૩માં બતાવ્યા મુજબ વહ્નિઅભાવ પ્રથમ નિરૂપકત્વકોટિમાંથી પસાર થઈ જાય છે. કિંતુ દ્વિતીય નિરૂપકત્વકોટિમાંથી પસાર થઈ શકતો નથી. કારણ કે દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગઉભયનિષ્ઠા ગૃહીત થાય છે. જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર સંયોગનિષ્ઠા પકડાય છે.

– षोडशभङ्गानुसारिलक्षणम् -

सामान्यशैल्या - सम्बन्धविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन सम्बन्धविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति धर्मविधया या स्वनिरूपिता अवच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन धर्मविधया या साध्यतावच्छेदकता तन्निष्ठतादृशाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः इति ।

य शो ल ता

परिष्कारशैल्या - स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाऽभावः इति ।

●

✲ સોળમાં'ય અસંભવની બલા ✲

ભાંગો - ૧૬ લક્ષણ →

સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક અને સંબંધવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબધથી સંબધવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠસાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

વિ ન ભા

દોષ :- અસંભવ ! કારણ કે પ્રસ્તુતમાં દ્વિતીય નિરૂપકત્વકોટિમાંથી વહ્નિઅભાવ ભાંગા-૧૪માં બતાવ્યા મુજબ પસાર થઈ જશે. કિંતુ પ્રથમ નિરૂપકત્વકોટિમાંથી પસાર નહીં થઈ શકે. કારણ કે પ્રથમ નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગ-ઉભયનિષ્ઠા પકડાય છે. જ્યારે સાધ્યતાઅવચ્છેદકતા માત્ર વહ્નિત્વનિષ્ઠા જ ગૃહીત થાય છે.

एतच्च सर्वथा निर्दुष्टम् । पदार्थस्फैत्यार्थं प्रतिस्थलं तत्समन्वयः प्रदर्श्यते अधुना -

'पर्वतो वह्निमान् धूमाद्' - इत्यत्र एतल्लक्षणाऽनुसारेण संयोगसम्बन्धावच्छिन्नप्रतियोगिताकः घटाभावः नैव ग्रहीतुं शक्यते, तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याश्च पर्याप्त्याऽधिकरणं संयोग एवेति तादृशाऽभावीयप्रतियोगितायां ***यद्यपि*** स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता सा पर्याप्त्या घटत्वे वर्तते, साध्यतायाः धर्मविधया याऽवच्छेदकता सा पर्याप्त्या वह्नित्वे वर्तते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वं नास्त्येवेति कुतः तादृशाऽभावमादायाऽव्याप्तिः सम्भवति ?

एवं महानसीयवह्न्यभावमादायाऽपि नाऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः । सम्बन्धविधया या साध्यतावच्छेदकता तस्याः अपि अधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां ***यद्यपि*** स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं महानसीयवह्नित्वम्, महानसीयत्व-वह्नित्वोभयं वा, धर्मविधया या साध्यतावच्छेदकता तस्याः पर्याप्त्याधिकरणं वह्नित्वम् इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वं नास्ति । अतः तादृशाऽभावः

●

આ રીતે ૧૬ ભાંગામાંથી ૧૨ ભાંગામાં અસંભવદોષ આવે છે. ભાંગો ૨જો અવ્યાપ્તિગ્રસ્ત છે. તેનું ખંડન મૂળમાં જ આપણે જોઈ લીધું. ૧લો ભાંગો શુદ્ધ છે. ઉત્તરપક્ષસમ્મત છે.

अग्राह्यः । अतः न तमादायाऽव्याप्तिः इति ।

एवं वह्नि-घटोभयाभावमादायाऽपि नाऽव्याप्तिः । तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः पर्याप्त्या संयोगे एव वर्तमानत्वेन ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायां पूर्वोक्तयुक्त्या स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं वह्नि-घटोभयत्वम्, वह्नित्व-घटत्वोभयं वेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वं न सम्भवति इति तादृशाऽभावो नैव धर्तुं शक्यते, तथा च कुतः तमादायाऽव्याप्तिशङ्काऽपि ?

एवं समवायेन वह्न्यभावमादायापि नाऽव्याप्तिः । तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्या वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकरूपवह्नित्वगतैकत्ववृत्तित्वमस्ति, किन्तु तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता सा पर्याप्त्या समवाये वर्तते इति तादृशाऽभावीय-

य शो ल ता

❁ ભાંગા ૮ + ૧૧માં વિશેષ વિચારણા ❁

ભાંગો - ૮ અને ભાંગો - ૧૧ કંઈક આશાસ્પદ ભાંગા છે. મતલબ કે તે ભાંગામાં માત્ર અવ્યાપ્તિ જ આવે છે. જો એક પરિષ્કાર કરવામાં આવે તો તે અવ્યાપ્તિ પણ ન આવે. તથા સંબંધનો કે ધર્મનો પ્રવેશ પણ કરવાનો ન આવે.

વિ ન ભા

ભાંગા - ૮ પ્રમાણેનું વૈકલ્પિક લક્ષણ સૌ પ્રથમ જોઈએ :-

ભાંગા - ૮ મુજબ સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાનો કે પ્રતિયોગિતા-અવચ્છેદકતાનો પ્રવેશ નથી. માટે, ફક્ત એકવિધ પ્રવેશ જ લક્ષણ તરીકે આપણે જોયો. પણ, એક વાર ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનો અને પ્રતિયોગિતાઅવચ્છેદકતાનો પ્રવેશ કરીએ. અને બીજી વાર સંબંધવિધયા લખ્યા વિના એમને એમ સાધ્યતાઅવચ્છેદકતાનો અને પ્રતિયોગિતાઅવચ્છેદકતાનો પ્રવેશ કરીએ તો પૂર્વોક્ત અવ્યાપ્તિ ન આવે. તે આ રીતે -

प्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं नैव सम्भवति इति तादृशाऽभावमादाय अव्याप्तिः नैव सम्भवति ।

एवं संयोग-समवायोभयसम्बन्धेन वह्न्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगि-तायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्या वह्नित्वे एव वर्तमानत्वेन तादृशाऽभावीयप्रति-योगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाव-च्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वरूपवृत्तित्वसत्त्वेऽपि तादृशाऽ-भावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः पर्याप्त्या संयोग-समवायोभयस्मिन् वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियो-गितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वाऽभावात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं च 'घटः द्रव्यत्ववान्, पृथ्वीत्वाद्' - इत्यत्र जलत्वविशिष्टद्रव्यत्वाभावमादाय नाऽ-व्याप्तिः । यतः तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याश्च पर्याप्त्याऽधिकरणं समवायः एवेति ***यद्यपि*** तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिता-

य शो ल ता

●

❀ આઠમા ભાંગાનું નિર્દોષ લક્ષણ ❀

આઠમા ભાંગાનું વૈકલ્પિક લક્ષણ →

ધર્મવિધયા સ્વાવચ્છેદકતાનિષ્ઠપ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતા-નિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતાસંબંધથી ધર્મવિધયા સાધ્યતાઅવચ્છેદકતાનિષ્ઠ-સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિ-પ્રતિયોગિતાનિરૂપક અને સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયો-ગિતાઅવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિ-અનુયોગિતાઅવચ્છેદકરૂપવૃત્તિપ્રતિયોગિતાનિરૂપક જે અભાવ તેના અધિકરણમાં અવૃત્તિત્વ.

વિ ન ભા

निरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वमस्ति, ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता सा जलत्वविशिष्टद्रव्यत्वत्वे, धर्मविधया या साध्यतावच्छेदकता सा तु द्रव्यत्वत्वे इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वविरहात् तादृशाऽभावो नैव ग्रहीतुं शक्यते इति ।

एवं जलत्व-द्रव्यत्वोभयाभावमादायापि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधयाऽवच्छेदकता तस्याः समवाये एव वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः जलत्व-द्रव्यत्वोभयत्वे वर्तमानत्वेन तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावस्याऽग्राह्यत्वात् ।

एवं कालिकसम्बन्धाऽवच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं द्रव्यत्वत्वमेवेति तादृशाऽभावीयप्रतियोगितायां ***यद्यपि*** स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्न-

●

❋ સમવાયથી વહ્નિઅભાવનું વારણ ❋

સમવાયથી વહ્નિઅભાવને લઈને પહેલાં જે અવ્યાપ્તિ આપી હતી તે નહીં આવે. કારણ કે પ્રથમ નિરૂપકત્વકોટિમાંથી ઉક્તવહ્નિઅભાવ પસાર થઈ જશે. પણ દ્વિતીય નિરૂપકત્વકોટિમાંથી પસાર નહીં થાય. તે આ રીતે → પ્રતિયોગિતાઅવચ્છેદક ધર્મ વહ્નિત્વ અને સાધ્યતાઅવચ્છેદક ધર્મ પણ વહ્નિત્વ. માટે, પહેલા બતાવ્યું તે મુજબ વહ્નિત્વગતએકત્વમાં ઉભયવિધઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા જશે. અને તેથી ઉક્તસંબંધથી વહ્નિત્વગતએકત્વમાં વહ્નિઅભાવીયપ્રતિયોગિતા રહી જાય, તેનો નિરૂપક વહ્નિઅભાવ બની જાય.

प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकद्रव्यत्वत्वगतैकत्वरूपवृत्तित्वम् अस्ति, ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः पर्याप्त्याधिकरणं कालिकः इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वं नास्ति इति तादृशोऽभावो नैव ग्रहीतुं शक्यते ।

एवञ्च 'पर्वतः वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन वह्नित्वसमवायेन वा वह्नित्वसमवाय्यभावमादाय अपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्याऽधिकरणं वह्नित्वसमवायः, धर्मविधया या साध्यतावच्छेदकता तस्याः अपि पर्याप्त्यधिकरणं वह्नित्वसमवायः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वमस्ति तथापि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्या अधिकरणं समवायः वह्नित्वसमवायो वा, साध्यतायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-

●

કિંતુ દ્વિતીય નિરૂપકત્વકોટિમાં પ્રતિયોગિતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાવચ્છેદકતા વહ્નિત્વ-સમવાયગતદ્વિત્વમાં જશે. જ્યારે સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાઅવચ્છેદકતા વહ્નિત્વ-સંયોગગતદ્વિત્વમાં છે. તેથી સ્વાવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાવચ્છેદકતાસંબંધથી સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્નપ્રતિયોગિતાનિરૂપકપર્યાપ્તિઅનુયોગિતાવચ્છેદકવહ્નિત્વ-સંયોગગતદ્વિત્વમાં તાદૃશવહ્નિઅભાવીયપ્રતિયોગિતા વૃત્તિ નહીં બને. માટે, તાદૃશદ્વિત્વમાં વૃત્તિપ્રતિયોગિતાનિરૂપકત્વ તાદૃશવહ્નિઅભાવમાં નહીં જાય.

માટે, સમવાયથી વહ્નિઅભાવ લઈ નહીં શકાય. સંયોગથી વહ્નિઅભાવ લેવો પડશે. તેનું અધિકરણ જલહ્રદ. ધૂમ તેમાં અવૃત્તિ. લક્ષણસમન્વય, અવ્યાપ્તિ દૂર.

पर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिः सम्भवति ?

एवं 'पर्वतो वह्नित्वसमवायिविशिष्टः, धूमाद्' - इत्यत्रैव संयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽपि नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याश्च पर्याप्त्याधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमस्ति, तथापि तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्याधिकरणं वृत्तिनियामकवह्निसंयोगः, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्याधिकरणं वह्नित्वसमवायः इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवह्नित्वसमवायगतैकत्वरूपवृत्तित्वविरहात्तादृशाऽभावः नैव ग्रहीतुं शक्यते इति नाऽव्याप्तिः ।

न, तादृशाऽऽपत्तेः असत्त्वात् । अयं भावः - 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इतिलक्षणाऽभ्युपगमेऽपि 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादाय नाऽव्याप्तिः स्यात्, यतः तादृशाऽभावीयप्रतियोगिताऽवच्छेदकता साध्यतावच्छेदकता च साक्षात् संयोगे वृत्तिनियामकवह्निसंयोगे च वर्तेते, किन्तु तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः परम्परया अधिकरणं वृत्तिनियामकवह्निसंयोगत्वमेव स्यात्, संयोगत्वं नैव, वृत्तिनियामकवह्निसंयोगत्वस्य शुद्धसंयोगत्वतः भिन्नत्वात्, विशिष्टनिष्ठधर्मस्य शुद्धनिष्ठधर्मतः भिन्नत्वेऽविवादादिति उक्तमेव, एवं साध्यतावच्छेदकताऽपि परम्परया संयोगत्वे एव स्यात्, वृत्तिनियामकवह्निसंयोगत्वे नैव । प्रकृते

- साध्यम् - संयोगी ।
- साध्यतावच्छेदकः धर्मः - संयोगः वृत्तिनियामकवह्निसंयोगश्च ।
- साध्यतावच्छेदकः सम्बन्धः - संयोगः ।
- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।
- साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

तथा तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

- तादृशाऽभावीयप्रतियोगितावच्छेदकः धर्मः - संयोगः वृत्तिनियामकवह्निसंयोगश्च ।
- तादृशाऽभावीयप्रतियोगितावच्छेदकः सम्बन्धः - संयोगः ।
- तादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वमेव ।
- तादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

ततश्च साक्षात् परम्परया च साध्यतावच्छेदकतायाः अधिकरणविधया संयोग-वृत्तिनियामक-वह्निसंयोग-संयोगत्व-समवायाः प्राप्यन्ते, तादृशाऽभावीयप्रतियोगितावच्छेदकतायाश्च अधिकरण-विधया संयोग-वृत्तिनियामकवह्निसंयोग-वृत्तिनियामकवह्निसंयोगत्व-समवायाः एव प्राप्यन्ते ।

इत्थञ्च भवतोक्तरीत्या तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याश्च अधिकरणविधया संयोगस्यैव प्राप्तेः तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्य-नुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसत्त्वेऽपि स्वावच्छेदकतात्वावच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरू-पकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-समवायगतबहुत्वरूपवृत्तित्वं नास्त्येवेति तादृशाऽभावो नैव ग्रहीतुं शक्यते । किन्तु संयोगेन संयोग्यभावः एव ग्राह्यः, तदधिकरणे धूमः अवृत्तिरिति लक्षणसमन्वयात् कुतः अव्याप्तिः ? तथा च तृतीयमेव लक्षणमङ्गीकर्तव्यं स्यात्, कुत्राऽपि अव्याप्तेरभावादिति ।

य शो ल ता

ननु अस्माकं पर्यनुयोगः अयं वर्तते यदुत ग्रन्थकृता 'पर्वतः संयोगित्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्येवं स्थलं किमर्थं गृहीतम् ? संयोगित्वेन समवायिनः साध्यत्वं किमर्थमङ्गीकृतम् ? 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्येवं स्थलं किमर्थं नाङ्गीकृतम् ? ***न च*** 'पर्वतः संयोगि-विशिष्टः, धूमाद्' इत्यत्र समवायेन संयोग्यभावमादाय प्रथम-द्वितीयलक्षणाऽनुसारेणैवाऽव्याप्तिः सम्भवति, तृतीयलक्षणस्याऽव्याप्तिः कमपि अभावमादाय न तत्र भवति इति तादृशस्थलं परित्यज्य संयोगित्वेन समवायिसाध्यकस्थलं ग्रन्थकृता अङ्गीकृतम् ***इति वाच्यम्;***

'पर्वतः संयोगित्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्रापि समवायेन संयोग्यभावमादाय प्रथम-द्वितीयलक्षणाऽनुसारेणैवाऽव्याप्तेः, तृतीयलक्षणं नाऽत्राऽव्याप्तम् । तथा हि - प्रथमलक्षणा-ङ्गीकारे समवायेन संयोग्यभावमादाय यथाऽव्याप्तिः भवति तथोपदर्शितमेव (दृश्यतां पृ. ५५३, ५५४, ५५५) । द्वितीयलक्षणाऽनुसारेणाऽपि तथैवाऽव्याप्तिः भवति, तद्यथा - तादृशाऽ-भावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः, धर्मविधया या साध्यतावच्छेदकता तस्याः अपि पर्याप्त्याधिकरणं संयोग एवेति तादृशाभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन

साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदक-संयोगगतैकत्वरूपवृत्तित्वं वर्तते एव । एवं तादृशाऽभावीयप्रतियोगिता-वच्छेदकतायाः साक्षात् परम्परया च अधिकरणविधया संयोग-संयोगत्व-समवायाः प्राप्यन्ते, साध्यतावच्छेदकतायाः अपि साक्षात् परम्परया च अधिकरणविधया संयोग-संयोगत्व-समवायाः एव प्राप्यन्ते इति तादृशाऽ-भावीयप्रतियोगितायां स्वावच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यताऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्व-समवायगतबहुत्वरूपवृत्तित्वं वर्तते एवेति तादृशाऽभावो धर्तुं शक्यते । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

परन्तु तृतीयलक्षणाऽनुसारेण नैषाऽव्याप्तिः सम्भवति, तादृशाऽभावीयप्रतियोगिताऽवच्छेदक-तायाः साक्षात् परम्परया चाधिकरणविधया संयोग-संयोगत्व-समवायानामेव प्राप्तेः तादृशाऽभावीय-प्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्व-समवायगत-बहुत्वरूपवृत्तित्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं समवायः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याश्च पर्याप्त्याधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं नास्ति इति तादृशाऽ-भावो नैव ग्रहीतुं शक्यते ।

किन्तु संयोगेन संयोगित्वविशिष्टसमवाय्यभावः एव ग्राह्यः, तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया याऽवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः, सम्बन्धविधया या साध्यताव-च्छेदकता तस्याः अपि पर्याप्त्याधिकरणं संयोग एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपित-संसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यता-निरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्व-रूपवृत्तित्वमपि वर्तते, तादृशाऽभावीयप्रतियोगितावच्छेदकता साक्षात् परम्परया च संयोग-संयोगत्व -समवायेषु वर्तते, साध्यतावच्छेदकताऽपि तत्रैवेति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वा-वच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वाऽवच्छिन्नप्रति-

योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्व-समवायगतबहुत्वरूपवृत्तित्वमपि अस्ति । तथा च तादृशोऽभावो ग्रहीतुं शक्यते एव, तदधिकरणं गुणादिकं धूमस्तत्राऽवृत्तिरिति लक्षणसमन्वयात्कुतः अव्याप्तिः ?

ततश्च यथा 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्येवं स्थलाऽभ्युपगमे तृतीयलक्षणस्यैव निर्दुष्टत्वसिद्ध्या तदेवाङ्गीकरणीयम्, तथैव 'पर्वतः संयोगित्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्येवं स्थलाऽभ्युपगमेऽपि तृतीयलक्षणस्य निर्दुष्टत्वसिद्ध्या तदेवाऽङ्गीकरणीयं स्यादेवेति समाना एवाऽऽपत्तिः उभयत्र, तर्हि किमर्थं संयोगित्वेन संयोगिसाध्यकं सरलस्थलं परित्यज्य संयोगित्वेन समवायिसाध्यकं वक्रस्थलमङ्गीकृतं ग्रन्थकृता ? इति एषः पर्यनुयोगोऽस्माकं तदवस्थः ए***वेति चेत् ?***

न, तृतीयलक्षणाङ्गीकारे 'पर्वतः संयोगित्वविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्र संयोगेन घटत्वसमवाय्यभावमादायाऽव्याप्तेः दुर्वारत्वात् । अयमाशयः - यदि 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति एवं लक्षणमभ्युपेयते तदा उक्तस्थले संयोगेन घटत्वसमवाय्यभावमादायाऽव्याप्तिः स्यात्, यतः तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्या अधिकरणं संयोगः, साध्यतायाः या सम्बन्धविधया अवच्छेदकता तस्याः अपि पर्याप्त्या अधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं वर्तते एव ।

किञ्च, प्रकृते साध्यम् - समवायी, 'विशिष्टं शुद्धान्नातिरिच्यते' न्यायेन घटत्वसमवायिन्यपि साध्यत्वमनाविलम् ।

- साध्यतावच्छेदकः धर्मः - संयोगः ।
- साध्यतावच्छेदकः सम्बन्धः - संयोगः ।
- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

– साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन घटत्वसमवायेऽपि साध्यतावच्छेदकताऽवच्छेदकत्वमनाविलम्, घटत्वसमवायस्य शुद्धसमवायतोऽनतिरेके शुद्धसमवायनिष्ठसाध्यतावच्छेदकतावच्छेदकत्वस्य घटत्वसमवायवृत्तित्वध्रौव्यात् । ततश्च साध्यतावच्छेदकतायाः साक्षात् परम्परया च अधिकरणविधया संयोग-संयोगत्व-समवाय-घटत्वसमवायाः लभ्यन्ते ।

तथा तादृशाऽभावप्रतियोगी घटत्वसमवायी, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन तादृशाऽभावीयप्रतियोगित्वं समवायेऽपि अनाविलम् ।

– प्रतियोगितावच्छेदकः धर्मः - समवायः घटत्वसमवायश्च ।

– प्रतियोगितावच्छेदकः सम्बन्धः - संयोगः ।

– सम्बन्धनिष्ठतादृशप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

तथा च तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः अपि साक्षात्परम्परासाधारणाधिकरणविधया संयोग-संयोगत्व-समवाय-घटत्वसमवायाः एव प्राप्यन्ते । ततश्च तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्व-समवाय-घटत्वसमवायगतबहुत्वरूपवृत्तित्वमपि अस्ति इति तादृशोऽभावः धर्तुं शक्यते । घटत्वसमवायी च घटः भवति, घटत्वस्य तत्र समवायेन वृत्तेः, घटश्च नास्ति पर्वते संयोगेन इति पर्वते संयोगेन घटत्वसमवाय्यभावः लभ्यते, तत्र धूमः वृत्तिरिति लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

ननु किं मूर्खाः वयं येन विप्रलम्भयति एवमस्मान् ?

– तादृशाऽभावीयप्रतियोगी - घटत्वसमवायी समवायी च ।

– तादृशाऽभावीयप्रतियोगितावच्छेदकः धर्मः - समवायः घटत्वसमवायश्च ।

– तादृशाऽभावीयप्रतियोगितावच्छेदकः सम्बन्धः - संयोगः ।

– तादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - घटत्वसमवायत्वम् ।

– तादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - स्वरूपसम्बन्धः ।

– सम्बन्धनिष्ठतादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

एवं तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साक्षात्परम्परया च अधिकरणविधया समवाय-घटत्वसमवाय-घटत्वसमवाय-च-स्वरूप-संयोग-संयोगत्वानि प्राप्यन्ते ।

तथा साध्यम् - समवायी घटत्वसमवायी च ।

– साध्यतावच्छेदकः धर्मः - संयोगः ।

– साध्यतावच्छेदकः सम्बन्धः - संयोगः ।

– साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

– साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः घटत्वसमवायश्च ।

– सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

एवं साध्यतावच्छेदकतायाः पर्याप्त्या साक्षात् परम्परया चाधिकरणानि संयोग-संयोगत्व-घटत्वसमवाय-समवायाः एव लभ्यन्ते, घटत्वसमवायत्व-स्वरूपादीनां तत्राऽप्रवेशः एवेति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्व-समवाय-घटत्वसमवायगतबहुत्वरूपवृत्तित्वं तादृशाऽभावीयप्रतियोगितायां नैव सम्भवति इति तादृशाऽभावो नैव धर्तुं शक्यते इति कुतः तमादायाऽव्याप्तिः ? ***इति चेत्*** ?

य
शो
ल
ता

सत्यम्, तथापि 'पर्वतः संयोगविशिष्टसमवायिविशिष्टः, धूमाद्' - इत्यत्र वृत्तिनियामकवह्निसंयोगेन साध्यतायां संयोगेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव, तथाहि - प्रकृते साध्यम् - समवायी ।

– साध्यतावच्छेदकः धर्मः - संयोगः ।

– साध्यतावच्छेदकः सम्बन्धः - वृत्तिनियामकवह्निसंयोगः ।

– साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

– साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

– सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

तथा च साध्यतावच्छेदकतायाः साक्षात् परम्परया च अधिकरणविधया संयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-समवाय-वृत्तिनियामकवह्निसंयोगत्वादीनि प्राप्यन्ते ।

एवं तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

– प्रतियोगितावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगः ।

– प्रतियोगितावच्छेदकः सम्बन्धः - संयोगः ।

– प्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

– प्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - समवायः ।

– सम्बन्धनिष्ठप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

तथा च तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः अपि साक्षात् परम्परया च अधिकरणविधया वृत्तिनियामकवह्निसंयोग-संयोग-वृत्तिनियामकवह्निसंयोगत्व-समवाय-संयोगत्वादीनि एव प्राप्यन्ते ।

ततश्च तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-समवाय-वृत्तिनियामकवह्निसंयोगत्वादिगतबहुत्वरूपवृत्तित्वमस्ति एव ।

तथा सम्बन्धविधया या साध्यतावच्छेदकता तस्याः पर्याप्त्याधिकरणं यथा वृत्तिनियामकवह्निसंयोगः भवति तथा 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन संयोगोऽपि स्यादेवेति साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वृत्तिनियामकवह्निसंयोगगतैकत्वं यथा भवति तथा संयोगगतैकत्वमपि । सम्बन्धविधया या तादृशाऽभावीयप्रतियोगितावच्छेदकता साऽपि पर्याप्त्या संयोगे एव वर्तते इति तादृशाऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपमपि संयोगगतैकत्वमेवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमपि वर्तते इति तादृशाऽभावो धर्तुं शक्यते एव । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति स्यादेवाऽव्याप्तिः ।

यदि उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशमादृत्य 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाऽभावः' इति एवं लक्षणम् अभ्युपेयते तदा नेयमव्याप्तिः, यतः पूर्वोक्तरीत्या तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामक-

वह्निसंयोगगतैकत्वरूपवृत्तित्वं वर्तते, तथापि धर्मविधया या तादृशाऽभावीयप्रतियोगितावच्छेदकता तस्याः साक्षात् परम्परया च अधिकरणविधया वृत्तिनियामकवह्निसंयोग-संयोग-वृत्तिनियामकवह्निसंयोगत्वादीनि एव प्राप्यन्ते, अत्र संयोगत्वस्याऽन्तर्भावः न सम्भवति, संयोगत्वस्य प्रतियोगितावच्छेदकतावच्छेदकत्वाऽभावात्, संयोगे प्रतियोगितावच्छेदकतायाः सम्भवेऽपि संयोगत्वस्य प्रतियोगितावच्छेदकतावच्छेदकत्वं न सम्भवति, वृत्तिनियामकवह्निसंयोगत्वस्य संयोगत्वतोऽतिरिक्तत्वात् ।

धर्मविधया या साध्यतावच्छेदकता तस्याः अधिकरणविधया वृत्तिनियामकवह्निसंयोग-संयोग-संयोगत्वादीनि एव प्राप्यन्ते, अत्र वृत्तिनियामकवह्निसंयोगत्वस्याऽन्तर्भावः न शक्यः, 'विशिष्टं शुद्धान्नातिरिच्यते' इतिन्यायेन वृत्तिनियामकवह्निसंयोग-संयोगयोरैक्येऽपि तन्निष्ठधर्मयोः वृत्तिनियामकवह्निसंयोगत्व-संयोगत्वयोर्विभेदादिति साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वृत्तिनियामकवह्निसंयोग-संयोग-संयोगत्वादिगतबहुत्वं स्यात्, तादृशाऽभावीयप्रतियोगितानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं वृत्तिनियामकवह्निसंयोग-संयोग-वृत्तिनियामकवह्निसंयोगत्वादिगतबहुत्वं स्यादिति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामकवह्निसंयोग-संयोग-संयोगत्वादिगतबहुत्वरूपवृत्तित्वं न सम्भवति इति न तादृशोऽभावः धर्तुं शक्यते इति नाऽव्याप्तिः ।

पूर्वं धर्मविधया साध्यतावच्छेदकतायाः प्रतियोगितावच्छेदकतायाश्चाधिकरणानि न गृहीतानि आसन् किन्तु सामान्येन साध्यतावच्छेदकतायाः प्रतियोगितावच्छेदकतायाश्चाऽधिकरणानि गृहीतानि, ततः सम्बन्धनिष्ठसाध्यता-प्रतियोगिताऽवच्छेदकत्वावच्छेदकस्याऽपि तदधिकरणविधया ग्रहणसम्भवात् साध्यतावच्छेदककोटौ वृत्तिनियामकवह्निसंयोगत्वस्य तादृशाऽभावीयप्रतियोगितावच्छेदककोटौ च संयोगत्वस्य प्रवेशः सम्भवति, वृत्तिनियामकवह्निसंयोगत्वस्य सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकत्वात्, संयोगत्वस्य तादृशाऽभावीयसम्बन्धनिष्ठप्रतियोगितावच्छेदकतावच्छेदकत्वाच्च । अधुना धर्मविधया साध्यतावच्छेदकतायाः प्रतियोगितावच्छेदकतायाश्च अधिकरणानि गृहीतानि इति न तत्र वृत्तिनियामकवह्निसंयोगत्वादेः समावेशः सम्भवति इति न स्यादव्याप्तिरिति अवधेयम् ।

अथ नेयमव्याप्तिः सम्भवति, संयोगेन वृत्तिनियामकवह्निसंयोग्यभावीयप्रतियोगितायां स्वनिरू-

पितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यता-निरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूप-वृत्तित्वस्य, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्य-तावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामकवह्निसंयोग-संयोग -संयोगत्व-वृत्तिनियामकवह्निसंयोगत्व-समवायादिगतबहुत्वरूपवृत्तित्वस्य च सत्त्वेऽपि तादृशाऽभावः पर्वते नैव प्राप्यते, यतः तादृशवृत्तिनियामकवह्निसंयोगविधया पर्वत-वह्न्योः संयोगः प्राप्यते एव, तादृशसंयोगः समवायेन वह्नौ अपि वर्तते, वह्निश्च पर्वते वर्तते एवेति पर्वते वृत्तिनिया-मकवह्निसंयोग्यभावः कथं प्राप्यते ? तदधिकरणविधया जलह्रदादिकमेव ग्रहीतव्यम्, तत्र च धूमस्याऽवृत्तित्वेन लक्षणसमन्वयान्नाऽव्याप्तिरित्येवं 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदक-तात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपित-वृत्तित्वाभावः' - इतिलक्षणाङ्गीकारेऽपि न काचित् क्षतिः, तर्हि किमर्थम् उभयविधया उभय-विधाऽवच्छेदकत्वप्रवेशः आद्रियते ?

य शो ल ता

न च वृत्तिनियामकवह्निसंयोगस्य समवायेनाधिकरणं न विवक्षणीयम्, किन्तु अनुयोगिता-सम्बन्धेन । अनुयोगितासम्बन्धेन वृत्तिनियामकवह्निसंयोगाधिकरणविधया यत्र वह्निरस्ति ते एव पर्वतादयः प्राप्यन्ते, पर्वते पर्वतादयः संयोगेन न सन्त्येवेति वृत्तिनियामकवह्निसंयोगविशिष्टानां संयोगेनाऽभावः पर्वते प्राप्यते, तत्र धूमस्य वृत्तितया लक्षणाऽसमन्वयाद् भवेदव्याप्ति***रिति वाच्यम्,***

तथा सति तादृशाऽभावीयप्रतियोगितावच्छेदकतावच्छेदकसम्बन्धविधयाऽनुयोगितायाः प्रवेशेन साध्यतावच्छेदककोटौ तदप्रवेशेन च तादृशाऽभावस्याऽग्राह्यत्वध्रौव्यात् । तथा हि - यदि अनुयोगितासम्बन्धेन वृत्तिनियामकवह्निसंयोगविशिष्टः यः तस्य संयोगेन अभावः विवक्ष्यते तदा तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

- प्रतियोगितावच्छेदकधर्मः - वृत्तिनियामकवह्निसंयोगः संयोगश्च ।
- प्रतियोगितावच्छेदकसम्बन्धः - संयोगः ।
- प्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

- प्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगितासम्बन्धः ।

- सम्बन्धनिष्ठप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

ततश्च तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साक्षात् परम्परया च अधिकरणविधया वृत्तिनियामकवह्निसंयोग-संयोग-वृत्तिनियामकवह्निसंयोगत्व-संयोगत्वाऽनुयोगित्वादीनि प्राप्यन्ते ।

साध्यतावच्छेदकताकोटौ तु अनुयोगित्वस्य नास्त्येव प्रवेशः इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामकवह्निसंयोग-संयोग-वृत्तिनियामकवह्निसंयोगत्व-संयोगत्व-समवायादिगतबहुत्वरूपवृत्तित्वं नैव सम्भवेत्, ततः कुतः तमादाय अव्याप्तिः सम्भवेत् ? ***इति चेत्*** ?

न, साध्यतावच्छेदककोटौ अपि अनुयोगित्वप्रवेशसम्भवात् । संयोगाश्रयत्वेन समवायिनः साध्यता प्रकृतेऽस्ति, समवायी वह्निः संयोगस्याश्रयः अनुयोगितासम्बन्धनैव विवक्ष्यते, न तु समवायेन । ततश्च प्रकृते साध्यम् - समवायी ।

- साध्यतावच्छेदकः धर्मः - संयोगः ।

- साध्यतावच्छेदकः सम्बन्धः - संयोगः वृत्तिनियामकवह्निसंयोगश्च ।

- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

- साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगित्वम् ।

- सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

इत्थं तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतायाश्च साक्षात् परम्परया च अधिकरणविधया संयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्व-अनुयोगित्वादीनि एव प्राप्यन्ते इति तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्वाऽनुयोगित्वादिगतबहुत्वरूपवृत्तित्वमस्त्येवेति तादृशाऽभावमादायाऽव्याप्तिः स्यादेव । तदर्थमुभयविधया उभयविधाऽवच्छेदकत्वप्रवेशः कर्तव्यः एवेति ।

ननु अस्मदभिलषितलक्षणाङ्गीकारेऽपि न स्यादेवोक्ताऽव्याप्तिः । तथा हि - उक्तस्थले वृत्तिनियामकवह्निसंयोगः साध्यतावच्छेदकसम्बन्धः, अतः सम्बन्धविधया साध्यतावच्छेदकता

साक्षाद् वृत्तिनियामकवह्निसंयोगे 'विशिष्टं शुद्धान्नातिरिच्यते' - इतिन्यायेन संयोगेऽपि च वर्तते, परम्परया वृत्तिनियामकवह्निसंयोगत्वे एव, न तु संयोगत्वेऽपि, सम्बन्धविधया या प्रतियोगितावच्छेदकता सा साक्षात्पर्याप्त्या संयोगे, परम्परया च संयोगत्वे एव, न तु वृत्तिनियामकवह्निसंयोगत्वे, ततश्च साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं वृत्तिनियामकवह्निसंयोग-वृत्तिनियामकवह्निसंयोगत्वोभयगतद्वित्वं संयोग-वृत्तिनियामकवह्निसंयोगत्वोभयगतद्वित्वं वा, तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं तु वृत्तिनियामकवह्निसंयोग-संयोगत्वगतद्वित्वं संयोग-संयोगत्वगतद्वित्वं वा । संयोगत्वस्य सम्बन्धविधया साध्यतावच्छेदकताकोटौ अप्रवेशः, वृत्तिनियामकवह्निसंयोगत्वस्य च सम्बन्धविधया तादृशाऽभावीयप्रतियोगितावच्छेदकताकोटौ अप्रवेशः इति स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकवृत्तिनियामकवह्निसंयोग-वृत्तिनियामकवह्निसंयोगत्वगतद्वित्वरूपवृत्तित्वं तादृशाऽभावीयप्रतियोगितायां नैवाऽस्ति इति न तादृशाऽभावो धर्तुं शक्यते, येन तमादायाऽव्याप्तिः स्या***दिति चेद् ?***

न, वृत्तिनियामकवह्निसंयोग-संयोगोभयसम्बन्धेन संयोगाश्रयत्वेन समवायिनः साध्यतायां तादृशोभयसम्बन्धेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तेः दुरुद्धरत्वात् । तथा हि - यत्र यत्र धूमः तत्र तत्र संयोगेन वृत्तिनियामकवह्निसंयोगेन च वह्निः स्यादेवेति सत्स्थलं तत् । पर्वते वृत्तिनियामकवह्निसंयोगी संयोगेनाऽपि नास्ति, वृत्तिनियामकवह्निसंयोगेनाऽपि नास्ति, अतः उभयसम्बन्धेन वृत्तिनियामकवह्निसंयोग्यभावः लभ्यते एव ।

तथा च प्रकृते साध्यम् - समवायी ।

- साध्यतावच्छेदकः धर्मः - संयोगः ।
- साध्यतावच्छेदकः सम्बन्धः - वृत्तिनियामकवह्निसंयोगः संयोगश्च ।
- साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।
- साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगित्वम् ।
- सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम्, संयोगत्वञ्च ।

तथा तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

– प्रतियोगितावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगः ।

– प्रतियोगितावच्छेदकः सम्बन्धः - वृत्तिनियामकवह्निसंयोगः संयोगश्च ।

– प्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

– प्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगित्वम् ।

– सम्बन्धनिष्ठप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम्, संयोगत्वञ्च ।

तथा च प्रकृते सम्बन्धविधया या साध्यतावच्छेदकता तस्याः साक्षात् परम्परया च पर्याप्त्या अधिकरणविधया संयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्वादयः प्राप्यन्ते, ते एव सम्बन्धविधया या तादृशाऽभावीयप्रतियोगितावच्छेदकता तस्याः साक्षात् परम्परया च पर्याप्त्या अधिकरणविधया प्राप्यन्ते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्वादिगतबहुत्वरूपवृत्तित्वमस्त्येव ।

एवं तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतायाश्च साक्षात् परम्परया च पर्याप्त्याधिकरणविधया संयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्वाऽनुयोगित्वादयः एव प्राप्यन्ते, ततः तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्व-वृत्तिनियामकवह्निसंयोगत्वाऽनुयोगित्वादिगतबहुत्वरूपवृत्तित्वमपि स्यादेव । तथा च तादृशोऽभावो ग्रहीतुं शक्यते । तदधिकरणं पर्वतः, धूमस्तत्र वृत्तिरिति लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

यदि हि 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इति लक्षणमभ्युपेयते तदा नोक्ताऽव्याप्तिः, यतः तादृशाऽ-

भावीयप्रतियोगितायां ***यद्यपि*** पूर्वोक्तरीत्या स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-वृत्तिनियामकवह्निसंयोग-संयोगत्ववृत्तिनियामकवह्निसंयोगत्वादिगतबहुत्वरूपवृत्तित्वमस्ति ***तथापि*** तादृशाऽभावीयप्रतियोगितायाः या धर्मविधयाऽवच्छेदकता तस्याः साक्षात् परम्परया च पर्याप्त्याऽधिकरणविधया संयोगः, वृत्तिनियामकवह्निसंयोगत्वम्, वृत्तिनियामकवह्निसंयोगः, अनुयोगित्वम्..... इत्यादयो धर्माः प्राप्यन्ते, अत्र संयोगत्वं नाऽन्तर्भवति । धर्मविधया या साध्यतावच्छेदकता तस्याः पर्याप्त्याऽधिकरणविधया वृत्तिनियामकवह्निसंयोगः, संयोगः, संयोगत्वम्, अनुयोगित्वम्..... इत्यादयः धर्माः प्राप्यन्ते, किन्तु वृत्तिनियामकवह्निसंयोगत्वम् अत्र नाऽन्तर्भवति इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्वाऽनुयोगित्वादिगतबहुत्वरूपवृत्तित्वं नास्ति इति तादृशोऽभावः धर्तुं नैव शक्यते । किन्तु संयोगविशिष्टसमवायिनः संयोगेनाऽभावः एव ग्राह्यः, तदधिकरणं गुणादिकं धूमस्तत्र अवृत्तिरिति लक्षणसमन्वयात् कुतोऽव्याप्तिगन्धलेशोऽपि ?

एवं लक्षणत्रितयमपि एतत्स्थले अव्याप्तिग्रस्तं भवति अतः चतुर्थमेव लक्षणमङ्गीकरणीयम्, अतः एव च ग्रन्थकृता समवायिनः संयोगत्वेन साध्यत्वमुपदर्शितमिति ध्येयम् ।

यदि च "ननु तादृशलक्षणेऽव्याप्तिप्रदर्शनायाऽपि संयोगित्वेन समवायिसाध्यकस्थलपर्यन्तमनुधावनं व्यर्थमेव, 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्यत्र संयोग-वृत्तिनियामकवह्निसंयोगोभयसम्बन्धेन संयोगित्वेन संयोगिनः एव साध्यतायां संयोग-वृत्तिनियामकवह्निसंयोगोभयसम्बन्धेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिः स्यादेव ।

तथाहि - एतल्लक्षणे साध्यम् - संयोगी ।

– साध्यतावच्छेदकः धर्मः - संयोगः ।

– साध्यतावच्छेदकः सम्बन्धः - संयोगः वृत्तिनियामकवह्निसंयोगश्च ।

– साध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम् ।

– साध्यतावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगित्वम् ।

– सम्बन्धनिष्ठसाध्यतावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम्, वृत्तिनियामकवह्निसंयोगत्वञ्च ।

तथा तादृशाऽभावीयप्रतियोगी - वृत्तिनियामकवह्निसंयोगी ।

– प्रतियोगितावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगः ।

– प्रतियोगितावच्छेदकः सम्बन्धः - संयोगः वृत्तिनियामकवह्निसंयोगश्च ।

– प्रतियोगितावच्छेदकतावच्छेदकः धर्मः - वृत्तिनियामकवह्निसंयोगत्वम् ।

– प्रतियोगितावच्छेदकतावच्छेदकः सम्बन्धः - अनुयोगित्वम् ।

– सम्बन्धनिष्ठप्रतियोगितावच्छेदकतावच्छेदकः धर्मः - संयोगत्वम्,
वृत्तिनियामकवह्निसंयोगत्वञ्च ।

तथा चाऽत्र साध्यभेदं विना न कश्चिद् विशेषः भवतोपदर्शितस्थलादिति सर्वं भवतोक्तरीत्यैव अत्र सङ्गच्छते । तथा च यदि एतत्स्थलग्रहणेऽपि सर्वाभिलषितसिद्धिः सम्भवति तर्हि किमर्थं संयोगित्वेन समवायिसाध्यकस्थलपर्यन्तमनुधावनं कृत***मि"ति विभाव्यते; तदा*** समवायिपदं ग्रन्थकृदुक्तं वह्निपरमवगन्तव्यम्, अर्थात् समवायिनः साध्यतायां = वह्नेः साध्यतायाम्, संयोगित्वेन वह्नेः साध्यत्वे साध्यविधया संयोगी लभ्यते, तेन 'पर्वतः संयोगिविशिष्टः धूमाद्' - इत्येवं स्थललाभः सम्भवति इति ***दिक् ।***

य शो ल ता

ननु यदि साध्यतावच्छेदकता प्रतियोगितावच्छेदकता च साक्षात्परम्परासाधारणा गृह्यते तदैव 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽव्याप्तिवारणाय धर्मविधया साध्यता-प्रतियोगितावच्छेदकत्वयोः प्रवेशः, पूर्वोक्तोभयसम्बन्धेन साध्यतायां तादृशोभय-सम्बन्धेन वृत्तिनियामकवह्निसंयोग्यभावमादायाऽव्याप्तिवारणाय सम्बन्धविधया साध्यता-प्रतियोगिता-वच्छेदकत्वयोः प्रवेशश्च आवश्यकौ भवतः । यदि साक्षादेव साध्यता-प्रतियोगितावच्छेदकता गृह्यते तदा नोक्ताऽऽपत्तिः । तथा हि - साक्षात् साध्यता-प्रतियोगितावच्छेदकत्वमभ्युपगम्य 'स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यता-वच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाऽ-भावाधिकरणनिरूपितवृत्तित्वाभावः' इति एवमेव लक्षणमभ्युपेयम्, तथा सति 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादाय नाऽव्याप्तिः, तादृशाऽभावीयप्रतियोगितावच्छेदकता साक्षात् पर्याप्त्या समवाये संयोगे च वर्तते, साध्यतावच्छेदकता तु केवलसंयोगे एवेति तादृशाऽभा-वीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वं

नास्त्येवेति कुतः तमादायाऽव्याप्तिः सम्भवेदिति साक्षादेव साध्यता-प्रतियोगितावच्छेदकता ग्राह्या ।

न च पूर्वोक्तं किमर्थं विस्मरति भवान्, साक्षादवच्छेदकताग्रहणेऽपि 'पर्वतः समवायिविशिष्टः, धूमाद्' - इत्यत्र समवायेन संयोग्यभावमादायाऽव्याप्तिः स्यादेव, तादृशाऽभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतायाश्च साक्षात् समवाये संयोगे च वर्तमानत्वा***दिति वाच्यम्,***

तादृशाऽव्याप्त्यपाकरणाय 'स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणस्य 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवं लक्षणस्य वा अङ्गीकरणीयत्वम् ।

तादृशाऽऽपत्त्यपाकरणाय 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' - इति लक्षणं नाङ्गीकरणीयम् ।

यतः तादृशाऽभावीयप्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपसंयोग-समवायगतद्वित्ववृत्तित्वसत्त्वेऽपि तादृशाऽभावीयप्रतियोगितायाः धर्मविधयाऽवच्छेदकता संयोगे, तत्र धर्मविधया साध्यताऽवच्छेदकतायाः असत्त्वेन सम्बन्धविधया साध्यतावच्छेदकता यत्र तत्र तादृशाऽभावीयप्रतियोगितायाः सम्बन्धविधयाऽवच्छेदकतायाः असत्त्वेन च तादृशाऽभावीय-

प्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकता-त्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वमपि नास्ति, स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-गतैकत्वरूपवृत्तित्वमपि नास्ति, अतः एकतरप्रवेशेनैव तद्वारणं सम्भवति तर्हि किमर्थमुभयविधया उभयविधाऽवच्छेदकत्वं प्रवेशनीयम् । एवञ्च साक्षात् साध्यता-प्रतियोगितावच्छेदकत्वाऽङ्गीकारेण तादृशलक्षणमेवाङ्गीकरणीयं चेत् ? वरमेव तत् । उभयविधया तादृशाऽवच्छेदकत्वद्वितयं नैव प्रवेशनीयम् ***इति चेद् ?***

मैवम्, 'पर्वतः समवायिविशिष्टः धूमाद्' - इत्यत्र घटत्वसमवाय्यभावमादाय, पटानुयोगिक-संयोगेन समवाय्यभावमादाय च अव्याप्तेर्दुरुद्धरत्वेन परम्परया तादृशाऽवच्छेदकताद्वितयस्य अवश्यं प्रवेशनीयत्वात् ।

अयं भावः - साक्षात् साध्यता-प्रतियोगितावच्छेदकताग्रहणे यदि उभयविधया उभयविधाऽ-वच्छेदकत्वप्रवेशमादृत्य 'स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनु-योगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छि-न्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति च यत्प्रतियोगित्वं तन्निरूपकाऽभावाधिकरणनिरूपितवृत्तित्वाभावः' इति एवं लक्षणमभ्युपेयते तदापि 'पर्वतः समवायि-विशिष्टः, धूमाद्' - इत्यत्र संयोगेन घटत्वसमवाय्यभावमादायाऽव्याप्तिः स्यादेव, यतः तादृशाऽभा-वीयप्रतियोगितायाः सम्बन्धविधया या अवच्छेदकता तस्याः पर्याप्त्याधिकरणं संयोगः, सम्बन्धविधया या साध्यतावच्छेदकता तस्याः अपि पर्याप्त्याधिकरणं संयोगः एवेति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-गतैकत्वरूपवृत्तित्वमस्त्येव ।

एवं तादृशाऽभावीयप्रतियोगितायाः या धर्मविधया अवच्छेदकता तस्याः पर्याप्त्या अधिकरणं

घटत्वसमवायः, 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन समवायोऽपि, तथा च यथा तादृशाऽभावीयप्रतियोगिताऽवच्छेदकतानिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं घटत्वसमवायगतैकत्वं स्यात्, तथैव समवायगतैकत्वमपि स्यादेव, धर्मविधया या साध्यतावच्छेदकता तस्याः अपि पर्याप्त्याधिकरणं समवायः एवेति तादृशसाध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकं रूपं समवायगतैकत्वमेव । अतः तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वमपि स्यादेव । तथा च तादृशोऽभावः धर्तुं शक्यते एव, घटत्वसमवायी घटः पर्वते संयोगेन नास्तीति पर्वते संयोगेन घटत्वसमवाय्यभावः प्राप्यते, तत्र च धूमः वृत्तिरिति स्यादेवाऽव्याप्तिः ।

यदि च साक्षात्परम्परासाधारणसाध्यता-प्रतियोगितावच्छेदकताग्रहणमिष्यते तदा नेयमव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायाः धर्मविधया या अवच्छेदकता तस्याः साक्षात् परम्परया च अधिकरणविधया घटत्वसमवाय-समवाय-घटत्वसमवायत्वादयो धर्माः प्राप्यन्ते, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः तु साक्षात् परम्परया चाधिकरणविधया समवाय-समवायत्वादयः एव प्राप्यन्ते, एवमेकत्र घटत्वसमवायत्वप्रवेशे समवायत्वप्रवेशो नास्ति, अन्यत्र समवायत्वप्रवेशे घटत्वसमवायत्वप्रवेशो नास्ति इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वसत्त्वेऽपि स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवाय-समवायत्वादिगतबहुत्वरूपवृत्तित्वविरहात्तादृशाऽभावो नैव ग्रहीतुं शक्यते इति कुतः तमादायाऽव्याप्तिः सम्भवति ?

यद्यपि एतदव्याप्तिनिराकरणं धर्मविधया या साध्यता-प्रतियोगितावच्छेदकता तस्याः एव साक्षात्परम्परया च अधिकरणग्रहणमात्रेणैव सम्भवति ***तथापि*** तन्मात्रस्यैव साक्षात् परम्परया च ग्रहणे पटानुयोगिकसंयोगेन उक्तस्थले एव समवाय्यभावमादायाऽव्याप्तिः स्यादेव, यतः

धर्मविधया या तादृशाऽभावीयप्रतियोगितावच्छेदकता तस्याः साक्षात् परम्परया च अधिकरणविधया समवाय-समवायत्वादयः धर्माः एव प्राप्यन्ते, साध्यतायाः या धर्मविधया अवच्छेदकता तस्याः अपि साक्षात् परम्परया चाधिकरणविधया समवाय-समवायत्वादयः धर्माः एव प्राप्यन्ते इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धा-ऽवच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकसमवाय-समवाय-त्वादिगतबहुत्वरूपवृत्तित्वमस्त्येव ।

तथा प्रकृते सम्बन्धविधया या साध्यता-प्रतियोगितावच्छेदकता तस्याः साक्षादेवाधिकरणं ग्राह्यमिति तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता सा साक्षात् पर्याप्त्या पटानुयोगिकसंयोगे एव वर्तते, पटानुयोगिकसंयोगश्च संयोगादभिन्नः इति संयोगेऽपि वर्तते, ततः तादृशाऽभावीयप्रतियोगितानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकत्वं संयोगगतैकत्वेऽपि भवेदेव, साध्यतायाः या सम्बन्धविधयाऽवच्छेदकता सा साक्षात् पर्याप्त्या संयोगे एव वर्तते इति साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वाऽवच्छिन्न-प्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपं संयोगगतैकत्वमेव स्यात्, तथा च तादृशाऽभावीय-प्रतियोगितायां स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगि-ताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकसंयोगगतैकत्वरूपवृत्तित्वमस्ति इति तादृशाऽभावो धर्तुं शक्यते एव ।

यशोलता

पटानुयोगिकसंयोगसम्बन्धेन कोऽपि धर्मः यदि वर्तते तदा पटे एव वर्तते, नाऽन्यत्र कुत्रचित्, अन्यथा तादृशसंयोगस्य पटानुयोगिकत्वं व्याहन्येतेति पर्वते पटानुयोगिकसंयोगेन वह्नेरभावोऽपि सुलभः, ततश्च पटानुयोगिकसंयोगेन समवाय्यभावाधिकरणविधया पर्वतः गृह्यते, तत्र च धूमः वृत्तिरिति लक्षणाऽसमन्वयाद् भवेदेवाऽव्याप्तिः ।

यदि सम्बन्धविधया या साध्यता-प्रतियोगितावच्छेदकता सा साक्षात्परम्परासाधारणा गृह्यते तदा नोक्ताऽव्याप्तिः, यतः तादृशाऽभावीयप्रतियोगितायाः या सम्बन्धविधया अवच्छेदकता तस्याः साक्षात् परम्परया चाधिकरणविधया पटानुयोगिकसंयोग-संयोग-पटानुयोगिकसंयोगत्वादयो धर्माः प्राप्यन्ते, सम्बन्धविधया या साध्यतावच्छेदकता तस्याः साक्षात् परम्परया चाधिकरणविधया संयोग-संयोगत्वादयः प्राप्यन्ते, तत्र पटानुयोगिकसंयोगत्वस्य प्रवेशः नैव सम्भवति, प्रतियोगितावः

मैवम्, *समवायिनस्संयोगाश्रयत्वेन साध्यतायां संयोगाश्रयस्य समवायेनाऽभावमादायाऽव्याप्तेर्दुरुद्धरत्वात् इति ।*

च्छेदकताकोटौ च संयोगत्वस्य प्रवेशः नैव सम्भवति इति तादृशाऽभावीयप्रतियोगितायां स्वनिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिताऽवच्छेदकत्वसम्बन्धेन साध्यतानिरूपितयत्किञ्चित्सम्बन्धावच्छिन्नाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसमवायगतैकत्वरूपवृत्तित्वसत्त्वेऽपि स्वनिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गीयाऽवच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकसंयोग-संयोगत्वादिगतबहुत्वरूपवृत्तित्वविरहात्तादृशोऽभावो नैव धर्तुं शक्यते, ततः कुतः तमादायाऽव्याप्त्याशङ्काऽपि ?

इत्थञ्च साक्षात्परम्परासाधारणैव साध्यतावच्छेदकता प्रतियोगिताऽवच्छेदकता च ग्राह्या, तत्र एकविधया एकविधाऽवच्छेदकत्वप्रवेशे, उभयविधाऽवच्छेदकत्वप्रवेशे, उभयविधया एकविधाऽवच्छेदकत्वप्रवेशे वाऽसम्भवादिदोषाऽऽपातात् उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशः एवाङ्गीकरणीयः इति स्थितम् इत्यलं चसूर्या, अत्र बहु वक्तव्यम् अतिविस्तारभिया तन्नोच्यते इति ।

एतत्सर्वं मनसिकृत्याह - **मा एवम्** = साक्षात्परम्परासाधारणसाध्यत्वाद्यवच्छेदकत्वमादृत्य 'स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः' इत्येवमेकविधनिवेशेनैव पूर्वोक्तनिखिलाऽभाववारणं सम्भवति इत्येवं नास्ति इत्यर्थः । हेतुमाह - **समवायिनः** = वह्नेः **संयोगाश्रयत्वेन साध्यतायाम्,** तथा च 'पर्वतः संयोगिविशिष्टः, धूमाद्' - इत्येतत्स्थले, **संयोगाश्रयस्य समवायेनाऽभावमादाय,** उपलक्षणाद् उक्तस्थले एव संयोगेन वृत्तिनियामकवह्निसंयोगेन च साध्यतायां तादृशोभयसम्बन्धेन वृत्तिनियामकवह्निसंयोग्यभावमादाय च **अव्याप्तेः दुरुद्धरत्वात्** = तादृशपरिष्काराश्रयणेऽपि उद्धर्तुमशक्यत्वाद् उभयविधया उभयविधाऽवच्छेदकत्वाप्रवेशे **इति** ।

※ પંક્તિનો શબ્દસ્પર્શી અર્થ ※

शब्दार्थ :- साध्यताअवच्छेदकतात्वअवच्छिन्न.... ઈત્યાદિ લક्षण મુજબ પણ ધર्મવિધયા અને સંબંધવિધયા साध्यताअवच्छेदકતાનો તથા પ્રતિયોગિતાअવच्छेदકતાનો જુદો - જુદો પ્રવેશ કરાવવો પડશે. જો ન કરો તો જ્યારે સમવાયી સંયોગિત્વ રૂપે साध्य

तथा च साध्यतावच्छेदकाऽवच्छिन्नत्वम्, साध्यतावच्छेदकेतरानवच्छिन्नत्वम्, स्वावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं वा प्रतियोगिताविशेषणविधया विवक्ष्यताम्, सर्वत्र उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशः अनुसरणीयः एवेति । साध्यतावच्छेदकाऽवच्छिन्नत्वपरिष्काराङ्गीकरणे को लाभः, कश्च दोषः येन साध्यताऽवच्छेदकेतराऽनवच्छिन्नत्वमङ्गीकरणीयम्, तदङ्गीकारेऽपि को दोषः येन नूतनपरिष्कारः कर्तव्यः ? इत्यादिकमग्रेतनप्रकरणे स्फुटीभविष्यति । एतत्प्रकरणे तु कमपि परिष्कारम् अङ्गीकरोतु नाम, उभयविधया उभयविधाऽवच्छेदकत्वप्रवेशोऽवश्यमभ्युपेयः एवेति साधितम् ।

प्रकृतप्रकरणे अष्टचत्वारिंशल्लक्षणानि दृष्टानि, सर्वेषाञ्च निर्दुष्टत्वं दुष्टत्वं वा चर्चितमिति । अग्रेतनप्रकरणे आदौ धर्मविधया या साध्यतावच्छेदकता या च प्रतियोगितावच्छेदकता तयोः परिष्कारः प्रदर्शयिष्यते, तदनुसारेण पश्चात् सम्बन्धविधया या साध्यता-प्रतियोगिताऽवच्छेदकता तस्याः परिष्कारः प्रदर्शयिष्यते इति सम्यगवधेयम् इति शम् ।

॥ इति सकलसङ्घहितचिन्तकाचार्यप्रवर ***श्रीभुवनभानुसूरीश्वर*** *शिष्यरत्नपूज्यपूनाजिल्होद्धारकाचार्यप्रवर* ***श्रीविश्वकल्याणसूरीश्वर*** *शिष्यरत्नपूज्यसंविन्मूर्त्याचार्यप्रवर* ***श्रीयशोविजयसूरीश्वर-*** *शिष्यलवमुनिभक्तियशविजयविरचितायां* ***व्याप्तिपञ्चकविवृतिवृत्तियशोलतायां*** *तृतीया दीधितिः॥*

●●●

હોય ત્યારે (**पर्वतः संयोगित्वाश्रयसमवायिमान्, धूमात्** આ સ્થલમાં) સંયોગાશ્રયનો - સંયોગીનો સમવાયસંબંધથી અભાવ લઈને અવ્યાપ્તિ દુર્વાર = દુરુદ્ધર બની જશે.

★ પ્રકરણ ઉપસંહાર ★

આ રીતે પ્રસ્તુત પ્રકરણમાં આપણે ધર્મવિધયા અને સંબંધવિધયા સાધ્યતાઅવચ્છેદકતાના અને પ્રતિયોગિતાઅવચ્છેદકતાના પ્રવેશની સાર્થકતા (૧) સાધ્યતાઅવચ્છેદકઅવચ્છિન્નત્વ, (અન્વયથી) (૨) સાધ્યતાઅવચ્છેદકઈતરઅનવચ્છિન્નત્વ (વ્યતિરેકથી), (૩) સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન....પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપવૃત્તિત્વ - પ્રતિયોગિતાના આ ત્રણ વિશેષણવાળા જુદા-જુદા લક્ષણમાં જોઈ. સર્વત્ર ૧૬ ભાંગા થઈ શકે છે તે સ્વયં વિચારી લેવું. **इति शम्** ।

॥ મુનિભક્તિયશવિજયરચિત વિનમ્રાવ્યાખ્યામાં તૃતીય દીધિતિનું વિવરણ સંપૂર્ણ ॥

ઊડાનની પરિસીમા
'GSLV' છે,
ઊંચાઈની પરિસીમા
'એવરેસ્ટ' છે,
ઊંડાઈની પરિસીમા
'પેસેફિક' છે,
તેમ વ્યાપ્તિના વિશ્વમાં
તર્કની ઊડાનની....
તર્કની ઊંચાઈની....
તર્કની ઊંડાઈની.....
પરિસીમા છે :

"गूढार्थतत्त्वालोक"

- प्रकाशक -
श्री दिव्यदर्शन ट्रस्ट

9 789382 019732

MULTY GRAPHICS
(022) 23873222 23884222